www.thearyasamaj.org

# भाषाप्रवेशः

## द्वितीयभागः



संस्कृतभारती

नवदेहली

www.thearyasamaj.org

## भवताम् अध्ययनस्य अनुकूलतायै संस्कृतभारत्या सज्जीकृताः सन्ति अन्येऽपि बहवः ग्रन्थाः । यथा -

भाषाभ्यासाय -

- अभ्यासपुस्तकम् ▸ विभक्तिवल्लरी ▸ शतृशानजन्तमञ्जरी ▸ अभ्यासदर्शिनी
- सम्भाषणसोपानम् ▸ कालबोधिनी ▸ णत्वणिजन्तम् ▸ सन्देशसंस्कृतम्
- सम्भाषणसंस्कृतम् (ध्वनिमुद्रिकासहितम्) ▸ प्रयोगाः (ध्वनिमुद्रिकासहितम्)

भाषाज्ञानवर्धनाय -

- समासः ▸ सन्धिः ▸ कारकम् ▸ शुद्धिकौमुदी ▸ भाषापाकः ▸ इड्व्यवस्था

विचारशक्तिवर्धनाय -

- परिष्कारः ▸ संस्कृतभारती ▸ परिवर्तनम् ▸ सङ्क्रमणम्
- उत्तिष्ठत मा स्वप्त ▸ सप्तदशी ▸ पूर्णाङ्कं प्रति ▸ ज्ञानदीप्तिः

संस्कारवर्धनाय -

- सुगन्धः ▸ पञ्चतन्त्रकथाः ▸ शृण्वन्तु कथाम् एकाम्
- प्रेरणादीपः ▸ हे मनः ! समाश्वासितु

प्रेरणावर्धनाय -

- Pride of India (आङ्ग्लभाषया) ▸ भारतीयविज्ञानपरम्परा
- भुवमानीता भगवद्भाषा ▸ युगावतारः ।

मनोविनोदाय भाषाभ्यासाय च -

- सार्थः ▸ धर्मश्रीः ▸ ऋणविमुक्तिः ।

अभिनयाय -

- नवरूपकम् ▸ कविकोपकलापः ▸ जागरूको भव ।

श्रवणसुखाय भाषाभ्यासाय च ध्वनिमुद्रिकाः -

- गीतसंस्कृतम् ▸ गेयसंस्कृतम् ▸ शिशुसंस्कृतम् ▸ हितोपदेशकथाः
- श्रीकृष्णजननम् ▸ संस्कृतोज्जीवनम् ।

---

**पुस्तकानि ध्वनिमुद्रिकाश्च प्राप्तुं भवतां केन्द्रसंयोजकस्य सम्पर्कं कुर्वन्तु ।**

www.thearyasamaj.org

# भाषाप्रवेशः

## द्वितीयभागः

संस्कृतभारती
नवदेहली

www.thearyasamaj.org

प्रकाशनम्
संस्कृतभारती
मातामन्दिरगली, झण्डेवाला,
नवदेहली - 110 055

© प्रकाशकस्य एव

मुखपुटकला - सुधाकर दर्बे
चित्राणि - सतीशः एलेसर

साहाय्यम् - शान्तला, शालिनी, ज्योतिः

प्रथमं मुद्रणम् - २००७ , १०,०००
द्वितीयं मुद्रणम् - २०१२, ३,०००

मुद्रणम् -
**वागर्थ**
न.रा. कालोनी, बेङ्गलूरु - १९

**ISBN 978- 81-87276-37-1**

**BHAASHAA PRAVESHAHA - II** A Text book to learn Samskrit at Samskrita Shikshana Kendra written by various authors.
Publisher - SAMSKRITA BHARATI, Mata Mandir Gali, Jhandewala, New Delhi - 110 055. Ph - (011) 23517689.
Website - www. samskrita-bharati.org

Pages - vi + 202 Rs.130/- Second Print - Dec - 2012
Printed at - **Vagartha,** N. R. Colony, Bangalore - 560 019

www.thearyasamaj.org

# भाषाप्रवेशः

## द्वितीयभागः

सम्पादकसमितिः

डा. चाँदकिरण सलूजा

डा. विश्वासः

सुधीष्टकुमार मिश्रः

वी. सुब्रह्मण्यः

सतीशः गज्जर्

रणजित् को.

को. गिरिधररावः

संस्कृतभारती

नवदेहली

www.thearyasamaj.org

प्रियशिक्षार्थिनः !

भाषाप्रवेशस्य प्रथमभागम् अधीत्य इदानीं द्वितीयभागं पठितुम् उत्सुकानां भवतां हार्दं स्वागतम् ।

भाषाप्रवेशस्य प्रथमभागे भवद्भिः संस्कृतभाषायाः स्वल्पः परिचयः प्राप्तः अस्ति । अस्मिन् द्वितीये भागे ततोऽपि अधिकतरः परिचयः यथा भवेत् तथा पाठयोजना कृता अस्ति । न केवलं पाठभागाः, अपि तु तैः सह सूक्तयः, प्रहेलिकाः, लौकिकन्यायाः, चाटुश्लोकाः - इत्यादयः संस्कृतभाषायाः वैशिष्ट्यपूर्णाः अनेके अंशाः अपि अत्र योजिताः सन्ति । भवन्तः तान् अंशान् विशिष्य सङ्ग्रहीतुमपि शक्नुवन्ति, येन संस्कृतस्य वैशिष्ट्यम् अन्यान् उद्दिश्य अपि वक्तुम् अर्हन्ति ।

प्रतिपाठम् अनेके अभ्यासाः दत्ताः सन्ति । ते सर्वे अभ्यासाः अवश्यं कर्तव्याः । यदि तेषु अस्पष्टता अनुभूयते, किमपि न ज्ञायते वा तर्हि केन्द्रशिक्षकस्य साहाय्यम् अवश्यं प्राप्नुवन्तु भवन्तः ।

भाषाभ्यासः निरन्तरताम् अपेक्षते । प्रतिदिनं स्वल्पः एव समयः चेदपि नियतरूपेण दत्तः चेत्, अध्ययनं निरन्तरं भवति चेत् भवतां संस्कृतज्ञानं क्रमशः वर्धते एव । अतः अध्ययने निरन्तरतां रक्षन्तु भवन्तः ।

भवतां संस्कृताध्ययनं सफलं भवतु ।

शुभं भवतु ।

✍ सम्पादकः

www.thearyasamaj.org

# अनुक्रमणिका


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| 1. | अहङ्कारः अनर्थाय (उपपदविभक्तयः) | 1 |
| 2. | परिचयः (हलन्तपुंलिङ्गशब्दाः - प्रथमाविभक्तिः) | 8 |
| 3. | वर्षाकालः (हलन्तस्त्रीलिङ्ग-नपुंसकलिङ्गशब्दाः) | 15 |
| 4. | सोत्साहानां नास्त्यसाध्यम् (हलन्तशब्दाः द्वितीया-तृतीया-चतुर्थीविभक्तयः) | 20 |
| 5. | विपदि भवेत् धैर्यम् (हलन्तशब्दाः पञ्चमी-षष्ठी- सप्तमीविभक्तयः) | 27 |
| 6. | प्रयत्नो विधेयः (हलन्तशब्दाः - सप्तसु विभक्तिषु) | 33 |
| 7. | धूर्तसंहारः (विशेषणविशेष्यभावः) | 38 |
| 8. | सर्वे कर्मवशाः वयम् (सर्वनामशब्दाः) | 48 |
| 9. | धीरा बाला (सर्वनामशब्दाः) | 56 |
| 10. | गणनां कुर्मः (सङ्ख्यासु लिङ्गभेदः) | 61 |
| 11. | अस्माकं राष्ट्रियदिनदर्शिका (पूरणप्रत्ययान्ताः) | 70 |
| 12. | एकः पापानि कुरुते (चित्-चन-प्रयोगः) | 78 |
| 13. | भ्रातृमेलनम् (आत्मनेपदिनां धातूनां परिचयः - लट्लकारः) | 86 |
| 14. | सर्वे मम बान्धवाः (आत्मनेपदिनः धातवः - लोट्लकारः) | 94 |

www.thearyasamaj.org


| | | |
|---|---|---|
| 15. | सागरतीरविहारः (आत्मनेपदिनः धातवः – लृट्लकारः) | 99 |
| 16. | चिन्तां मा कुरु (सम्भावनार्थे विधिलिङ्लकारः) | 105 |
| 17. | वयं मिलित्वा कार्यं कुर्मः (विध्यर्थे विधिलिङ्लकारः) | 111 |
| 18. | धीरमाता विदुला (आत्मनेपदिनः धातवः – लङ्लकारः विधिलिङ्लकारश्च) | 115 |
| 19. | यदि अध्ययनम् अकरिष्यं तर्हि..... (लृङ्लकारस्य प्रयोगः) | 122 |
| 20. | संस्कृतिः संस्कृताश्रिता (कर्मणिप्रयोगः – वर्तमानकाले) | 130 |
| 21. | त्यक्ताहङ्कारेण भाररहितेन भूयते (भावे प्रयोगः – वर्तमानकाले ) | 141 |
| 22. | जन्तुशाला वीक्ष्यताम् (कर्मणि / भावेप्रयोगः – लोट्लकारः ) | 147 |
| 23. | परेषां दुःखं स्वदुःखम् (कर्मणि / भावेप्रयोगः – लङ्लकारः ) | 154 |
| 24. | अस्माभिः साहाय्यं क्रियेत (कर्मणि / भावेप्रयोगः – लिङ्लकारः ) | 158 |
| 25. | लोकहितं मम करणीयम् (तव्यत्–अनीयर्–प्रत्ययौ) | 162 |
| 26. | किं कारणं भवामि मूर्खः ? (शतृप्रत्ययान्तानां प्रयोगः) | 170 |
| 27. | सर्पाणां कुतः कर्णौ न भवतः ? (शानच्प्रत्ययान्तानां प्रयोगः) | 181 |
| 28. | परिशिष्टम् | 190 |


www.thearyasamaj.org

# अहङ्कारः अनर्थाय

१

उपपदविभक्तयः

एतां कथाम् उच्चैः पठत, अवगच्छत च –



किञ्चन महारण्यम् । तत्र सुन्दरः कश्चन तडागः आसीत् । **तडागं परितः** बहवः वृक्षाः आसन् । **तेषां मध्ये** कश्चन वटवृक्षः आसीत् । तस्य अधः कश्चन मूषकः बिलं निर्माय निवसति स्म । **तस्मात् ऋते** न कोऽपि अन्यः तत्र वसति स्म । एकाकी अपि सः आनन्देन कालं यापयति स्म ।

अथ कदाचित् कश्चन शशः तत्र आगतवान् । सः आनन्देन इतस्ततः कूर्दमानः तृणानि च खादन् विहरति स्म । सः शशः स्वभावेन अतीव अहङ्कारी आसीत् । '**मया सदृशः** कोऽपि न विद्यते' इति तस्य विचारः । अतः एव **स्वस्मात् ऋते** न कमपि सः इच्छति स्म ।

**इतरैः विना** एकाकितया क्रीडन्तं शशं दृष्ट्वा मूषकः नितरां तुष्टः । सः अचिन्तयत् – 'एतत् मम सौभाग्यम् एव । इतःपरम् अहम् **एतेन सह** क्रीडितुं शक्नोमि' इति ।

एकस्मिन् दिने मूषकः धैर्येण **शशं प्रति** अवदत् – ''भोः मित्र ! त्वं कुतः आगतः? **इतःपूर्वं** त्वां न दृष्टवान् एव अर्हति'' इति । शशः तत् अशृण्वन् क्रीडायां व्यापृतः अभवत् । मूषकः पुनः अकथयत् – ''मित्र ! अहमपि **त्वया सह** क्रीडितुम् इच्छामि । मह्यं क्रीडा अतीव रोचते'' इति । तत् श्रुत्वा शशः तस्मै अकुप्यत् । सः रोषेण – ''**अलं कथनेन** । **मया सह** क्रीडितुम् इच्छसि किम् ? त्वं कृष्णवर्णीयः लघुः च असि । श्वेतवर्णीयः अहं यदि **त्वया सह** क्रीडेयं तर्हि मम शरीरमपि कृष्णवर्णीयं भवेत् । **धिक् त्वां, तव दुराग्रहं** च'' इति उक्त्वा मूषकस्य अपेक्षां निराकरोत् । मूषकः दुःखेन स्वबिलं प्राविशत् ।

कानिचन दिनानि अतीतानि । एकदा मूषकः **बिलात् बहिः** निर्गत्य अटन् आसीत् । नातिदूरे शशः अपि क्रीडति स्म । तदा अकस्मात् कुतश्चित् कश्चन सिंहः तत्र आगतः । सिंहात् भीतौ शशमूषकौ प्राणरक्षार्थम् इतस्ततः अधावताम् ।



किन्तु सिंहः स्थूलं श्वेतवर्णीयं च शशं दृष्ट्वा **विना क्लेशं** तं गृहीतवान् । **तस्य पुरतः** एव मूषकः अपि आसीत् । परन्तु सः अतीव लघुः कृशश्च । अतः सः सिंहस्य दृष्टिगोचरः एव न अभवत् ।

अहङ्कारी शशः सिंहेन मारितः । मूषकः भगवन्तं स्मरन् आत्मनः वर्णस्य कृशत्वस्य च विषये समाधानं प्राप्नोत् । **ततःपरं** सुखेन जीवितवान् च ।

www.thearyasamaj.org

## अवधेयम्

भाषाप्रवेशस्य प्रथमभागे वयं सह, विना, पुरतः – इत्यतादृशानां पदानां प्रयोगं ज्ञातवन्तः । तेषां प्रयोगे का विभक्तिः भवति इत्यपि ज्ञातवन्तः । इदानीम् अन्येषां केषाञ्चित् पदानां प्रयोगं जानीयाम । अस्मिन् पाठे तानि पदानि स्थूलाक्षरैः मुद्रितानि सन्ति ।

1. प्रति – विवेकः **ग्रामं प्रति** गतवान् ।
   रमणी **मालतीं प्रति** सङ्केतं कृतवती ।
   पिता **पुत्रं प्रति** अवदत् ।

   *'प्रति' इति पदस्य योगे द्वितीयाविभक्तिः भवति ।*

2. धिक् – **धिक् मन्दबुद्धिम् ।**
   **धिक् त्वाम् ।**
   **धिक् मूर्खाम् ।**

   *'धिक्' इति पदस्य योगे द्वितीयाविभक्तिः भवति ।*

3. अलम् – **अलं भाषणेन ।**
   **अलं रोदनेन ।**
   **अलं भीत्या ।**

   *'अलम्' इति निषेधात्मकं पदम् । तस्य योगे तृतीयाविभक्तिः भवति ।*
   *(सूचना – 'अलम्' इति पर्याप्त्यर्थे अपि प्रयुज्यते, तत्र तु चतुर्थीविभक्तिः एव भवति । उदा – रामः रावणाय अलम् । रामः रावणस्य निग्रहणे समर्थः इत्यर्थः ।)*

4. सदृश – **कालिदासेन सदृशः** कविः अन्यः नास्ति ।
   **चन्द्रेण सदृशं** मुखं सीतायाः ।
   एषा **सावित्र्या सदृशी** साध्वी अस्ति ।

   *तुल्यार्थकस्य सदृशशब्दस्य योगे तृतीयाविभक्तिः भवति ।*
   *(षष्ठीविभक्तिः अपि भवति । उदा – कालिदासस्य सदृशः कविः अन्यः नास्ति ।)*

5. ऋते – **जलात् ऋते** मीनः न जीवति ।
   परम्परायाः **ज्ञानात् ऋते** संस्कृतेः संरक्षणं न भवति ।
   मनुष्यः **विद्यायाः ऋते** पशुतुल्यः भवति ।

   *'ऋते' इति पदस्य योगे पञ्चमीविभक्तिः भवति । (विना इत्यस्य यः अर्थः सः एव अर्थः ऋते इत्यस्यापि ।)*

www.thearyasamaj.org

6. विना – आधुनिककाले **धनं विना** जीवनं कष्टकरम् ।
आधुनिककाले **धनेन विना** जीवनं कष्टकरम् ।
आधुनिककाले **धनात् विना** जीवनं कष्टकरम् ।

*'विना' इति पदस्य योगे द्वितीयाविभक्तिः तृतीयाविभक्तिः च भवतः इति जानीमः । तस्य योगे पञ्चमीविभक्तिः अपि भवतीति विशेषः ।*

7. पूर्व – पर – **लक्ष्मणात् पूर्वः** रामः । **रामात् परः** लक्ष्मणः ।
**मङ्गलवासरात् पूर्वः** सोमवासरः । **सोमवासरात् परः** मङ्गलवासरः ।
**भाद्रपदमासात् पूर्वः** श्रावणमासः । **श्रावणमासात् परः** भाद्रपदमासः ।

*'पूर्व-पर' – इत्येतयोः पदयोः योगे पञ्चमीविभक्तिः भवति ।*

## अभ्यासः

1. उदाहरणानुसारं कोष्ठकस्थैः शब्दैः वाक्यानि रचयत –

क्रोधः, दुःखम्, भीतिः, आलस्यम्, निद्रा, ईर्ष्या, अहङ्कारः, प्रलापः, निन्दा, परिहासः, विवादः, विलापः, घृणा, कोलाहलः, कलहः, तन्द्रा, भयम्, जल्पनम्

रजनी अभ्यासपुस्तके आचार्यस्य उपदेशं लिखति । तस्याः साहाय्यं कुरुत –

आचार्यः उक्तवान् यत्

उदा –

| | |
|---|---|
| 1. अलं क्रोधेन । | 2. ................................ । |
| 3. ................................ । | 4. ................................ । |
| 5. ................................ । | 6. ................................ । |
| 7. ................................ । | 8. ................................ । |
| 9. ................................ । | 10. ................................ । |
| 11. ................................ । | 12. ................................ । |
| 13. ................................ । | 14. ................................ । |
| 15. ................................ । | 16. ................................ । |
| 17. ................................ । | 18. ................................ । |

www.thearyasamaj.org

2. उदाहरणानुगुणं वाक्यानि रचयत –




उदा –

1. स्वाध्यायात् ऋते ज्ञानं न वर्धते।

2. ........................................................................ ।

3. ........................................................................ ।

4. ........................................................................ ।

5. ........................................................................ ।

6. ........................................................................ ।

7. ........................................................................ ।

8. ........................................................................ ।

www.thearyasamaj.org

9. ................................................................ ।
10. ................................................................ ।
11. ................................................................ ।
12. ................................................................ ।
13. ................................................................ ।
14. ................................................................ ।
15. ................................................................ ।

3. उदाहरणं दृष्ट्वा कोष्ठकस्थैः पदैः कः कस्मात् पूर्वः / परः इति लिखत –




उदा – युधिष्ठिरः भीमात् पूर्वः । भीमः युधिष्ठिरात् परः ।

1. ................................... । ................................... ।

2. ................................... । ................................... ।

3. ................................... । ................................... ।

4. ................................... । ................................... ।

5. ................................... । ................................... ।

www.thearyasamaj.org

4. एतत् सुभाषितं सावधानम् उच्चैः पठत –

*धिग्जीवितं शास्त्रकलोज्झितस्य धिग्जीवितं चोद्यमवर्जितस्य ।*
*धिग्जीवितं व्यर्थमनोरथस्य धिग्जीवितं ज्ञातिपराजितस्य ॥*

सुभाषितस्य आधारेण प्रश्नानाम् उत्तराणि लिखत –

प्रश्नः – कस्य कस्य जीवितं धिक् इति सुभाषिते उक्तम् ?

1. ........................................................................... ।
2. ........................................................................... ।
3. ........................................................................... ।
4. ........................................................................... ।

5. 'सदृश'शब्दस्य प्रयोगेण वाक्यानि रचयत –

| | |
|---|---|
| शौर्यम् | शिवराजः |
| पराक्रमः | अभिमन्युः |
| दानम् | कर्णः |
| करुणा | रन्तिदेवः |
| साहसम् | भरतः |
| सत्यवाक्परिपालनम् | हरिश्चन्द्रः |
| प्रयत्नः | भगीरथः |
| न्यायनिष्ठा | श्रीरामः |
| कीर्तिः | कालिदासः |
| क्रीडा | आनन्दः |
| चातुर्यम् | श्रीकृष्णः |

कश्चन बालकः मनसि विचारं करोति –

उदा. अहं शौर्ये **शिवराजेन सदृशः** भविष्यामि ।

1. ..................................................................... ।
2. ..................................................................... ।
3. ..................................................................... ।

www.thearyasamaj.org

4. .................................................................. ।
5. .................................................................. ।
6. .................................................................. ।
7. .................................................................. ।
8. .................................................................. ।
9. .................................................................. ।
10. .................................................................. ।

6. पाठस्य आधारेण प्रश्नानाम् उत्तराणि लिखत –

1. मूषकः कुत्र वसति स्म ?

.................................................................. ।

2. शशः स्वभावेन कीदृशः आसीत् ?

.................................................................. ।

3. शशस्य विचारः कः आसीत् ?

.................................................................. ।

4. मूषकः शशं प्रति किम् अवदत् ?

.................................................................. ।

5. शशः मूषकस्य अपेक्षां किमुक्त्वा निराकरोत् ?

.................................................................. ।

6. सिंहः मूषकं किमर्थं न गृहीतवान् ?

.................................................................. ।

7. मूषकः कस्य कस्य च विषये समाधानं प्राप्नोत् ?

.................................................................. ।

एतां सूक्तिम् उच्चैः पठत –

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

www.thearyasamaj.org

# २ परिचयः

एतत् सम्भाषणम् उच्चैः पठत, अवगच्छत च –

हलन्तपुंलिङ्गशब्दाः
(प्रथमाविभक्तिः)



विश्वजित् – नमस्कारः।

गोस्वामी – नमस्कारः। भवतः **शुभनाम** किम् ?

विश्वजित् – मम नाम **विश्वजित्**। भवतः नाम.......

गोस्वामी – **गोस्वामी**। अहं हरिद्वारस्य **निवासी** अस्मि। **भवान्** किं करोति ?

विश्वजित् – अहं **भिषक्** अस्मि। सर्वकारीये चिकित्सालये सेवां करोमि।

गोस्वामी – समीचीनम्।

विश्वजित् – **श्रीमन्** ! भवान् किं करोति ?

गोस्वामी – अहं **वणिक्** अस्मि। वाणिज्यं करोमि।

विश्वजित् – कीदृशं वाणिज्यम् ?

गोस्वामी – एकः आपणः अस्ति। तत्र **दैनन्दिनोपयोगीनि** सर्वविधवस्तूनि विक्रीयन्ते।

विश्वजित् – भवान् **एकाकी** एव आपणस्य व्यवस्थां निर्वहति किम् ?

गोस्वामी – नैव, तत्र उपविष्टः **उपनेत्रधारी**, एषः **श्वेतवस्त्रधारी** च मम **सुहृदौ**। वयं त्रयः आपणस्य **अंशभागिनः** स्मः। सर्वे सम्भूय व्यवस्थां निर्वहामः।

विश्वजित् – वाणिज्यं कथम् अस्ति ?

गोस्वामी – मम **सुहृदौ परिश्रमिणौ, उत्साहिनौ, अनुभविनौ** च स्तः। वयं त्रयः सम्भूय उत्तमजनसम्पर्कं रक्षामः, क्रेतृभिः सह स्नेहपूर्वकं व्यवहरामः, वाणिज्यक्षेत्रे अनुभविनां वणिजां सहयोगं स्वीकुर्मः। एतेन अस्माकं वाणिज्यं सम्यक् एव प्रवर्तते।

www.thearyasamaj.org

विश्वजित् – **श्रीमन्** ! भवान् कदाचित् अस्माकं चिकित्सालयम् आगच्छतु । तत्र अहं निर्धनानां निश्शुल्कं चिकित्सां करोमि । तत् दृष्ट्वा भवान् सन्तुष्टः भवेत् ।

गोस्वामी – अवश्यम् । अस्माकमपि कश्चन अनाथालयः अस्ति, यत्र पञ्चाशतः जनानां भोजनव्यवस्था कल्पिता अस्ति । एवं दैवप्रेरणया समाजसेवाम् अपि कुर्मः । भवानपि द्रष्टुम् आगन्तुम् अर्हति ।

विश्वजित् – अवश्यम् आगमिष्यामि । भवतः परिचयं प्राप्य मम **महान्** सन्तोषः जातः । भवान् अस्ति **अनुभवशाली वणिक्, आदर्शसमाजसेवी** च ।

गोस्वामी – अयं मम पत्रसङ्केतः । कदाचित् मम गृहम् आगच्छतु भवान् ।

विश्वजित् – धन्यवादः । अस्तु महोदय ! मम अवतरणस्थानकम् आगतम् । अहम् अवतरामि । पुनर्मिलाव ।

गोस्वामी – पुनर्मिलाव ।

सावधानं पठत, अवगच्छत च –

भाषाप्रवेशस्य प्रथमभागे वयं समाजः, आपणः, अनाथालयः – इत्येतादृशान् पुंलिङ्गशब्दान् , व्यवस्था, चिकित्सा, प्रेरणा – इत्येतादृशान् स्त्रीलिङ्गशब्दान्, वाणिज्यं, स्थानकम् – इत्येतादृशान् नपुंसकलिङ्गशब्दान् च ज्ञातवन्तः । अस्मिन् द्वितीयभागे अन्यविधानामपि शब्दानां परिचयं प्राप्नुमः ।

'समाजः' इति शब्दस्य वर्णक्रमः एवम् अस्ति –

स् + अ + म् + आ + ज् + अ + :

अन्येषामपि शब्दानां वर्णक्रमं पश्यत –

| | | |
|---|---|---|
| कविः | – | क् + अ + व् + इ + : |
| गुरुः | – | ग् + उ + र् + उ + : |
| ललिता | – | ल् + अ + ल् + इ + त् + आ |
| भगिनी | – | भ् + अ + ग् + इ + न् + ई |
| पिता | – | प् + इ + त् + आ |
| वनम् | – | व् + अ + न् + अ + म् |
| नगरम् | – | न् + अ + ग् + अ + र् + अ + म् |

www.thearyasamaj.org

'समाजः' इति प्रथमाविभक्तेः एकवचनरूपम् । शब्दस्य मूलं तु 'समाज' इति प्रातिपदिकम् । एवमेव 'कविः' इति प्रथमाविभक्तेः एकवचनरूपम् । शब्दस्य मूलं तु 'कवि' इति प्रातिपदिकम् ।

अग्रे लिखितानां शब्दानां प्रातिपदिकं, प्रथमाविभक्तेः एकवचनरूपं च सावधानतया परिशीलयत –

| प्रातिपदिकम् | प्रथमाविभक्तेः एकवचनरूपम् |
|---|---|
| समाज | समाजः |
| कवि | कविः |
| गुरु | गुरुः |
| ललिता | ललिता |
| भगिनी | भगिनी |
| पितृ | पिता |
| वन | वनम् |
| नगर | नगरम् |

प्रातिपदिकस्य अन्ते यः वर्णः अस्ति, शब्दः तदन्तः भवति ।

यथा – राम – र् + आ + म् + अ

अन्तिमवर्णः 'अ' अस्ति । अतः रामशब्दः 'अ'कारान्तः ।

रवि – र् + अ + व् + इ

अन्तिमवर्णः 'इ'अस्ति । अतः रविशब्दः 'इ'कारान्तः ।

लता – ल् + अ + त् + आ

अन्तिमवर्णः 'आ' अस्ति । अतः लताशब्दः 'आ'कारान्तः ।

भगिनी –भ् + अ + ग् + इ + न् + ई

अन्तिमवर्णः 'ई' अस्ति । अतः भगिनीशब्दः 'ई'कारान्तः ।

पितृ –प् + इ + त् + ऋ ।

अन्तिमवर्णः 'ऋ' अस्ति । अतः पितृशब्दः 'ऋ'कारान्तः ।

www.thearyasamaj.org

## अभ्यासः

1. एतेषां प्रातिपदिकानां वर्णक्रमं लिखित्वा अन्तनिर्णयं कुरुत –

यथा – चन्द्र – च् + अ + न् + द् + र् + अ – 'अ'कारान्तः

मुख – ..........................................................

हरि – ..........................................................

गिरि – ..........................................................

विधि – ..........................................................

भानु – ..........................................................

वायु – ..........................................................

पितृ – ..........................................................

भ्रातृ – ..........................................................

अम्बा – ..........................................................

विनीता – ..........................................................

वाणी – ..........................................................

पत्नी – ..........................................................

मातृ – ..........................................................

स्वसृ – ..........................................................

कार्यकर्तृ – ..........................................................

फल – ..........................................................

पुष्प – ..........................................................

दधि – ..........................................................

वारि – ..........................................................

एतेषु सर्वेषु शब्देषु अन्तिमः वर्णः स्वरः (अ, आ, इ, ई, उ, ऊ, ऋ, लृ, ए, ऐ, ओ, औ) एव अस्ति। स्वराक्षराणाम् 'अच्' इति नाम। अतः एते सर्वे शब्दाः अजन्ताः। (अच् अन्ते यस्य सः अजन्तः।)

अस्मिन् पाठे अस्माभिः पठिताः शब्दाः एतादृशाः सन्ति – भिषक्, वणिक्, एकाकी, विश्वजित्, गोस्वामी, निवासी, श्वेतवस्त्रधारी, महान्, समाजसेवी, उत्साही। एतेषां प्रातिपदिकं वर्णक्रमः च एवं भवति –

www.thearyasamaj.org

| शब्दः | प्रातिपदिकम् | वर्णक्रमः |
|---|---|---|
| भिषक् | भिषज् | भ् + इ + ष् + अ + ज् |
| वणिक् | वणिज् | व् + अ + ण् + इ + ज् |
| एकाकी | एकाकिन् | ए + क् + आ + क् + इ + न् |
| विश्वजित् | विश्वजित् | व् + इ + श् + व् + अ + ज् + इ + त् |
| गोस्वामी | गोस्वामिन् | ग् + ओ + स् + व् + आ + म् + इ + न् |
| निवासी | निवासिन् | न् + इ + व् + आ + स् + इ + न् |
| महान् | महत् | म् + अ + ह् + अ + त् |
| समाजसेवी | समाजसेविन् | स् + अ + म् + आ + ज् + अ + स् + ए + व् +इ + न् |
| उत्साही | उत्साहिन् | उ + त् + स् + आ + ह् + इ + न् |

एतेषु सर्वेषु शब्देषु अन्तिमः वर्णः व्यञ्जनम् (क् .......ह् )एव अस्ति। व्यञ्जनाक्षराणां 'हल्' इति नाम। अतः एते सर्वे शब्दाः हलन्ताः शब्दाः। ( *हल् अन्ते यस्य सः हलन्तः*)

### अवधेयम्

हलन्तशब्दानां बहुवचनरूपं दृष्ट्वा अपि अन्तनिर्धारणं कर्तुं शक्नुमः। यथा –

| प्रातिपदिकम् | एकवचनम् | बहुवचनम् | अन्तः |
|---|---|---|---|
| भिषज् | भिषक् | भिषजः | जकारः |
| विश्वजित् | विश्वजित् | विश्वजितः | तकारः |
| सुहृद् | सुहृत् | सुहृदः | दकारः |
| एकाकिन् | एकाकी | एकाकिनः | नकारः |

www.thearyasamaj.org

2. अधः पदरञ्जिन्यां केचन हलन्तशब्दाः निहिताः सन्ति। तान् एकत्र कुरुत –

**पदरञ्जिनी**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| शु | भि | ष | क् | ✱ | दौ | हृ | सु | आ |
| भ | ✱ | श्वे | त् | णि | नः | ✱ | णौ | द |
| ना | म | जि | त | गि | व | मि | न् | र्श |
| म | श्व | गो | भा | व | श्र | ✱ | म | स |
| वि | स्वा | श | ✱ | रि | स्र | ✱ | श्री | मा |
| मी | अं | उ | प | ने | त्र | धा | री | ज |
| ए | का | की | रा | मा | य | ण | री | से |
| उ | त्सा | हि | नौ | ✱ | न् | हा | म | वी |
| अ | नु | भ | व | शा | ली | व | णि | क् |

1. **भिषक्**
2. ........................
3. ........................
4. ........................
5. ........................
6. ........................
7. ........................
8. ........................
9. ........................
10. ........................
11. ........................
12. ........................
13. ........................
14. ........................
15. ........................
16. ........................

3. हलन्तपुंलिङ्गशब्दानां प्रथमाविभक्तिरूपाणि उदाहरणे दर्शितानि सन्ति। उदाहरणाधारेण अन्येषां शब्दानां प्रथमाविभक्तिरूपाणि लिखत –

| प्रातिपदिकम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सुहृद् | सुहृत् | सुहृदौ | सुहृदः |
| वणिज् | ............. | ............. | ............. |
| ऋत्विज् | ............. | ............. | ............. |
| रणजित् | ............. | ............. | ............. |
| अधिकारिन् | अधिकारी | अधिकारिणौ | अधिकारिणः |
| विद्यार्थिन् | ............. | विद्यार्थिनौ | ............. |
| ज्ञानिन् | ............. | ............. | ............. |
| ज्ञानवत् | ज्ञानवान् | ज्ञानवन्तौ | ज्ञानवन्तः |
| पथिन् | पन्थाः | पन्थानौ | पन्थानः |

www.thearyasamaj.org

एतत् सुभाषितं सावधानतया उच्चैः पठत –

*पापान्निवारयति योजयते हिताय*
*गुह्यं निगूहति गुणान्प्रकटीकरोति।*
*आपद्गतं च न जहाति ददाति काले*
*सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥*

4. कोष्ठके सुहृदः लक्षणानि संगृहीतानि सन्ति। तानि उपयुज्य उदाहरणानुसारं 'सुहृद्'शब्दस्य प्रथमा–विभक्तिरूपयुक्तानि वाक्यानि लिखत –

| **एकवचनवाक्यानि** | | **बहुवचनवाक्यानि** |
|---|---|---|
| उदा. 1. सुहृत् पापात् निवारयति। | 1. पापात् निवारयति। | 1. सुहृदः पापात् निवारयन्ति। |
| 2. ....................... । | 2. हिताय योजयति। | 2. ....................... । |
| 3. ....................... । | 3. गुह्यं निगूहति। | 3. ....................... । |
| 4. ....................... । | 4. गुणान् प्रकटीकरोति। | 4. ....................... । |
| 5. ....................... । | 5. आपद्गतं न जहाति। | 5. ................ जहति। |
| 6. ....................... । | 6. काले ददाति। | 6. ................ ददति। |

5. एतं श्लोकं सावधानतया उच्चैः पठत –

**नागुणी** गुणिनं वेत्ति **गुणी** गुणिषु **मत्सरी**।
**गुणी** च **गुणरागी** च विरलः सरलो जनः ॥

श्लोके स्थूलाक्षरैः लिखितान् शब्दान् अधः लिखत –

1. ........... 2. ............ 3. ............ 4. ............ 5. ............

6. श्लोकस्य आधारेण प्रश्नानाम् उत्तराणि लिखत –

1. गुणिनं कः न वेत्ति ?

   ............................................................ ।

2. गुणी गुणिषु कीदृशः भवति ?

   ............................................................ ।

3. कीदृशः जनः विरलः सरलश्च भवति ?

   ............................................................ ।

सूक्तिः – महाजनो येन गतः स पन्थाः।

www.thearyasamaj.org

# वर्षाकालः ३

हलन्तस्त्रीलिङ्ग–नपुंसकलिङ्गशब्दाः
(प्रथमाविभक्तिः)

एतं पाठम् उच्चैः पठत, अवगच्छत च –



ग्रीष्मकालस्य अनन्तरं वर्षाकालः आगच्छति । आकाशे सूर्यम् आच्छाद्य मेघमालाः इतस्ततः विहरन्ति । तदा कृषकाणां **मनांसि** संहृष्टानि भवन्ति । यदा वृष्टिः भवति तदा भगवतः **आशिषः** इव जलबिन्दवः भुवि निपतन्ति । वियति **तडितः** प्रकाशन्ते । मेघाः नितरां गर्जन्ति । दिक्षु विदिक्षु उत्पन्नं प्रकम्पनम् अनुभवैकवेद्यं भवति । तदा मयूराः केकारवं कुर्वन्तः मुदा नृत्यन्ति । **सरितः सरांसि** च नवाम्भसा पूर्णानि भवन्ति । बालाः वृष्टिजले महता उत्साहेन क्रीडारताः भवन्ति । यदा आकाशे **इन्द्रधनुः** प्रत्यक्षं भवति तदा तेषां **चक्षूंषि** प्रकाशितानि भवन्ति । **मनांसि** च हर्षेण प्रफुल्लानि भवन्ति । कृषकाः क्षेत्राणि कृष्ट्वा बीजानि वपन्ति । क्रमेण **सस्यसम्पद्** वर्धते ।

परं यदा अतिवृष्टिः भवति तदा महती **विपद्** सञ्जायते । सरितां तीरेषु विद्यमानानि लघूनि गृहाणि जले निमग्नानि भवन्ति । **पशुपक्षिणः**, लघवः **प्राणिनः** च म्रियन्ते । एवमेव अनावृष्ट्या अपि **आपदः** सम्भवन्ति । तदा जलस्य अभावेन **सरितः** शुष्यन्ति । वृक्षाः विनश्यन्ति । **कृषिकर्म** असाध्यं भवति । कृषिं विना धान्योत्पत्तिः एव न भवति । प्राणधारणवस्तूनाम् अभावेन जनाः क्लेशम् अनुभवन्ति । क्रमशः जीवनम् एव दुस्सहं भवति ।

अतिवृष्टेः अनावृष्टेः च मूलं मानवः एव । घनविपिनानाम् अनियन्त्रितनाशनेन पर्यावरणम् असन्तुलितं भवति । यन्त्रागारेभ्यः निस्सरतां विषमयपदार्थानां मेलनेन **जलस्रोतांसि** प्रदूषितानि भवन्ति । पर्यावरणप्रदूषणेन ऋतूनां गतिविगतयः परिवर्तिताः भवन्ति । तेन समग्रमपि **जगत्** परिवर्तते ।

अतः पर्यावरणसंरक्षणे वयं बद्धादराः भवेम ।

www.thearyasamaj.org

पठत, अवगच्छत च –

| प्रातिपदिकम् | एकवचनम् | द्विवचनम् | बहुवचनम् | अन्तः |
| --- | --- | --- | --- | --- |
| वाच् (स्त्री.) | वाक् | वाचौ | वाचः | चकारान्तः |
| सरित् (स्त्री.) | सरित् | सरितौ | सरितः | तकारान्तः |
| तडित् (स्त्री.) | तडित् | तडितौ | तडितः | तकारान्तः |
| विद्युत् (स्त्री.) | विद्युत् | विद्युतौ | विद्युतः | तकारान्तः |
| जगत् (नपुं.) | जगत् | जगती | जगन्ति | तकारान्तः |
| वियत् (नपुं.) | वियत् | वियती | वियन्ति | तकारान्तः |
| विपद् (स्त्री.) | विपद् –त् | विपदौ | विपदः | दकारान्तः |
| आपद् (स्त्री.) | आपद् –त् | आपदौ | आपदः | दकारान्तः |
| सम्पद् (स्त्री.) | सम्पद् –त् | सम्पदौ | सम्पदः | दकारान्तः |
| परिषद् (स्त्री.) | परिषद् –त् | परिषदौ | परिषदः | दकारान्तः |
| नामन् (नपुं.) | नाम | नामनी | नामानि | नकारान्तः |
| कर्मन् (नपुं.) | कर्म | कर्मणी | कर्माणि | नकारान्तः |
| दिश् (स्त्री.) | दिक् | दिशौ | दिशः | शकारान्तः |
| आशिष् (स्त्री.) | आशीः | आशिषौ | आशिषः | षकारान्तः |
| धनुष् (नपुं.) | धनुः | धनुषी | धनूंषि | षकारान्तः |
| चक्षुष् (नपुं.) | चक्षुः | चक्षुषी | चक्षूंषि | षकारान्तः |
| मनस् (नपुं.) | मनः | मनसी | मनांसि | सकारान्तः |
| सरस् (नपुं.) | सरः | सरसी | सरांसि | सकारान्तः |
| स्रोतस् (नपुं.) | स्रोतः | स्रोतसी | स्रोतांसि | सकारान्तः |

www.thearyasamaj.org

## अभ्यासः

1. रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | जगत् | जगती | ............. |
| 2. | आशीः | ............. | आशिषः |
| 3. | ............. | आपदौ | ............. |
| 4. | ............. | ............. | नामानि |
| 5. | चक्षुः | ............. | ............. |
| 6. | ............. | विद्युतौ | विद्युतः |
| 7. | दिक् | ............. | दिशः |
| 8. | त्वक् | त्वचौ | ............. |
| 9. | ............. | ............. | मनांसि |
| 10. | सम्पद् | ............. | ............. |
| 11. | ............. | वियती | ............. |
| 12. | ............. | ............. | सरितः |

2. आवरणे दत्तानां प्रातिपदिकानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत –

उदा. **सरितौ** (सरित्) प्रवहतः।

1. वासुदेवः इति कृष्णस्य अन्यत् ............. । (नामन्)
2. राष्ट्रे अमूल्याः ............. (सम्पद्) वर्तन्ते।
3. आश्रमे ............... (समिध्) सन्ति।
4. मनुष्यस्य ............... (आयुस्) प्रायः शतं वर्षाणि।
5. दाल्नामकं ................ (सरस्) जम्मूनगरे अस्ति।
6. गुरोः ................ (आशिष् ) सन्तु।
7. महापुरुषाणां ............... (वाच्) मधुरा भवति।
8. शिवस्य त्रीणि .............. (चक्षुष्) सन्ति।

www.thearyasamaj.org

## 3. पाठस्य आधारेण एतेषां प्रश्नानाम् उत्तराणि लिखत –

1. कानि नवाम्भसा पूर्णानि भवन्ति ?

   ........................................................................................ ।

2. अनावृष्ट्या काः सम्भवन्ति ?

   ........................................................................................ ।

3. पर्यावरणप्रदूषणेन किं परिवर्तते ?

   ........................................................................................ ।

4. जलस्य अभावेन काः शुष्यन्ति ?

   ........................................................................................ ।

5. वियति काः प्रकाशन्ते ?

   ........................................................................................ ।

6. अतिवृष्ट्या किं सञ्जायते ?

   ........................................................................................ ।

7. विषमयपदार्थानां मेलनेन कानि प्रदूषितानि भवन्ति ?

   ........................................................................................ ।

8. बीजानां वपनेन का वर्धते ?

   ........................................................................................ ।

9. जलबिन्दवः भुवि कथं निपतन्ति ?

   ........................................................................................ ।

10. अनावृष्ट्या किम् असाध्यं भवति ?

   ........................................................................................ ।

## 4. उदाहरणानुसारं रेखालेखनेन उचितं शब्दत्रयं योजयत –

| प्रातिपदिकम् | बहुवचनरूपम् | अन्तः |
|---|---|---|
| आशिष् | सरितः | षकारान्तः |
| दिश् | सम्पदः | शकारान्तः |
| सरित् | आपदः | चकारान्तः |
| सम्पद् | आशिषः | दकारान्तः |
| वाक् | दिशः | तकारान्तः |
| आपद् | वाचः | दकारान्तः |

www.thearyasamaj.org

एतौ श्लोकौ उच्चैः पठत –

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥

एका वापी दशकूपैः समा भवति । एकः ह्रदः दशवापीभिः समः भवति । एकः पुत्रः दशह्रदैः समः भवति । किन्तु एकः वृक्षः तादृशैः दशपुत्रैः समः भवति ।

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ॥

उचिते काले वृष्टिः भवतु । भूमिः सस्यशालिनी भवतु । देशे कोऽपि क्षोभः मा भवतु । सज्जनाः निर्भयाः भवन्तु ।

सूक्तिः – हितं मनोहारि च दुर्लभं वचः ।

विशेषः

### अमरकोषः

संस्कृतस्य कोषसाहित्यम् अतिविपुलं महत्तरं च । अमरकोषः, मेदिनीकोषः, एकाक्षरकोषः, यादवकोषः, राजनिघण्टुः, वैजयन्तीकोषः इत्यादयः बहवः कोषग्रन्थाः अद्य उपलभ्यन्ते । एतेषु सर्वादरणीयः सर्वसम्मतश्च भवति अमरसिंहविरचितः 'नामलिङ्गानुशासनं' नाम कोषः । अमरकोषः इत्येव अस्य प्रसिद्धिः । पद्यमये अस्मिन् कोषे त्रीणि काण्डानि 25 वर्गाश्च सन्ति ।

अमरकोषस्य कानिचित् पद्यानि अत्र दीयन्ते –

1) शम्पाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ।
तडित्सौदामनी विद्युच्चञ्चला चपला अपि ॥

शम्पा, शतह्रदा, ह्रादिनी, ऐरावती, क्षणप्रभा, तडित्, सौदामनी, विद्युत्, चञ्चला, चपला – इति 10 नामानि विद्युतः ।

2) अथ नदी सरित्
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगा ॥

नदी, सरित्, तरङ्गिणी, शैवलिनी, तटिनी, ह्रादिनी, धुनी, स्रोतस्विनी, द्वीपवती, स्रवन्ती, निम्नगा, आपगा – इति 12 नामानि नद्याः । एते सर्वेऽपि स्त्रीलिङ्गशब्दाः ।

www.thearyasamaj.org

# ४ सोत्साहानां नास्त्यसाध्यम्

हलन्तशब्दाः
(द्वितीया–तृतीया–चतुर्थीविभक्तयः)



एतां कथाम् उच्चैः पठत, अवगच्छत च –

पुरा आन्ध्रप्रदेशे देवशर्मा नाम कश्चन धीमान् ब्राह्मणः आसीत् । तस्य एकः एव पुत्रः । देवशर्मा पुत्रस्य मल्लिनाथः इति नाम कृतवान् । पिता सर्वशास्त्रविद् विद्वान् च आसीत् । किन्तु पुत्रः मल्लिनाथः तु अलसः निरक्षरश्च । पुत्रं कथमपि **बुद्धिमन्तं**, **शास्त्रविद्वांसं** च कर्तुं देवशर्मा **महान्तं** प्रयासं कृतवान् । पुत्रं पाठयितुम् अन्यान् **विदुषः** नियोजितवान् अपि । तथापि मल्लिनाथः किमपि नैव अधीतवान् ।

कालः गतः । मल्लिनाथः **वयसा वपुषा** च युवा सञ्जातः । कयाचित् विदुष्या कन्यया सह तस्य विवाहः प्रवृत्तः ।

एकदा मल्लिनाथः श्वशुरगृहं गन्तुम् उद्युक्तः आसीत् । तदा तस्य पिता '**शास्त्रविद्भिः** श्यालैः मूर्खः मम पुत्रः उपहसितः भविष्यति' इति विचार्य तं बहुधा उपदिष्टवान् । ततः मल्लिनाथः श्वशुरगृहं प्राप्नोत् । तत्र द्वित्रैः दिनैः एव श्यालैः ज्ञातं यत् आवुत्तः निरक्षरः अस्ति इति । ते **कठोरवाग्भिः** मल्लिनाथं परिहसितवन्तः । तेषां **परिहासवचांसि** श्रोतुम् अशक्ता मल्लिनाथस्य पत्नी पत्या सह स्वगृहं प्रति प्रस्थितवती ।

मार्गमध्ये कुत्रचित् मल्लिनाथः **पन्थानम्** उभयतः स्थितान् **पलाशशाखिनः** दृष्टवान् । तेषु मनोहराणि पुष्पाणि विकसितानि आसन् । तानि दृष्ट्वा सः नितरां तुष्टः अभवत् । पुष्पदर्शनेन तुष्टं पतिं पत्नी उक्तवती – ''आं, पलाशकुसुमं मनोहारि एव । परम् **अविद्यावन्तं भवन्तं** यथा तथैव निर्गन्धम् इदं पलाशपुष्पमपि जनाः निष्प्रयोजनं मन्यन्ते'' इति । पत्न्याः तया **वाचा** मल्लिनाथः जागरितः अभवत् । स्वस्य अज्ञानविषये सः लज्जाम् अन्वभवत् । ततः सः **शास्त्रसम्पदं** कथमपि उपार्जितुं **मनसा** निश्चितवान् । पत्नीं स्वगृहं प्रापय्य ज्ञानार्जनाय वाराणसीम् अगच्छत् च ।

मल्लिनाथः तत्र कञ्चित् **यशस्विनं, सर्वशास्त्रविदं** पण्डितम् उपगत्य **आत्मानं** शिक्षितुम् अयाचत । तस्य विनयेन, सौम्यया **वाचा** च आकृष्टः सः करुणार्द्रमनाः पण्डितः तं स्वगृहं नीत्वा पाठयितुम् आरब्धवान् । ''प्रतिदिनं भवती भोजने तस्मै किञ्चित् निम्बतैलम् अपि परिवेषयतु । यस्मिन्

www.thearyasamaj.org

दिने सः निम्बतैलस्य तिक्तत्वम् अनुभवति तदा मां सूचयतु'' इति सः पत्नीम् आदिशत् । सा तथैव कृतवती । अध्ययने एव दत्तचित्तः मल्लिनाथः कदापि भोजने रुचिं न लक्षितवान् ।

मल्लिनाथः **महान्तं** कालं तत्र यापितवान् । वेदान् , **उपनिषदः**, इतरशास्त्राणि च **महता** परिश्रमेण अधीतवान् । एकदा सः गुरुपत्नीं पृष्टवान् – ''अम्ब ! अद्य भोजने कथमपि निम्बतैलं पतितम् अस्ति इति प्रतीयते । कथम् एतत् सञ्जातम् ?'' इति । ततः सः भोजनं परिसमाप्य गतवान् ।

गुरुपत्नी सर्वं वृत्तान्तं पतिं न्यवेदयत् । सः नितरां तुष्टः अभवत् । सः मल्लिनाथम् आहूय – ''वत्स ! अद्य तव अध्ययनं समाप्तिं गतम् । वस्तुतः प्रतिदिनमपि तव भोजने निम्बतैलं परिविष्टम् । परन्तु अध्ययने एव दत्तचित्तः त्वं भोजनस्य रुचिम् एव न लक्षितवान्, एतावन्ति वर्षाणि । तादृशी अध्ययनमग्नता आसीत् तव । त्वम् अद्य पण्डितः असि । त्वां सर्वे अङ्गीकुर्वन्ति । विद्यार्जनाय, **यशसे** च बहवः विद्यार्थिनः त्वाम् उपगमिष्यन्ति । इतःपरं त्वं स्वगृहं गन्तुम् अर्हसि'' इति उक्तवान् ।

मल्लिनाथः **महान्तम्** आनन्दम् अनुभूतवान् । सः तस्मै **महाज्ञानिने** गुरवे दक्षिणां प्रदाय ततः **आशिषः** च लब्ध्वा प्रतिनिवृत्तः । ततः सः **विविधशास्त्रविदः** बहून् **विदुषः** वादे पराजित्य पारितोषिकाणि प्राप्य श्वशुरगृहं गतवान् । श्यालान् श्वशुरं चापि पराजित्य पत्न्या सह सुखेन जीवनं यापितवान् ।

गच्छता कालेन सः बहून् ग्रन्थान् रचितवान् । अयमेव मल्लिनाथः कालिदासस्य कृतीनां पञ्चमहाकाव्यानां च टीकाः अरचयत् ।

सोत्साहानां नास्त्यसाध्यं नराणाम् ।

पठत, अवगच्छत च –

**पुंलिङ्गशब्दाः**

| | बुद्धिमत् (तकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | बुद्धिमन्तं | बुद्धिमन्तौ | बुद्धिमतः |
| *तृतीयाविभक्तिः* | बुद्धिमता | बुद्धिमद्भ्याम् | बुद्धिमद्भिः |
| *चतुर्थीविभक्तिः* | बुद्धिमते | बुद्धिमद्भ्याम् | बुद्धिमद्भ्यः |

| | पथिन् (नकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | पन्थानम् | पन्थानौ | पथः |
| *तृतीयाविभक्तिः* | पथा | पथिभ्याम् | पथिभिः |
| *चतुर्थीविभक्तिः* | पथे | पथिभ्याम् | पथिभ्यः |

www.thearyasamaj.org

| | आत्मन् (नकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | आत्मानम् | आत्मानौ | आत्मनः |
| *तृतीयाविभक्तिः* | आत्मना | आत्मभ्याम् | आत्मभिः |
| *चतुर्थीविभक्तिः* | आत्मने | आत्मभ्याम् | आत्मभ्यः |

| | यशस्विन् (नकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | यशस्विनम् | यशस्विनौ | यशस्विनः |
| *तृतीयाविभक्तिः* | यशस्विना | यशस्विभ्याम् | यशस्विभिः |
| *चतुर्थीविभक्तिः* | यशस्विने | यशस्विभ्याम् | यशस्विभ्यः |

| | विद्वस् (सकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | विद्वांसम् | विद्वांसौ | विदुषः |
| *तृतीयाविभक्तिः* | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| *चतुर्थीविभक्तिः* | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |

## स्त्रीलिङ्गशब्दाः

| | सम्पद् (दकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | सम्पदम् | सम्पदौ | सम्पदः |
| *तृतीयाविभक्तिः* | सम्पदा | सम्पद्भ्याम् | सम्पद्भिः |
| *चतुर्थीविभक्तिः* | सम्पदे | सम्पद्भ्याम् | सम्पद्भ्यः |

| | वाच् (चकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | वाचम् | वाचौ | वाचः |
| *तृतीयाविभक्तिः* | वाचा | वाग्भ्याम् | वाग्भिः |
| *चतुर्थीविभक्तिः* | वाचे | वाग्भ्याम् | वाग्भ्यः |

| | आशिष् (षकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | आशिषम् | आशिषौ | आशिषः |
| *तृतीयाविभक्तिः* | आशिषा | आशीर्भ्याम् | आशीर्भिः |
| *चतुर्थीविभक्तिः* | आशिषे | आशीर्भ्याम् | आशीर्भ्यः |

www.thearyasamaj.org

## नपुंसकलिङ्गशब्दाः

| | मनस् (सकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | मनः | मनसी | मनांसि |
| *तृतीयाविभक्तिः* | मनसा | मनोभ्याम् | मनोभिः |
| *चतुर्थीविभक्तिः* | मनसे | मनोभ्याम् | मनोभ्यः |

| | वपुष् (षकारान्तः) | | |
|---|---|---|---|
| *द्वितीयाविभक्तिः* | वपुः | वपुषी | वपूंषि |
| *तृतीयाविभक्तिः* | वपुषा | वपुर्भ्याम् | वपुर्भिः |
| *चतुर्थीविभक्तिः* | वपुषे | वपुर्भ्याम् | वपुर्भ्यः |

### अभ्यासः

1. उदाहरणानुसारं रिक्तस्थानानि पूरयत –

| | प्रातिपदिकम् | विभक्तिः, वचनम् |
|---|---|---|
| उदा – बुद्धिमन्तम् | बुद्धिमत् | (द्वितीयाविभक्तिः, एकवचनम्) |
| 1. महान्तम् | ................ | ................................ |
| 2. अविद्यावन्तम् | ................ | ................................ |
| 3. विदुषः | ................ | ................................ |
| 4. पन्थानम् | ................ | ................................ |
| 5. शास्त्रविद्भिः | शास्त्रविद् | ................................ |
| 6. आत्मानः | ................ | ................................ |
| 7. सम्पदः | ................ | ................................ |
| 8. वाचम् | ................ | ................................ |
| 9. महता | ................ | ................................ |
| 10. आशिषा | आशिष् | |
| 11. वाग्भिः | ................ | ................................ |
| 12. यशसे | ................ | ................................ |

www.thearyasamaj.org

2. क्रमेण एकवचन-द्विवचन-बहुवचनरूपैः रिक्तस्थानानि पूरयत -

| प्रातिपदिकम् | ए.व. | द्वि.व. | ब.व. | |
|---|---|---|---|---|
| उदा- सम्पद् | सम्पदम् | सम्पदौ | सम्पदः | (सम्पदः /सम्पदम् / सम्पदौ) |
| 1. महत् | ........... | ........... | ........... | (महान्तौ / .......... /..........) |
| 2. यशस्विन् | ........... | ........... | ........... | (यशस्विनम् / यशस्विनः /........) |
| 3. आत्मन् | ........... | ........... | ........... | (आत्मानम् / ......... / .........) |
| 4. वाच् | ........... | ........... | ........... | (वाग्भ्याम् / वाचा /..............) |
| 5. महत् | ........... | ........... | ........... | (महता / महद्भ्यः /.............) |
| 6. शास्त्रविद् | ........... | ........... | ........... | (शास्त्रविदा / ......... / ........) |
| 7. विपद् | ........... | ........... | ........... | (विपदे /............ / .........) |
| 8. शाखिन् | ........... | ........... | ........... | (........ / शाखिभिः / ..........) |
| 9. ज्ञानिन् | ........... | ........... | ........... | (........... /.......... / ज्ञानिने) |
| 10. विद्वस् | ........... | ........... | ........... | (विदुषः/............ /...........) |
| 11. वपुष् | ........... | ........... | ........... | (वपुर्भिः/............ /..........) |

3. रेखाङ्कितशब्दानां समानार्थकशब्दान् पाठभागात् चित्वा लिखत -

1. पिता सर्वशास्त्रनिपुणः पण्डितः च आसीत्।

   ........................................................................ ।

2. बुद्धियुक्तं शास्त्रविज्ञं च कर्तुम् अधिकं प्रयासं कृतवान्।

   ........................................................................ ।

3. तं पाठयितुम् अन्यान् पण्डितान् नियोजितवान्।

   ........................................................................ ।

4. मल्लिनाथः वयसा शरीरेण च युवा सञ्जातः।

   ........................................................................।

www.thearyasamaj.org

5. <u>शास्त्रविज्ञैः</u> श्यालैः मम पुत्रः उपहसितः भविष्यति।

..........................................................................।

6. <u>परिहासवचनानि</u> श्रोतुम् अशक्ता सा स्वगृहं प्रति प्रस्थितवती।

..........................................................................।

7. सः <u>मार्गम्</u> उभयतः <u>पलाशवृक्षान्</u> अपश्यत्।

..........................................................................।

8. यशोयुक्तं सर्वशास्त्रनिपुणं पण्डितम् उपगत्य <u>स्वं</u> शिक्षितुम् अयाचत।

..........................................................................।

9. पत्न्याः <u>वाण्या</u> मल्लिनाथः जागरितः अभवत्।

..........................................................................।

10. सः <u>महापण्डिताय</u> गुरवे दक्षिणां प्रदाय प्रतिनिवृत्तः।

..........................................................................।

4. एतेषां प्रश्नानाम् उत्तराणि लिखत –

1. मल्लिनाथः कस्य पुत्रः आसीत् ?

..........................................................................।

2. पलाशपुष्पदर्शनेन तुष्टं मल्लिनाथं पत्नी किम् उक्तवती ?

..........................................................................।

3. मल्लिनाथः अध्ययनार्थं कुत्र गतवान् ?

..........................................................................।

4. मल्लिनाथः कथं जागरितः अभवत् ?

..........................................................................।

5. मल्लिनाथः केषां टीकाः रचितवान् ?

..........................................................................।

www.thearyasamaj.org

5. कोष्ठकात् उचितं पदं चित्वा उचितां विभक्तिं योजयित्वा रिक्तस्थानं पूरयत –

| |
|---|
| मनः, विपद् , महत् , आशीः, वाक् , सुहृद् , पन्थाः, विद्वान् , कर्म, सुखी, तडित् |

उदा – आकाशः **तडिता** शोभते ।

1. ................... सर्वे पूजयन्ति ।
2. लोकाः समस्ताः ................... भवन्तु ।
3. बालिका ................... परिश्रमेण जितवती ।
4. उत्तमजनः कदापि आपत्काले ................... न परित्यजति ।
5. ................... यः साहाय्यं करोति सः एव यथार्थबन्धुः ।
6. अस्माकं ................... मधुराः भवन्तु ।
7. गुरुः शिष्यान् ................... अनुगृहीतवान् ।
8. वयं सर्वदा महात्मनां ................... अनुसरामः ।
9. ................... चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
10. मानवाः ................... एव सिद्धिं प्राप्नुवन्ति ।

सूक्तिः – उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

**अमरकोषः** 3) ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥

ब्राह्मी, भारती, भाषा, गीः, वाग्, वाणी, सरस्वती, व्याहारः, उक्तिः, लपितं, भाषितं, वचनं, वचः – इति 13 नामानि भाषायाः ।

4) विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ।
धीरो मनिषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः ॥
धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।
दूरदर्शी दीर्घदर्शी श्रोत्रियश्छान्दसौ समौ ॥

विद्वान्, विपश्चित्, दोषज्ञः, सन्, सुधीः, कोविदः, बुधः, धीरः, मनिषी, ज्ञः, प्राज्ञः, संख्यावान्, पण्डितः, कविः, धीमान्, सूरिः, कृती, कृष्टिः, लब्धवर्णः, विचक्षणः, दूरदर्शी, दीर्घदर्शी – इत्येतानि 22 नामानि पण्डितस्य ।

www.thearyasamaj.org

# विपदि भवेत् धैर्यम्

५



हलन्तशब्दाः
(पञ्चमी–षष्ठी–सप्तमीविभक्तयः)

(नद्यां निमज्जतोः बालयोः प्राणरक्षणं कृतवतः छात्रस्य सत्यजितः सम्माननसमारम्भः प्रवर्तमानः अस्ति। दूरदर्शनेन प्रसार्यमाणः सः कार्यक्रमः एवम् अस्ति। एतम् उच्चैः पठत, अवगच्छत च।)

अध्यक्षः – सर्वेभ्यः नमः।

**महत्यां विपदि** समागतायाम् **आत्मनः** प्राणान् तृणीकृत्य **सरितः** जले निमज्जन्तौ बालकौ **रक्षितवतः सत्यजितः** सम्माननाय वयम् अस्यां **संसदि** समागताः स्मः।

अयं धीरः बालकः **प्रधानमन्त्रिणः मुख्यमन्त्रिणः** च धीरतापुरस्कारान् प्राप्तवान् अस्ति। एतत् अस्माकं सर्वेषाम् अभिमानास्पदम् अस्ति। एतादृशानां **विवेकिनां, धीमतां, धैर्यवतां** बालानां द्वारा एव देशस्य यशः **जगति** प्रसृतं भविष्यति। प्रवृत्तां घटनां **सत्यजितः** मुखात् एव वयम् इदानीं श्रोष्यामः।

सत्यजित् – सर्वेषां **विदुषां** चरणकमलयोः मम नमस्काराः।

तस्मिन् दिने विरामः आसीत्। अतः अहं क्रीडितुं **सुहृदां** दर्शनाय स्वगृहतः गच्छन् आसम्। **सरितः** तीरेण **गच्छतः** मम **मनसि** 'कञ्चित् कालं **सरिति** तरामि। तदनन्तरं **सुहृदां** दर्शनाय गच्छामि' इति विचारः उत्पन्नः। तरणार्थम् उद्युक्तः अहं किञ्चिदग्रे कस्यचित् तरोः अधः कानिचन वस्त्राणि दृष्टवान्। अहं परितः अवलोकितवान्। परन्तु न कोऽपि तत्र आसीत्। पुनरपि **सरिति** दृष्टिं प्रसारितवान् अहं किञ्चिदग्रे **सरितः** प्रवाहे मज्जन्तौ बालकौ दृष्टवान्। निमेषं यावत् स्तब्धः अभवम्। ततः **सरितः** गभीरतां, **विपदः** कठिनताम्, **आत्मनः** दौर्बल्यं च विस्मृत्य अहं **सरिति** कूर्दितवान्। शीघ्रं तीर्त्वा एकं बालकं

www.thearyasamaj.org

**शिरसि** गृहीतवान्। तथा अपरं बालकम् **आत्मनः** स्कन्धे कृत्वा समग्रां शक्तिं संहृत्य अहं कथमपि **सरितः** तीरम् आगतवान्। यावत् तीरं प्राप्नवं तावता मम बोधः विनष्टः आसीत्। जागरितः अहम् उच्चैः आक्रोश्य सर्वान् आहूतवान्। ये **विपदि** पतिताः भवन्ति ते केऽपि वा भवन्तु, रक्षणीयाः एव। तत्र **आपदः** काठिन्यम् **आत्मनः** हितं वा यदि चिन्तयामः तर्हि पश्चात् दुःखम् अनुभोक्तव्यं भवति इति मम विश्वासः। धन्यवादः।

अध्यक्षः – इदानीं **सत्यजितः** सम्माननं करोति अस्य नगरस्य **भिषजां** प्रमुखः नरेन्द्रमहोदयः।

नरेन्द्रः – **सत्यजितः** मुखात् एव सर्वं वयं श्रुतवन्तः। कस्यापि जनस्य महत्त्वं **वाचः** माधुर्येण **सम्पदः** राशिना वा न, अपि तु **कर्मणः** प्रभावेण एव सिध्यति। **विवेकिनः, प्रतिभाशालिनः गुणिनः** अस्य बालस्य चरितं सर्वेषाम् आदर्शः भवतु। धन्यवादः।

पठत अवगच्छत च –

पुंलिङ्गशब्दाः

धीमत् (तकारान्तः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | धीमतः | धीमद्भ्याम् | धीमद्भ्यः |
| *षष्ठीविभक्तिः* | धीमतः | धीमतोः | धीमताम् |
| *सप्तमीविभक्तिः* | धीमति | धीमतोः | धीमत्सु |

गुणिन् (नकारान्तः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | गुणिनः | गुणिभ्याम् | गुणिभ्यः |
| *षष्ठीविभक्तिः* | गुणिनः | गुणिनोः | गुणिनाम् |
| *सप्तमीविभक्तिः* | गुणिनि | गुणिनोः | गुणिषु |

सुहृद् (दकारान्तः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | सुहृदः | सुहृद्भ्याम् | सुहृद्भ्यः |
| *षष्ठीविभक्तिः* | सुहृदः | सुहृदोः | सुहृदाम् |
| *सप्तमीविभक्तिः* | सुहृदि | सुहृदोः | सुहृत्सु |

www.thearyasamaj.org

| विद्वस् (सकारान्तः) | | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| *षष्ठीविभक्तिः* | विदुषः | विदुषोः | विदुषाम् |
| *सप्तमीविभक्तिः* | विदुषि | विदुषोः | विद्वत्सु |

स्त्रीलिङ्गशब्दाः

| विपद् (दकारान्तः) | | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | विपदः | विपद्भ्याम् | विपद्भ्यः |
| *षष्ठीविभक्तिः* | विपदः | विपदोः | विपदाम् |
| *सप्तमीविभक्तिः* | विपदि | विपदोः | विपत्सु |

| सरित् (तकारान्तः) | | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| *षष्ठीविभक्तिः* | सरितः | सरितोः | सरिताम् |
| *सप्तमीविभक्तिः* | सरिति | सरितोः | सरित्सु |

| वाच् (चकारान्तः) | | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | वाचः | वाग्भ्याम् | वाग्भ्यः |
| *षष्ठीविभक्तिः* | वाचः | वाचोः | वाचाम् |
| *सप्तमीविभक्तिः* | वाचि | वाचोः | वाक्षु |

नपुंसकलिङ्गशब्दाः

| जगत् (तकारान्तः) | | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | जगतः | जगद्भ्याम् | जगद्भ्यः |
| *षष्ठीविभक्तिः* | जगतः | जगतोः | जगताम् |
| *सप्तमीविभक्तिः* | जगति | जगतोः | जगत्सु |

www.thearyasamaj.org

| | वपुष् (षकारान्तः) | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | वपुषः | वपुर्भ्याम् | वपुर्भ्यः |
| *षष्ठीविभक्तिः* | वपुषः | वपुषोः | वपुषाम् |
| *सप्तमीविभक्तिः* | वपुषि | वपुषोः | वपुष्षु |

| | शिरस् (सकारान्तः) | | |
|---|---|---|---|
| *पञ्चमीविभक्तिः* | शिरसः. | शिरोभ्याम् | शिरोभ्यः |
| *षष्ठीविभक्तिः* | शिरसः. | शिरसोः | शिरसाम् |
| *सप्तमीविभक्तिः* | शिरसि | शिरसोः | शिरस्सु |

## अभ्यासः

1. निर्देशानुसारं लिखत –

| | | प्रातिपदिकम् | एवं परिवर्तयत । | |
|---|---|---|---|---|
| उदा. | धीमतः | धीमत् | पञ्चमीविभक्तिः, बहुवचनम् | धीमद्भ्यः |
| 1. | गुणिभ्याम् | ............ | पञ्चमीविभक्तिः, एकवचनम् | ................ |
| 2. | विवेकिनाम् | विवेकिन् | षष्ठीविभक्तिः, एकवचनम् | ................ |
| 3. | मन्त्रिणि | ............ | सप्तमीविभक्तिः, द्विवचनम् | ................ |
| 4. | आत्मनः | ............ | षष्ठीविभक्तिः, बहुवचनम् | ................ |
| 5. | सुहृदि | ............ | पञ्चमीविभक्ति :, बहुवचनम् | ................ |
| 6. | विपदः | ............ | षष्ठीविभक्तिः, द्विवचनम् | ................ |
| 7. | सरिद्भ्याम् | ............ | सप्तमीविभक्तिः, बहुवचनम् | ................ |
| 8. | वाचि | ............ | षष्ठीविभक्तिः, द्विवचनम् | ................ |
| 9. | शिरसाम् | ............ | सप्तमीविभक्तिः, एकवचनम् | ................ |
| 10. | मनोभ्याम् | ............ | पञ्चमीविभक्तिः, एकवचनम् | ................ |

www.thearyasamaj.org

2. अत्र समानविभक्तेः त्रीणि रूपाणि, तदतिरिच्य अन्यद् एकं रूपं च दत्तानि सन्ति। तद् अतिरिक्तम् अन्यविभक्तिरूपं पृथक् कृत्वा लिखत –

| | |
|---|---|
| **उदा – आत्मनि, आत्मसु, आत्मनोः, आत्मना** | **आत्मना** |
| 1. मुख्यमन्त्रिणः, मुख्यमन्त्रिणाम् , मुख्यमन्त्री, मुख्यमन्त्रिणोः | .............. |
| 2. वाचौ, वाग्भ्याम्, वाचः, वाग्भ्यः | .............. |
| 3. धीमतः, धीमन्तम्, धीमद्भ्यः,धीमद्भ्याम् | .............. |
| 4. सरित्सु, सरितोः, सरितां, सरिति | .............. |
| 5. धनिनि, धनिनः, धनिभ्यः, धनिभ्याम् | .............. |
| 6. वाक्, वाचि, वाचोः, वाक्षु | .............. |
| 7. शिरसः, शिरांसि, शिरसाम्, शिरसोः | .............. |
| 8. स्वामिनि, स्वामिषु, स्वामिने, स्वामिनोः | .............. |
| 9. पुण्यवान्, पुण्यवतः, पुण्यवद्भ्याम्, पुण्यवद्भ्यः | .............. |
| 10. वपुष्षु, वपूंषि, वपुषोः, वपुषि | .............. |

3. यथोचितं योजयत –

1. मानः एव ......... धनम् ।
2. राजहंसाः ........निवसन्ति ।
3. हे भगवन् , त्वत् ऋते कः अस्मान् ........ रक्षति ?
4. भारतम् एव कर्मभूमिः इत्येव ........ मतम् ।
5. ...... विश्वासः अस्ति चेत् यत्किमपि कर्तुं वयं शक्नुमः ।
6. ........ अर्जनमात्रेण शान्तिः न सम्भवति ।
7. आकाशात् निपतितां गङ्गां शिवः ........ धृतवान् ।
8. सर्वे अपि प्राणिनः ........फलम् अवश्यम् अनुभवन्ति ।
9. वयं ........ आचार्यात् शिक्षां प्राप्नुमः ।
10. अस्माकं पूर्वजाः ........... हिताय जीवनं कृतवन्तः ।

आत्मनि
सम्पदः
शिरसि
जगतः
कर्मणः
महताम्
ज्ञानिनः
विपदः
विदुषाम्
सरसि

www.thearyasamaj.org

4. शुद्धस्य सप्तमीविभक्तिरूपस्य पुरतः ✓ चिह्नं लिखत –

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| यथा – | सरस् | → | सरसु | ☐ | सरत्सु | ☐ | सरस्सु | ✓ |
| 1. | मनस् | → | मने | ☐ | मनसि | ☐ | मनसे | ☐ |
| 2. | विद्वस् | → | विदुषि | ☐ | विद्वसि | ☐ | विद्वांसे | ☐ |
| 3. | सरित् | → | सरिस्सु | ☐ | सरित्सु | ☐ | सरिषु | ☐ |
| 4. | वाच् | → | वाचि | ☐ | वाचे | ☐ | वचसि | ☐ |
| 5. | आत्मन् | → | आत्मेषु | ☐ | आत्मासु | ☐ | आत्मसु | ☐ |
| 6. | आशिष् | → | आशिष्षु | ☐ | आशीष्षु | ☐ | आशित्सु | ☐ |
| 7. | शास्त्रविद् | → | शास्त्रविदौ | ☐ | शास्त्रविदे | ☐ | शास्त्रविदि | ☐ |
| 8. | गुणिन् | → | गुणिषु | ☐ | गुणीषु | ☐ | गुणिष्षु | ☐ |
| 9. | दिश् | → | दिक्सु | ☐ | दिगेषु | ☐ | दिक्षु | ☐ |
| 10. | पथिन् | → | पथि | ☐ | पथे | ☐ | पथौ | ☐ |

5. एतेषां प्रश्नानाम् उत्तराणि लिखत –

1. दूरदर्शने कस्य सम्माननसमारम्भः प्रवर्तते ?

   ............................................................................ ।

2. सत्यजित् कस्मात् धीरतापुरस्कारान् प्राप्तवान् ?

   ............................................................................ ।

3. सः सरितः प्रवाहे कौ दृष्टवान् ?

   ............................................................................ ।

4. कः सत्यजितः सम्माननं कृतवान् ?

   ............................................................................ ।

5. कस्यापि जनस्य महत्त्वं कथं सिध्यति ?

   ............................................................................ ।

सूक्तिः – आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः ।

www.thearyasamaj.org

# प्रयत्नो विधेयः ६

हलन्तशब्दाः
(सप्तसु विभक्तिषु)

एतां कथाम् उच्चैः पठत अवगच्छत च –



कस्मिंश्चित् राज्ये कश्चन **राजा** आसीत् । सः **नीतिमान्, शास्त्रविद्** धार्मिकश्च आसीत् । तस्य **यशः** सर्वत्र प्रसृतम् आसीत् । तस्य **राज्ञः** कश्चन **मन्त्री** आसीत् । सः **विद्वान्, विवेकी श्रद्धावान्** च आसीत् । **ज्ञानिनः** तस्य उपदेशम् अनुसृत्य **राजा** राज्यं पालयति स्म । तस्य प्रजाजनाः **गुणिनः**, धर्मनिष्ठाः कर्मशूराश्च आसन् । कृषकाः, **वणिजः, भिषजः, शिल्पिनः**, कुविन्दाः, चर्मकाराः सर्वेऽपि धर्मानुसारं **निजकर्माणि** निर्व्याजं निर्वहन्ति स्म । अत एव **सर्वसम्पदा** अनुगृहीतम् आसीत् तत् राज्यम् । **सरितः सरांसि** च जलपूर्णानि भवन्ति स्म । फलपूर्णेषु **शाखिषु पक्षिणः** महत्या **मुदा** विहरन्ति स्म । **सर्वदिशः** अपि जनाः तत् राज्यम् आगच्छन्ति स्म । ते तत्र रम्याणि भवनानि निर्माय **तृप्तमनसा** निवसन्ति स्म ।

अथ कदाचित् शत्रुराजः युद्धार्थम् आगतवान् । अकस्मात् प्रवृत्ते युद्धे अयं **राजा** पराजितः अभवत् । सः **मन्त्रिणा** साकं कथञ्चित् नगरं परित्यज्य किञ्चन वनं प्राप्तवान् । कण्टकयुक्तेषु **पथिषु अश्मसु** वा पादरक्षां विना सञ्चलितुम् अक्षमः सः क्षुधया पिपासया च पीडितः कस्यचित् **सरसः** तीरे उपविष्टवान् । घोरायाम् **आपदि** अपि **आत्मनः** हितं परित्यज्य अनुगतं **मन्त्रिणं** दृष्ट्वा अश्रूणि मुञ्चन् सः अवदत् – "भोः **मन्त्रिन्** ! मम राज्यं नष्टम् । सर्वाः **सम्पदः** नष्टाः । **महत्** कष्टम् आपतितम् । इतःपरम् अहं जीवितुं न इच्छामि । कथमपि मरिष्यामि एव" इति ।

दीनं **विलपन्तं राजानं** दृष्ट्वा **मन्त्री** तं सान्त्वयन् उक्तवान् – "**राजन्** ! अलं दुःखेन । राज्यं विनष्टम् इति **भवान्** मा चिन्तयतु । **धीमन्तः** गते शोकं न कुर्वन्ति । ते वर्तमानम् एव चिन्तयन्ति । परिश्रमेण

www.thearyasamaj.org

**कर्मणा** च ते अभीष्टं साधयन्ति। अतः **भवान्** दुःखार्तः मा भवतु। विनष्टस्य राज्यस्य पुनःप्राप्तये उपायं चिन्तयाव। यः अस्माकं शत्रुः अस्ति तस्यापि **वैरिणः** सन्ति। तैः **वैरिभिः** सख्यं विधाय पुनरपि युद्धं करिष्यामः। नष्टं राज्यं पुनः न लप्स्यते इति कः अत्र निश्चयः? **भगवतः** कृपया **भवान्** राज्यं, **सम्पदः यशश्च** विना विलम्बं प्राप्स्यति। चिन्तां मा करोतु'' इति।

**मन्त्रिणः सान्त्वनवचसा** तुष्टः **राजा** दुःखं परित्यज्य उदतिष्ठत्। सः अन्यैः **राजभिः** सख्यं विधाय पुनरपि युद्धं कृतवान्। स्वीयं राज्यं प्रतिप्राप्तवान्। **साहाय्यकृद्भ्यः राजभ्यः** प्रभूतम् उपायनादिकं दत्त्वा तान् तोषितवान्। **मन्त्रिणा** सह सुखेन चिरं राज्यपालनं कृतवान् च।

## अभ्यासः

1. युक्तं रूपं चित्वा रिक्तस्थानं पूरयत –

उदा –

| | | |
|---|---|---|
| 1. | भारतस्य राष्ट्रपतिः ज्ञानी अस्ति। | (ज्ञानी / ज्ञानिनः / ज्ञानिन्) |
| 2. | वैद्यः ..................... औषधं ददाति। | (रोगिणम् / रोगिणः / रोगिणे) |
| 3. | अहं ..................... सह संस्कृतसम्भाषणशिबिरं गतवान्। | (सुहृदः / सुहृद्भिः / सुहृद्भ्यः) |
| 4. | ..................... कमलानि विकसितानि सन्ति। | (सरिद्भ्यः/सरित्सु / सरिद्भिः) |
| 5. | ..................... परितः आम्रवृक्षाः सन्ति। | (सरः / सरसा / सरसि) |
| 6. | ग्राहकः ..................... धनं ददाति। | (वणिजः / वणिजा / वणिजे) |
| 7. | देवः ..................... मां रक्षितवान्। | (आपद्भ्यः/आपत्सु/आपदाम्) |
| 8. | ..................... गृहं समीपे अस्ति। | (भिषक् / भिषजः / भिषजम्) |
| 9. | प्रातः उत्थाय अहं ..................... नमामि। | (भगवते/भगवता/भगवन्तम्) |
| 10. | परिश्रमयुक्तेन ..................... उत्तमं फलं प्राप्यते। | (कर्मणा / कर्मणे / कर्मणि) |
| 11. | नायकः ..................... बहिः गतवान्। | (संसदा / संसदः / संसदि) |
| 12. | परिवर्तनं ..................... स्वभावः भवति। | (जगत् /जगता/जगतः) |
| 13. | .................. विश्वस्य जनाः सुखेन जीवन्ति। | (राज्ञि/राज्ञा/राजानम्) |
| 14. | सज्जनाः .......... हितम् अपरिगणय्य परोपकारं कुर्वन्ति। | (आत्मनि/आत्मना/ आत्मनः) |
| 15. | पुस्तकस्य ................ भाषाप्रवेशः। | (नामः/नाम/ नामानि) |

www.thearyasamaj.org

2. अर्धवाक्यद्वयं योजयित्वा एकं वाक्यं लिखत –

| | | |
|---|---|---|
| 1. | विवेकिनः श्वस्तनं कार्यम् | फलानि चिन्वन्ति। |
| 2. | चतुराः मधुरवाचा | कदापि मास्तु। |
| 3. | ईश्वरः भक्तान् सदा | परस्परं सहकुर्वन्ति। |
| 4. | रोगिणे सुहृत् | देशहिताय भवतु। |
| 5. | कृषकाः शाखिभ्यः | खिन्नाः न भवन्ति। |
| 6. | जीवनस्य लक्ष्यं | नाम किम् ? |
| 7. | जनाः आपदि | विपदः रक्षति। |
| 8. | भिषग्भिः ग्रामेषु | पथिषु चलितुं शक्यते। |
| 9. | विद्यार्थिनां शक्तिः | गुरवः अनुगृह्णन्ति। |
| 10. | प्रतिभावतः युवकस्य | अद्यैव कुर्वन्ति। |
| 11. | 'मेधावी' इति अहङ्कारः | सान्त्वनवचनानि कथयति। |
| 12. | सङ्कल्पेन कण्टकमयेषु | सेवा करणीया। |
| 13. | विपत्सु महापुरुषाः | सम्पदः अर्जनमेव न। |
| 14. | धीमन्तं विद्यार्थिनं | कार्याणि साधयन्ति। |

यथा –

1. **विवेकिनः श्वस्तनं कार्यम् अद्यैव कुर्वन्ति।**
2. ............................................................................ ।
3. ............................................................................ ।
4. ............................................................................ ।
5. ............................................................................ ।
6. ............................................................................ ।
7. ............................................................................ ।
8. ............................................................................ ।

www.thearyasamaj.org

9. ........................................................................ ।

10. ........................................................................ ।


11. ........................................................................ ।

12. ........................................................................ ।

13. ........................................................................ ।

14. ........................................................................ ।

3. मन्त्रिशब्दस्य उचितानि रूपाणि प्रयुज्य एतानि वाक्यानि रिक्तस्थाने लिखत –




कोऽपि उपायनं ददाति।

समाजसेवां करोति।

गृहं विशालम् अस्ति।

सेवकः बिभेति।

सह पत्रकाराः सन्ति।

द्रष्टुं जनाः आगच्छन्ति।

उत्तमगुणाः सन्ति।

यथा –

1. **मन्त्री समाजसेवां करोति ।**

2. ................................................................ ।

3. ................................................................ ।

4. ................................................................ ।

5. ................................................................ ।

6. ................................................................ ।

7. ................................................................ ।

www.thearyasamaj.org

4. 'सरित्' शब्दस्य उचितानि रूपाणि प्रयुज्य एतानि वाक्यानि रिक्तस्थाने लिखत –




यथा –

1. **सरित् नगरमध्ये शोभते ।**
2. ................................................................ ।
3. ................................................................ ।
4. ................................................................ ।
5. ................................................................ ।
6. ................................................................ ।
7. ................................................................ ।

5. पाठस्य आधारेण एतत् कथनं शुद्धम् उत अशुद्धम् इति आवरणे चिह्नं कुरुत –

उदा – 1. राजा नीतिमान् आसीत्। (✓)
2. मन्त्री अविवेकी आसीत्। ( )
3. राज्यं सर्वसम्पदा अनुगृहीतम् आसीत्। ( )
4. सर्वदिशः अपि जनाः तत्र आगच्छन्ति स्म। ( )
5. राजा अकस्मात् प्रवृत्ते युद्धे जयं प्राप्तवान्। ( )
6. परिश्रमेण कर्मणा धीमन्तः अभीष्टं साधयन्ति। ( )
7. महत् कष्टम् आपतितम् इति मन्त्री अवदत्। ( )
8. राजा मन्त्रिणं प्रति सान्त्वनवचांसि उक्तवान्। ( )
9. राजा मन्त्रिणा सह सुखेन राज्यपालनं कृतवान्। ( )
10. आपदि मन्त्री राजानं त्यक्तवान्। ( )

सूक्तिः – आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि।

www.thearyasamaj.org

# ७ धूर्तसंहारः

विशेषणविशेष्यभावः



एतां घटनाम् उच्चैः पठत, अवगच्छत च –

**बहूनां दुर्गाणां विजेता शिवराजः स्वकीयं बलं** वर्धयति स्म । तस्य **उग्रतेजसां दलपतीनां प्रकाशमानाः खड्गाः सर्वासु दिक्षु** स्वातन्त्र्याय परिभ्रमन्ति स्म । **स्वामिभक्ताः शिवराजसैनिकाः सूचितेषु दुर्गेषु** व्याघ्रवत् आक्राम्यन्ति स्म। तेषां **बलवद्भिः प्रहारैः** विधर्मीयाणां मनोबलं प्रतिक्षणं क्षीयते स्म।

शिवराजस्य पदे पदे **वर्धमानं सामर्थ्यं** दमयितुम् आदिलशाहस्य **सेनापतिः अफजलखानः** प्रतिज्ञाम् अकरोत्। तदनन्तरम् एव सः **महतीं सज्जताम्** आरब्धवान्। न केवलं तावत्, अपि तु शिवराजं कपटस्नेहेन मारयितुं निश्चयं कृतवान्।

ततः **अफजलखानः निश्चिन्तेन मनसा** शिवराजम् आक्रान्तुं तुळजापुरं प्रति **प्रस्थितः**। **निबिडं जावळीवनं** ससैन्यं प्रविश्य **पर्वतमूषिकस्य शिवराजस्य** ग्रहणं तु दुष्करम् एव। तर्हि **का गतिः**? सन्धेः व्याजेन शिवराजस्य आह्वानं करणीयम्। तेन **अग्रिमं कार्यं सुकरं** भवेत् इति खानः चिन्तितवान्। सः दूतमुखेन शिवराजेन मेलितुम् इच्छां प्रदर्शितवान्।

**राजनीतिज्ञः शिवराजः** अपि **वयोवृद्धं, ज्ञानवृद्धं गोपीनाथवर्यं** राजदूतरूपेण खानं प्रति **प्रेषितवान्**। सः गत्वा निवेदितवान् – "खानवर्य! **भवान् अस्मदीयं महाराजं** सन्ध्यर्थम् **आहूतवान्** इति **परमा दयालुता**। भवतः **पराक्रमः अग्नितुल्यः**। तेनैव **अखिलस्य भूमण्डलस्य शोभा वर्धिता** अस्ति। किन्तु अत्र आगन्तुं तस्य **महत् भयं** वर्तते। अतः भवान् एव जावळीप्रदेशं समागत्य महाराजाय अभयं दातुम् अर्हति" इति। दूतस्य **तथाविधं वचनं** श्रुत्वा **खानः** जावळीप्रदेशे मेलनम् **अङ्गीकृतवान्**। ससैन्यं **प्रस्थितः सः** प्रतापदुर्गात् अनतिदूरे शिबिरं **स्थापितवान्**। शिवखानयोः मेलनस्थानं शिबिरात् दूरे **उत्तुङ्गस्य दुर्गस्य** अधः **एकस्मिन् पटगृहे** निश्चितम्।


**रात्रिः अतीता। सूर्योदयः जातः। भवानीभक्तः शिवराजः लौहमयं दृढं कवचं, तीक्ष्णानि व्याघ्रनखानि, रक्तं शिरस्त्राणं, तीक्ष्णं कृपाणं** च धृत्वा अफजलेन मेलितुं **प्रस्थितः**। **आगतं शिवराजं** दृष्ट्वा **अफजलः प्रसन्नः** अभवत्। **सः** स्वस्थानात् सहसा **उत्थितः**। **एषः शिवराजः अबुधः** अस्ति

www.thearyasamaj.org


इति चिन्तयन् सः तं **विविधानि मधुराणि वचनानि** उक्तवान् । **धीरः शिवराजः** अपि तस्य छलयुक्तवचनानि अवगतवान्। अफजलः समक्षं **स्थितं शिवराजम्** आलिङ्गितुं **दीर्घौ हस्तौ** प्रसारितवान्। **अफजलः स्थूलः उन्नतः** च। **राक्षसदेहस्य अफजलस्य** पुरतः **शिवराजः वामनः** दृश्यते स्म। **घोरमुखः खानः सुदर्शनं शिवराजं** झटिति आलिङ्गितवान्। शिवराजस्य शिरः अफजलस्य **विशालम् उरः** अस्पृशत्। **दुष्टाशयः खानः** सपदि **शत्रुकर्षणं शिवराजं** कण्ठे गृहीत्वा, गुप्तरूपेण **स्थापितया छुरिकया** घातयितुं **विफलं प्रयत्नं कृतवान्** । शिवराजस्य **कवचं छिन्नं जातम्** । **विद्युद्वेगः शिवराजः** अपि **स्वकीयेन दीर्घेण कृपाणेन** खानस्य उदरं **विदारितवान्**। '**हतोऽहं, वञ्चितोऽहम्**' इति उच्चैः **क्रन्दन् मूर्तिभञ्जकः खानः छिन्नः वृक्षः** इव **भूमौ पतितः** । भृशं **पीडितः गतप्रभः सः** क्षणार्धेन **मृतः** । **चिरप्रवृद्धं पापं शान्तम्** अभवत्।

**नैकदुर्गविजेतारं धर्मकण्टकनाशकम्।**
**वन्देऽहं शिवराजं तं खानोदरविदारकम्॥**

पठत, अवगच्छत च –



स्थूलः गजः ।



विशालं गृहम् ।



सुन्दरी महिला ।

*अत्र स्थूलत्वं, विशालत्वं, सुन्दरीत्वं च विशेषताः सन्ति। विशेषतां यत् पदं सूचयति तत् विशेषणम् । स्थूलः, विशालम्, सुन्दरी इत्येतानि विशेषणानि । यस्य विशेषता उच्यते तत् पदं विशेष्यम्। गजः, गृहम्, महिला – इत्येतानि विशेष्याणि ।*

यथा –

| विशेषणम् | विशेष्यम् |
|---|---|
| श्वेतम् | वस्त्रम् |
| नूतना | शाटिका |
| कृशा | बालिका |
| उत्तमा | लेखनी |
| मधुरम् | फलम् |
| दीर्घः | मार्गः |

| विशेषणम् | विशेष्यम् |
|---|---|
| गभीरः | सागरः |
| प्रसिद्धा | कथा |
| चतुरः | छात्रः |
| निर्मलः | आकाशः |
| विशालम् | भवनम् |
| दिव्यम् | औषधम् |

www.thearyasamaj.org

## अभ्यासः

1. उदाहरणानुसारं विशेषण-विशेष्ययोः अङ्कनं कुरुत -

| उदा - | विशेषणम् | विशेष्यम् |
|---|---|---|
| सुन्दरं चित्रम्। | सुन्दरम् | चित्रम् |
| 1. श्रद्धेयः पुरुषः। | ...................... | ...................... |
| 2. दीर्घा नासिका। | ...................... | ...................... |
| 3. मनोहरं दृश्यम्। | ...................... | ...................... |
| 4. वामनः युवकः। | ...................... | ...................... |
| 5. बुद्धिमती बालिका। | ...................... | ...................... |
| 6. श्वेतं पुष्पम्। | ...................... | ...................... |
| 7. प्रसिद्धः नायकः। | ...................... | ...................... |
| 8. नूतना लेखनी। | ...................... | ...................... |
| 9. विशालं नगरम्। | ...................... | ...................... |
| 10. पुरातनः ग्रन्थः। | ...................... | ...................... |
| 11. कृशा महिला। | ...................... | ...................... |
| 12. अनन्तः आकाशः। | ...................... | ...................... |

### अवधेयम्

*विशेषणस्य विशेष्यस्य च सम्बन्धः एव विशेषणविशेष्यभावः। अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानां शब्दानां विशेषणविशेष्यभावः अस्ति।*

यथा -

1. बहूनां दुर्गाणाम्।
2. स्वकीयं बलम्।
3. उग्रतेजसां दलपतीनाम्।
4. प्रकाशमानाः खड्गाः।
5. सर्वासु दिक्षु।
6. स्वामिभक्ताः शिवराजसैनिकाः।
7. सूचितेषु दुर्गेषु।
8. बलवद्भिः प्रहारैः।
9. वर्धमानं सामर्थ्यम्।
10. महतीं सज्जताम्।
11. निश्चिन्तेन मनसा।
12. ज्ञानवृद्धं गोपीनाथवर्यम्।
13. अस्मदीयं महाराजम्।
14. परमा दयालुता।

www.thearyasamaj.org

## अवधेयम्

विशेषणविशेष्यभावविषये स्मर्तव्याः केचन अंशाः सन्ति ।

*1. प्रायः विशेषणवाचकानां शब्दानां प्रयोगः त्रिषु लिङ्गेषु अपि भवति ।*

यथा –

| विशेषणम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| उत्तम | उत्तमः | उत्तमा | उत्तमम् |
| सुन्दर | सुन्दरः | सुन्दरी | सुन्दरम् |
| समीचीन | समीचीनः | समीचीना | समीचीनम् |

*2. विशेष्यवाचकशब्दस्य यत् लिङ्गं तदेव लिङ्गं विशेषणवाचकशब्दस्य अपि भवति ।*

यथा – समीचीनः बालकः । समीचीना बालिका । समीचीनं पुस्तकम् ।
महान् सन्तोषः । महती श्रान्तिः । महत् दुःखम् ।

## अभ्यासः

2. उदाहरणानुसारं विशेष्यस्य लिङ्गानुसारं विशेषणस्य प्रयोगं कुरुत –

**विशाल**

भवनम् – विशालं भवनम् ।
मार्गः – विशालः मार्गः ।
वापी – विशाला वापी ।

**स्वच्छ**

वस्त्रम् – ..........................
कूपी – ..........................
दर्पणः – ..........................

**समृद्ध**

ग्रामः – ..........................
विपणिः – ..........................
वनम् – ..........................

www.thearyasamaj.org

पराक्रमः – ..............................
धैर्यम् – ..............................
शक्तिः – ..............................

महत्

प्राचीन

पेटिका – ........................
भवनम् – ........................
ग्रन्थः – ........................

**अवधेयम्**

*3. विशेष्यस्य यत् वचनं तदेव वचनं विशेषणस्य अपि भवति ।*

| यथा – | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| | उन्नतः वृक्षः । | उन्नतौ वृक्षौ । | उन्नताः वृक्षाः । |
| | नूतनं सङ्गणकम् । | नूतने सङ्गणके । | नूतनानि सङ्गणकानि । |
| | विशिष्टा कथा । | विशिष्टे कथे । | विशिष्टाः कथाः । |

3. विशेष्यस्य वचनानुसारं विशेषणस्य प्रयोगं कुरुत –

उदा –

| | | | | |
|---|---|---|---|---|
| 1. | पक्वं फलम् । | पक्वे फले । | पक्वानि फलानि । | (पक्व) |
| 2. | ........... घटी । | ........... घट्यौ । | ........... घट्यः । | (शोभन) |
| 3. | ........... स्यूतः । | ........... स्यूतौ । | ........... स्यूताः । | (आकर्षक) |
| 4. | ........... सूत्रम् । | ........... सूत्रे । | ........... सूत्राणि । | (दृढ) |
| 5. | ........... लता । | ........... लते । | ........... लताः । | (मृदुल) |
| 6. | ........... आश्रमः । | ........... आश्रमौ । | ........... आश्रमाः । | (शान्तः) |
| 7. | ........... लेखनी । | ........... लेखन्यौ । | ........... लेखन्यः । | (नव्य) |
| 8. | ........... युतकम् । | ........... युतके । | ........... युतकानि । | (विमल) |
| 9. | ........... गर्तः । | ........... गर्तौ । | ........... गर्ताः । | (निम्न) |
| 10. | ........... फलकम् । | ........... फलके । | ........... फलकानि । | (कृष्ण) |

www.thearyasamaj.org

## अवधेयम्

*4. विशेष्यस्य या विभक्तिः सा एव विभक्तिः विशेषणस्य अपि भवति ।*

*उदा –*

*पुंलिङ्गे*

*प्रथमा* – श्रेष्ठः युवकः अस्ति ।
*द्वितीया* – श्रेष्ठं युवकम् अभिनन्दामः ।
*तृतीया* – श्रेष्ठेन युवकेन सह चर्चां कुर्मः ।
*चतुर्थी* – श्रेष्ठाय युवकाय उपायनं दद्मः ।
*पञ्चमी* – श्रेष्ठात् युवकात् नीतिकथां शृणुमः।
*षष्ठी* – श्रेष्ठस्य युवकस्य विचाराः उदात्ताः सन्ति ।
*सप्तमी* – श्रेष्ठे युवके जनाः स्निह्यन्ति ।

*स्त्रीलिङ्गे*

*प्रथमा* – श्रेष्ठा धेनुः चरति ।
*द्वितीया* – श्रेष्ठां धेनुं भवान् चारयतु ।
*तृतीया* – श्रेष्ठया धेन्वा सह वत्सः चरति ।
*चतुर्थी* – श्रेष्ठायै धेन्वै तृणं ददाति ।
*पञ्चमी* – श्रेष्ठायाःधेन्वाः क्षीरं लभ्यते ।
*षष्ठी* – श्रेष्ठायाः धेन्वाः वर्णः कपिलः अस्ति ।
*सप्तमी* – श्रेष्ठायां धेन्वां विशिष्टाः गुणाः सन्ति ।

*नपुंसकलिङ्गे*

*प्रथमा* – श्रेष्ठं कार्यं तत् ।
*द्वितीया* – श्रेष्ठं कार्यं कुरुत ।
*तृतीया* – श्रेष्ठेन कार्येण एव यशः भवति ।
*चतुर्थी* – श्रेष्ठाय कार्याय समयं दद्मः ।
*पञ्चमी* – श्रेष्ठात् कार्यात् मा विरम ।
*षष्ठी* – श्रेष्ठस्य कार्यस्य सत्फलं भवत्येव ।
*सप्तमी* – श्रेष्ठे कार्ये रताः भवामः ।

4. उदाहरणानुसारं विभिन्नविभक्तिषु विशेषणविशेष्यभावस्य (एकवचने) अभ्यासं कुरुत –

| | प्राचीन | देवालय (पुंलिङ्गे) |
|---|---|---|
| प्रथमाविभक्तिः | ...................... | ...................... |
| द्वितीयाविभक्तिः | ...................... | ...................... |
| तृतीयाविभक्तिः | ...................... | ...................... |
| चतुर्थीविभक्तिः | ...................... | ...................... |
| पञ्चमीविभक्तिः | ...................... | ...................... |
| षष्ठीविभक्तिः | ...................... | ...................... |
| सप्तमीविभक्तिः | ...................... | ...................... |

www.thearyasamaj.org

| प्राचीन | नगरी। (स्त्रीलिङ्गे) | प्राचीन | भवनम्। (नपुंसकलिङ्गे) |
|---|---|---|---|
| .............. | .............. | .............. | .............. |
| .............. | .............. | .............. | .............. |
| .............. | .............. | .............. | .............. |
| .............. | .............. | .............. | .............. |
| .............. | .............. | .............. | .............. |
| .............. | .............. | .............. | .............. |
| .............. | .............. | .............. | .............. |

5. उदाहरणानसारम् उचितेन विभक्तिरूपेण वाक्यनिर्माणं कुरुत –

उदा –

उत्तमः बालकः अस्ति। तम् आह्वयतु।

**उत्तमं बालकम् आह्वयतु ।**

1. उन्नतः शाखी अस्ति । कपिः तम् आरोहति।

........................................................................ ।

2. श्रेष्ठः विद्वान् अस्ति। छात्राः तस्मात् शास्त्रं पठन्ति।

........................................................................ ।

3. निर्दयः पुरुषः अस्ति। तस्मै सर्वे क्रुध्यन्ति।

........................................................................ ।

4. उत्तुङ्गः गिरिः अस्ति। तस्य नाम हिमवान्।

........................................................................ ।

5. गभीरः कूपः अस्ति। ततः जलम् उद्धरन्ति।

........................................................................ ।

6. प्रशान्तः ग्रामः अस्ति। तस्मिन् जनाः निवसन्ति।

........................................................................ ।

7. सुदीर्घः पन्थाः अस्ति। तेन वाहनानि गच्छन्ति।

........................................................................ ।

www.thearyasamaj.org

8. धीमती युवती अस्ति। तस्यै पारितोषिकं दद्मः।

................................................................................ ।

9. विशाला वाटिका अस्ति। ततः पुष्पाणि मा चिन्वन्तु।

................................................................................ ।

10. अगाधा सरित् प्रवहति। तस्यां बालाः तरन्ति।

................................................................................ ।

11. धीरा बालिका अस्ति। तया सह आचार्यः भाषते।

................................................................................ ।

12. समीचीना लेखनी अस्ति। भवान् तां क्रीणातु।

................................................................................ ।

13. महती विपद् भवति। ईश्वरः तस्याः रक्षति।

................................................................................ ।

14. दिव्यं चक्षुः अस्ति। पार्थः तेन विश्वरूपं दृष्टवान्।

................................................................................ ।

15. रम्यं सरः अस्ति। तत्र राजहंसाः विहरन्ति।

................................................................................ ।

16. अनन्तं वियत् अस्ति। ततः मेघाः वर्षन्ति।

................................................................................ ।

17. कष्टकरं कर्म भवति। तस्मात् विरमत।

................................................................................ ।

18. उन्नतं भवनम् अस्ति। जनाः तत्र गच्छन्ति।

................................................................................ ।

19. घोरं काननम् अस्ति। तस्मिन् केऽपि न सञ्चरन्ति।

................................................................................ ।

20. ज्ञानप्रदं संस्कृतम् अस्ति। वयं तत् पठामः।

................................................................................ ।

www.thearyasamaj.org

6. विशेष्यस्य विभक्त्यनुगुणं विशेषणस्य अपि विभक्तिं वचनं च परिवर्त्य लिखत –

अहम्

| | |
|---|---|
| दीर्घ | पाठं पठामि । |
| मलिन | वस्त्राणि प्रक्षालयामि । |
| चतुर | बालकौ पाठयामि । |
| कपिल | धेनूः दोह्मि । |
| स्नेहशील | मित्रेण सह क्रीडामि । |
| उत्तम | शिष्यैः सह शास्त्रचर्चां करोमि । |
| मधुर | भाषया कथाः श्रावयामि । |
| स्वकीय | सङ्गणकेन कार्यं साधयामि । |
| निर्धन | बालकाय पुस्तकं ददामि । |
| प्रिय | अम्बायै शाकानि ददामि । |
| रुग्ण | मित्राय औषधम् आनयामि । |
| उन्नत | वृक्षात् फलं चिनोमि । |
| कुशल | रमायाः बिभेमि । |
| गहन | अरण्यात् पलायनं करोमि । |
| पवित्र | गङ्गानद्यां स्नामि । |
| आधुनिक | समाजे उत्साहं पूरयामि । |

उदा – **अहं दीर्घं पाठं पठामि ।**

1. ............................................................................. ।
2. ............................................................................. ।
3. ............................................................................. ।
4. ............................................................................. ।
5. ............................................................................. ।
6. ............................................................................. ।
7. ............................................................................. ।
8. ............................................................................. ।

www.thearyasamaj.org

9. ........................................................................... ।
10. ........................................................................... ।
11. ........................................................................... ।
12. ........................................................................... ।
13. ........................................................................... ।
14. ........................................................................... ।
15. ........................................................................... ।

7. कोष्ठकस्थानि विशेषणपदानि क्रमशः उपयुज्य विशेष्यपदानां लिङ्गवचनविभक्त्यनुगुणं वाक्यानि पूरयत -

उदा - 1. दुर्बलाः अपि जनाः सम्भूय महत् कार्यं साधयितुं शक्नुवन्ति। (दुर्बल - महत्)

2. परीक्षायां ........... छात्राः उत्तीर्णाः भवन्ति। ............ अनुत्तीर्णाः भवन्ति। (श्रद्धावत् - अलस)

3. भवन्तः .............. मार्गेण गच्छन्तु , न तु ................ मार्गेण। (ऋजु - वक्र)

4. ................ वृक्षेषु ............... कुसुमानि शोभन्ते। (दृढ - मृदु)

5. भारतं ................ राष्ट्रम्। नेपालं ................ राष्ट्रम्। (विशाल - लघु)

6. भवन्तः ................. जनेभ्यः दूरे तिष्ठन्तु; ................ जनेभ्यः न। (दुष्ट - साधु)

7. हे भगवन् ! ........... शक्तिं यच्छतु ; यया ........... कार्यं साधयेयम्। (तादृश - सर्व)

8. ............... दण्डं कर्तयामि चेत् ............... दण्डौ सिद्ध्यतः। (दीर्घ -ह्रस्व)

9. वृष्टौ कदाचित् ............. वृक्षाणां पतनं भवति। ............. न भवति। (उन्नत-वामन)

10. .............. बालिकाभिः सह क्रीड, न तु ............... सह। (विनीत - अविनीत)

11. स्वतन्त्रतासङ्ग्रामे ............, ............... युवकाः प्राणार्पणं कृतवन्तः। (बहु - धीर)

12. ................. गुरवः .............. छात्रैः सह शास्त्रचर्चां कुर्वन्ति। (दक्ष - धीमत्)

13. वयं............ परिश्रमं कृत्वा संस्कृतभाषां .............. विश्वे प्रसारयामः।(महत् - समग्र)

14. सः ........... लताभ्यः ........... पुष्पाणि चिनोति। (कोमल - मनोहर)

15. ........... जनानां .......... विचाराः भवन्ति। (महत् - उदात्त)

16. भवत्यः आपणं गत्वा ..........., .......... च लेखनीः क्रीणन्तु। ( सुन्दर - समीचीन)

www.thearyasamaj.org

४. मञ्जूषायाः उचितानि विशेषणपदानि चित्वा कथां पूरयत –

विशालम् , निष्ठुरः, उन्नते, समीपस्थम् , समग्रम् , महत्याम् , दीनाम् ,
महती, परमः, शुष्काणि, तीव्रा, श्रेष्ठम् , मृतस्य, सर्वान् , पक्वम् , आर्द्रम् ,
घोराणि, विस्मयावहम् , दुःखितस्य, सफलम्, उन्नतस्य, सर्वे

कश्चन **निष्ठुरः** व्याधः आसीत् । सः ............. वनं गत्वा जालेन पक्षिणः गृहीत्वा तान् विक्रीय जीवति स्म । एकदा सः ............. जालं प्रसार्य पक्षिणां ग्रहणं कुर्वन् आसीत् । तावता ............. वृष्टिः सञ्जाता । ............. अरण्यं जलमयम् अभवत् । ............. जीविनः भृशं पीडिताः अभवन् । व्याधः कस्यचन ............. वृक्षस्य अधः उपविष्टवान् । तस्मिन् ............. वृक्षे कश्चन कपोतः पत्न्या सह वसति स्म ।

व्याधस्य ............. अवस्थां दृष्ट्वा कपोती भर्तारम् अवदत् – ''भोः ! एषः व्याधः ............. आपदि स्थितः अस्ति । शरणागतानां रक्षणम् अस्माकं कर्तव्यम् । सः एव ............. धर्मः । अतः भवान् ............. व्याधस्य रक्षणं करोतु'' इति ।

पत्न्या प्रेरितः कपोतः कुतश्चित् ............. काष्ठानि आनीय अग्निं प्रज्वाल्य व्याधस्य शीतबाधां निवारितवान् । व्याधस्य ........... बुभुक्षा आसीत् । सः कपोतम् आहारम् अयाचत । अतिथीनां सत्कारं ............. धर्मं मत्वा कपोतः अग्नौ पतित्वा मरणं प्राप्तवान् । व्याधः ........... कपोतस्य ............. मांसं खादित्वा बुभुक्षां निवारितवान् । तस्य मनः ............. अभवत् । सः ............. पक्षिणः जालात् मोचितवान् । ततः भर्तृविहीनं जीवनं व्यर्थं मत्वा कपोती अपि अग्नौ पतित्वा मरणं प्राप्तवती ।

एतद् ............. दृश्यं दृष्ट्वा सः व्याधः स्वस्य ............. पापानि स्मरन् जन्म ............. कर्तुम् इच्छन् अग्नौ आत्माहुतिं कृतवान् ।

शत्रावप्युचितं कार्यम् आतिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ॥

गृहम् आगतः जनः शत्रुः एव चेदपि तस्य उचितः अतिथिसत्कारः करणीयः । वृक्षः स्वस्य छेदनं कर्तुम् आगतस्यापि जनस्य छायां न निवारयति । अपि तु कल्पयति एव ।

सूक्तिः – शठे शाठ्यं समाचरेत् ।

www.thearyasamaj.org

# सर्वे कर्मवशाः वयम् ८




सर्वनामशब्दाः

एतां कथाम् उच्चैः पठत, अवगच्छत च -

महाभारतयुद्धं परिसमाप्तम् । भीष्मः शरशय्यायाम् आसीत् । **सर्वः** युद्धपरिसरः गजाश्वनरजीवानां मृतशरीरैः भूयिष्ठः आसीत् । **तस्मिन्** युद्धे मृतानां शरीराणि दृष्ट्वा चिन्ताकुलः आसीत् युधिष्ठिरः । **सः** अनुजैः सह भीष्मस्य सन्निधिं गतवान् । **तं** नमस्कृत्य उक्तवान् - "पितामह ! **अस्य सर्वस्य** विनाशस्य कारणम् **अहमेव** ननु ? **भवतः अस्याः** दुर्दशायाः कारणमपि **अहमेव** खलु ? न जानामि **अहं** कीदृशीं दुर्गतिं प्राप्स्यामि" इति ।

तदा **तं** सान्त्वयन् भीष्मः अवदत् - "वत्स ! **अस्य सर्वस्य** कारणं **त्वं** नैव । **इमे ते** बान्धवाः **स्वस्य स्वस्य** पुराकृतस्य कर्मणः फलम् अनुभवन्ति" इति । किन्तु युधिष्ठिरः समाहितः नाभवत् । **तं** पुनरपि बोधयन् भीष्मः **तस्य** निदर्शनरूपेण **इमां** कथां श्रावितवान् ।

पुरा गौतमी नाम काचित् तपस्विनी महिला आसीत् । **तस्याः** अतिप्रियः एकः एव पुत्रः । कदाचित् कश्चन सर्पः **तं** पुत्रम् अदशत् । **तेन सः** बालः अचेतनः जातः । अर्जुनकः नाम व्याधः **एतद्** दृष्ट्वा झटिति स्नायुपाशेन **तं** सर्पं बद्ध्वा गौतम्याः समीपम् आनीतवान् । उक्तवान् च - "मातः ! **अयं** दुष्टसर्पः **तव** पुत्रम् अमारयत् । **किम् अहम् एतम्** अग्नौ क्षिपानि, उत खण्डशः करवाणि ? अथवा वद, **अन्येन केन** प्रकारेण **एनं** दण्डयानि ?" इति ।

तदा गौतमी अवदत् - "हे सौम्य ! त्यज **इमं** सर्पं, यतः **अस्मिन्** सर्पे मारितेऽपि मृतः **मम** पुत्रः जीवितः न भविष्यति" इति ।

किन्तु व्याधः **तत्** अनङ्गीकुर्वन् पुनः पुनः सर्पं मारयितुं **तस्याः** अनुमतिम् अयाचत । गौतमी तु **तस्मै** अनुमतिं न अददात् । गौतमी-व्याधयोः सम्भाषणं श्रुत्वा **सः** सर्पः मनुष्यभाषया अवदत् - "हे अर्जुनक ! **अहं** बालम् अदशं यत् तत्र **मम** न **कोऽपि** दोषः । मृत्योः बलात् एव **मया इदं** कार्यं कृतम्" इति ।

तदा व्याधः अवदत् - "तथापि **अस्य** बालस्य दशनं तु **त्वया** एव कृतम् । अतः **त्वं** वध्यः एव"

www.thearyasamaj.org

इति । सर्पः अवदत् – ''**अहं** मृत्योः प्रेरणया एव **अस्य** बालस्य हनने कर्ता अभवम् । वास्तविकं कारणं तु मृत्युः एव'' इति ।

तदा मृत्युः एव तत्र उपस्थितः अभवत् । **सः** अवदत् – ''हे सर्प ! नात्र **अहं** कारणं, न **त्वं** वा । कालः अत्र कारणम् । यतः **तेन** प्रेरितः **अहं त्वां** प्रेरितवान् । यथा वायुः आकाशे स्थितान् मेघान् आकर्षति, विकर्षति च तद्वदेव कालः अपि **अस्मान् सर्वान्** आकर्षति, विकर्षति च । **तेनैव** कालेन जगत् **इदं** सृज्यते, संह्रियते वा । एवं सति यदि अत्र दोषः स्यात् तर्हि **सः** कालस्यैव, न तु **मम**'' इति ।

**तत्** श्रुत्वा कालः एव तत्र उपस्थितः अभवत् । **सः** अवदत् – ''हे व्याध ! **तस्य** बालस्य मरणे न **अयं** पन्नगः, न **एषः** मृत्युः, न वा **अहं** कारणीभूताः । कारणं तु **अनेन** कृतं कर्म एव ।

**यदनेन कृतं कर्म तेनायं निधनं गतः ।**
**विनाशहेतुः कर्मास्य सर्वे कर्मवशा वयम् ।।**

छायातपौ इव कर्म कर्ता च नित्यसम्बद्धौ भवतः'' इति ।

**सर्वम् एतत्** श्रुत्वा गौतमी अवदत् – ''**मम** पुत्रस्य मरणकारणम् **एषु** न **कोऽपि** अस्ति । **मम** पुत्रः स्वीयकर्मणां फलेन मृत्युं प्राप्तवान् अस्ति । **ममापि** तादृशकर्म एव स्यात् **येन एतस्य** मृत्युः **समभवत्** । अतः कालः, मृत्युः च स्वस्थानं गच्छताम् । **त्वमपि** सर्पम् **एतं** परित्यज'' इति ।

**एतां** कथां श्रावयित्वा भीष्मः अकथयत् – ''राजन् ! **सर्वेऽपि** स्वकर्मणां फलं प्राप्नुवन्ति इति ज्ञानेन गौतम्याः शोकः परिसमाप्तः । अत्रापि तथैव । **त्वया** दुर्योधनेन वा न **किमपि** अपराद्धम् । **सर्वे**ऽपि **इमे** स्वकर्मणः फलम् अनुभवन्ति । **अहमपि** अनुभवामि । **सर्वे** कर्मवशाः **वयम्** । अतः शोकं मा कुरु'' इति । भीष्मस्य वचनैः युधिष्ठिरः समाहितः अभवत् ।

एतानि वाक्यानि सावधानतया उच्चैः पठत –

इदम् एकं गुरुकुलम् अस्ति ।
अयम् आचार्यः अस्ति ।
इमम् आचार्यं शिष्याः प्रणमन्ति ।
अनेन आचार्येण सह शास्त्रचर्चां कुर्वन्ति ।
अस्मै आचार्याय फलानि यच्छन्ति ।
अस्मात् आचार्यात् विविधविद्याः प्राप्नुवन्ति ।
अस्य आचार्यस्य नाम विश्वविख्यातम् अस्ति ।
अस्मिन् आचार्ये बहवः सद्गुणाः सन्ति ।

www.thearyasamaj.org

➧ एतानि रूपाणि पठत – (यत्र शेषं 'पुंलिङ्गवत्' इति लिखितम् अस्ति तत्र पुंलिङ्गरूपाणि दृष्ट्वा रिक्तस्थानानि पूरयत ।)

### 'इदम्' शब्दः (पुंलिङ्गरूपाणि)

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | अयम् | इमौ | इमे |
| *द्वितीयाविभक्तिः* | इमम् | इमौ | इमान् |
| *तृतीयाविभक्तिः* | अनेन | आभ्याम् | एभिः |
| *चतुर्थीविभक्तिः* | अस्मै | आभ्याम् | एभ्यः |
| *पञ्चमीविभक्तिः* | अस्मात् | आभ्याम् | एभ्यः |
| *षष्ठीविभक्तिः* | अस्य | अनयोः | एषाम् |
| *सप्तमीविभक्तिः* | अस्मिन् | अनयोः | एषु |

### 'इदम्' शब्दः (नपुंसकलिङ्गरूपाणि)

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | इदम् | इमे | इमानि |
| *द्वितीयाविभक्तिः* | इदम् | इमे | इमानि |
| *तृतीयाविभक्तिः* | .............. (शेषं पुंलिङ्गवत्) | .............. (शेषं पुंलिङ्गवत्) | .............. (शेषं पुंलिङ्गवत्) |
| *चतुर्थीविभक्तिः* | .............. | .............. | .............. |
| *पञ्चमीविभक्तिः* | .............. | .............. | .............. |
| *षष्ठीविभक्तिः* | .............. | .............. | .............. |
| *सप्तमीविभक्तिः* | .............. | .............. | .............. |

**अवधेयम्**

*सर्व, अन्य, तद्, एतद्, यद्, इदम्, किम्, अस्मद्, युष्मद्, भवत् – इत्यादयः शब्दाः सर्वनामशब्दाः इति उच्यन्ते। सर्वनामशब्दाः विशेषणानि भवन्ति। एतेषु बहूनां विभक्तिरूपाणि, तेषां प्रयोगं च भाषाप्रवेशस्य प्रथमभागे भवन्तः ज्ञातवन्तः। अस्मिन् पाठे विशेषतया 'इदम्' शब्दस्य प्रयोगः कृतः अस्ति।*

www.thearyasamaj.org

## अभ्यासः

1. अधः कानिचन वाक्यानि सन्ति। तेषु अधोरेखाङ्कितं शब्दम् उद्दिश्य 'किम्'शब्दस्य उचितानि रूपाणि उपयुज्य प्रश्नवाक्यानि लिखत –

उदा – <u>रामः</u> पितृवाक्यपरिपालकः आसीत्।

**कः पितृवाक्यपरिपालकः आसीत् ?**

1. अरण्ये रामः <u>राक्षसान्</u> अमारयत् ।

   .............................................................. ?

2. रामः <u>लक्ष्मणेन सह</u> सीतान्वेषणम् अकरोत्।

   .............................................................. ?

3. <u>सीताविरहिताय</u> रामाय हनूमान् चूडामणिं दत्तवान्।

   .............................................................. ?

4. रावणः सीतां <u>पर्णकुटीरात्</u> अपहृतवान्।

   .............................................................. ?

5. सीता <u>रामस्य</u> प्रियपत्नी।

   .............................................................. ?

6. अयोध्यायाः प्रजानां <u>रामे</u> अपारविश्वासः आसीत्।

   .............................................................. ?

2. 'किम्' शब्दस्य नपुंसकलिङ्गरूपाणि स्मृत्वा लिखत –

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | किम् | के | कानि |
| *द्वितीयाविभक्तिः* | .................. | के | .................. |
| *तृतीयाविभक्तिः* | .................. | .................. | .................. |
| *चतुर्थीविभक्तिः* | कस्मै | .................. | .................. |
| *पञ्चमीविभक्तिः* | .................. | काभ्याम् | .................. |
| *षष्ठीविभक्तिः* | .................. | .................. | केषाम् |
| *सप्तमीविभक्तिः* | कस्मिन् | .................. | .................. |

www.thearyasamaj.org

3. उदाहरणानुगुणम् 'एतद्'शब्दस्य 'तद्'शब्दस्य वा उचितरूपैः रिक्तस्थानानि पूरयत –

एतद् / तद्

| | |
|---|---|
| एतद् | भवनं सुन्दरम् अस्ति। |
| ............ | लोकयानेषु सम्मर्दः अस्ति। |
| ............ | पुस्तकस्य मूल्यं विंशतिः रूप्यकाणि। |
| ............ | मन्दिरे दुर्गायाः पूजा भवति। |
| ............ | पर्वतात् नदी प्रवहति। |
| ............ | नदीजलं मलिनम् अस्ति। |
| ............ | तरुणयोः आदर्शगुणाः सन्ति। |
| ............ | मित्राय पत्रं लिखामि। |
| ............ | नगरं द्रष्टुं गच्छामि। |
| ............ | मित्राभ्यां सह अध्ययनं करोमि। |
| ............ | काव्यस्य कर्ता कालिदासः। |
| ............ | युवकेभ्यः क्रीडा रोचते। |
| ............ | फेनकेन स्नानं करोमि। |
| ............ | मित्रे स्तः। |
| ............ | वाक्यानि मया लिखितानि। |
| ............ | शिष्येषु गुरुः स्निह्यति। |

4. अधः काचित् कथा दत्ता अस्ति। तत्र मध्ये मध्ये कानिचित् स्थानानि रिक्तानि सन्ति। 'तद्'शब्दस्य उचितैः पुंलिङ्गरूपैः तानि स्थानानि पूरयत –

**सः** कश्चन संन्यासी। प्रतिदिनं समुद्रतीरे उपविश्य ध्यानकरणं ............ संन्यासिनः अभ्यासः। ............ समये सागरपक्षिणः तत्र आगत्य ध्यानमग्नं ............ परितः डयन्ते स्म। केचन पक्षिणः ............ संन्यासिनः स्कन्धयोः उपविश्यापि क्रीडन्ति स्म। संन्यासिनः तु ............ पक्षिणां विषये अवधानम् एव नासीत्।

कदाचित् कश्चन युवा तत्र आगतवान्। ............ ............ संन्यासिनं नमस्कृत्य उक्तवान् – "स्वामिन्! भवन्तं परितः तावन्तः समुद्रपक्षिणः क्रीडन्ति खलु! ............ पक्षिषु एकं पक्षिणं गृहीत्वा मह्यं ददातु" इति। संन्यासी "अस्तु" इति उक्तवान्। ............ ध्यानार्थम् उपविष्टवान् च। परन्तु अहो आश्चर्यम्! ............ दिने एकः अपि पक्षी ............ संन्यासिनः समीपं न आगतः।

www.thearyasamaj.org

सर्वेऽपि ............. ............. संन्यासिनः भीताः इव दूरे एव डयन्ते स्म । ............. संन्यासिने क्रुध्यन्तः इव ते दूरे एव स्थिताः । ............. पक्षिणां व्यवहारं दृष्ट्वा संन्यासी नितरां विस्मितः अभवत् । ततः 'यदि मम मनसि दुर्भावनाः भवन्ति तर्हि ........... पक्षिणः मम समीपं नागच्छन्ति' इति सः ज्ञातवान् ।

5. अस्मद्, तद्, एतद्, किम्, भवान् - इत्येतेषां सर्वनामशब्दानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत -



ग्राहकः - सुप्रभातम् । **अहं** युतकं क्रेतुम् इच्छामि ।

आपणिकः - अत्र आगच्छतु । ............. युतकानि पश्यतु । ............. ............. वर्णम् इच्छति ?

ग्राहकः - नीलं पीतं वा ।

आपणिकः - पश्यतु ............. वस्त्राणां वर्णः नीलः, ............. च पीतः ।

ग्राहकः - ............. वर्णः अपगच्छति वा इति..।

आपणिकः - कदापि न । ............. वस्त्राणां वर्णापगमः नैव भविष्यति ।

ग्राहकः - कथं तावता विश्वासेन वदति ........ ?

आपणिकः - ........... ........... अनुभवः श्रीमन् !

ग्राहकः - भवतु । ............. युतकं ददातु ।

आपणिकः - अन्यत् किं ददानि ?

www.thearyasamaj.org

ग्राहकः – अत्र शाटिकाः सन्ति किम् ?

आपणिकः – अथ किम् ? ............ सर्वाः शाटिकाः एव । पश्यतु ।

ग्राहकः – ............ शाटिकानां मूल्यम् अधिकम् इति भासते ।

आपणिकः – किन्तु ......... गुणवत्ता अपि अधिका अस्ति श्रीमन् ! यदि ............ इच्छति तर्हि अन्याः अपि शाटिकाः दर्शयामि । पश्यतु । ............ न्यूनमूल्यकाः । परन्तु ............ गुणवत्ताविषये ............ न प्रमाणम् । ............ दीर्घकालम् उपयोक्तुं योग्याः अपि नैव ।

ग्राहकः – .............किं मूल्यम् ?

आपणिकः – 150/– रूप्यकाणि ।

ग्राहकः – ........ ?

आपणिकः – 275/– रूप्यकाणि । परन्तु ........ गुणवत्तापि अधिका ।

ग्राहकः – चतुरः अस्ति ........ । ........ महार्घस्य वस्त्रस्य क्रयणे ........ विवशं करोति ।

आपणिकः – न तथा श्रीमन् ! सत्यं खलु वक्तव्यं ........ ? अग्रेऽपि ........ ........ आपणं प्रति आगन्तव्यं खलु ?

ग्राहकः – भवतु । ........ शाटिकामपि ददातु ।

आपणिकः – स्वीकरोतु । धन्यवादः ।

सूक्तिः – स सुहृद् व्यसने यः स्यात् ।

**विशेषः**

**प्रहेलिका**

1) वृक्षाग्रवासी न च पक्षिराजः त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी जलं च बिभ्रन्न घटो न मेघः ॥

एषः वृक्षस्य उपरि निवसति, किन्तु पक्षी न । एतस्य त्रीणि नेत्राणि सन्ति, किन्तु एषः न शिवः । एषः त्वग्वस्त्रं धरति, किन्तु न योगी । एषः जलं धरति, किन्तु न घटः, न वा जलधरः मेघः । एषः कः ?

2) अपदो दूरगामी च साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥

एतस्य पादौ न स्तः, परन्तु एषः दूरं गच्छति । अस्मिन् अक्षराणि भवन्ति, परन्तु न अयं पण्डितः । अस्य मुखमेव नास्ति, तथापि एषः विषयं सम्यक् निवेदयति । अयं कः इति यः जानाति सः पण्डितः ।

उत्तरम् – 1) नारिकेलम् 2) पत्रम्

www.thearyasamaj.org

# ९ धीरा बाला

सर्वनामशब्दाः (स्त्रीलिङ्गे)

एतां घटनाम् उच्चैः पठत, अवगच्छत च –



**इयम्** एका नगरी। **अस्याः** नगर्याः मध्ये काचित् नदी प्रवहति। **इमां** नदीम् उभयतः वृक्षलताभिः सङ्कीर्णः कश्चन सुन्दरप्रदेशः दृश्यते। नद्याः अपरपार्श्वे प्रतिवर्षं काचित् मेला आयोजिता भवति। **तस्यां** मेलायां भागं ग्रहीतुं बहुभ्यः ग्रामेभ्यः जनाः नदीं तीर्त्वा आगच्छन्ति स्म।

कदाचित् पञ्चदशवर्षीया काचित् बाला पित्रा सह **तां** मेलां प्रति प्रस्थिता आसीत्। **सा** बाला अल्पे एव वयसि विविधासु विद्यासु पारङ्गता आसीत्। **सा** चतुरमतिः धैर्यशालिनी च। नौकया **तयोः** प्रयाणम् आरब्धम्। **तस्यां** नौकायाम् अन्येऽपि बहवः आसन्। यदा नौका नद्याः मध्यभागम् आगता तदा **तस्याः** नद्याः अपरस्मात् भागात् भीत्या त्वरया च जले तरन्तौ आगच्छन्तौ कौचित् दृष्टौ। नद्यां कश्चन मकरः आसीत्। **सः तौ** अनुधावन् आगच्छन् आसीत्। **अस्यां** नौकायां स्थिताः **सर्वे** आत्मनः विपदः शङ्कया नाविकम् अवदन् – "भोः, कृपया नौकां वेगेन अग्रे चालयतु" इति।

**सर्वेषां** मुखे भयस्य आतङ्कस्य च छाया दृश्यते स्म। **अस्याः** बालायाः मुखे अपि भीतिः आसीत्। **तस्याः** भीत्याः कारणं तु न स्वविषयकचिन्ता, अपि तु **तयोः** रक्षणं कथं स्यात् इत्येव। **तयोः** क्रन्दनं श्रुतवत्याः **तस्याः** मनः दयार्द्रम् अभवत्। **तौ** रक्षणीयौ एव इति सङ्कल्प्य **सा** पितरम् अपश्यत्। ततः **तेन** निवारिता अपि **सा** जले कूर्दितवती एव। मीनः इव तरन्ती **सा तयोः** हस्तौ दृढतया गृहीत्वा नौकां प्रति आनीतवती। **इमां** घटनां दृष्ट्वा **सर्वे**ऽपि आश्चर्येण स्तब्धाः अभवन्। **तस्याः** पिता अपि **ताम्** अभिनन्दितवान्। **तस्याः** साहसं बहुधा अश्लाघत च।

बाल्यावस्थायामेव एतादृशं साहसं प्रदर्शितवती **सा** एव भारतस्वातन्त्र्यसङ्ग्रामे महाकाली इव युद्ध्वा आङ्ग्लेयान् प्रकम्पितवती लक्ष्मीबायी। 'क्रान्तिकारिणां **सर्वेषां** मध्ये अत्यन्तं साहसवती, सर्वेभ्यः अत्युत्तमा सेनानेत्री च राज्ञी लक्ष्मीबायी' इति **तस्याः** विषये वदति **तया** सह युद्धं कृतवत्सु आङ्ग्लेयसेनामुख्येषु अन्यतमः सर् रोज्नामकः।

www.thearyasamaj.org

एतानि वाक्यानि सावधानतया उच्चैः पठत –

इयं मम भगिनी।
इयं महाविद्यालये अध्यापिका अस्ति।
इमाम् अहम् आचार्ये इति आह्वयामि।
अनया लिखितानि चित्राणि सुन्दराणि सन्ति।
अस्यै रसगोलकम् अत्यन्तं रोचते।
अस्याः छात्राः बिभ्यति।
अस्याः प्रियनाटकम् उत्तररामचरितम्।
अस्यां मम महान् आदरः।

## 'इदम्'शब्दः (स्त्रीलिङ्गरूपाणि)

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | इयम् | इमे | इमाः |
| *द्वितीयाविभक्तिः* | इमाम् | इमे | इमाः |
| *तृतीयाविभक्तिः* | अनया | आभ्याम् | आभिः |
| *चतुर्थीविभक्तिः* | अस्यै | आभ्याम् | आभ्यः |
| *पञ्चमीविभक्तिः* | अस्याः | आभ्याम् | आभ्यः |
| *षष्ठीविभक्तिः* | अस्याः | अनयोः | आसाम् |
| *सप्तमीविभक्तिः* | अस्याम् | अनयोः | आसु |

## अभ्यासः

1. उदाहरणानुसारम् एतद्–तद्शब्दयोः स्त्रीलिङ्गरूपैः रिक्तस्थानानि पूरयत–

1. (तत्) <u>तया</u> कर्तर्या सौचिकः वस्त्रं कर्तितवान्।
2. (एतत्) ............ द्रोण्यां पेयं जलम् अस्ति।
3. (एतत्) ............ मापिकायाः मूल्यं दश रूप्यकाणि।
4. (तत्) ............ उत्पीठिकायां शिबिरवस्तूनि स्थापनीयानि।
5. (एतत्) ............ सह अन्या भगिनी आगता अस्ति। (तत्) ....... का ?

www.thearyasamaj.org

6. (तत्) ............. सख्याः स्वभावः सरलः अस्ति ।
7. (एतत्) ............. लेखन्या लिखतु भवान् ।
8. (तत्) ............. कथायां वीरवनितानां चरित्रचित्रणम् अस्ति ।
9. (एतत्) ............. वीथी साक्षात् मन्दिरं नयति ।
10. (तत्) ............. बालिकासु दुर्बुद्धिः नास्ति ।
11. (एतत्) ............. भगिन्यै मुख्यमन्त्री पारितोषिकं दत्तवान् ।
12. (एतत्) ............. कथाम् अहं दशवारं पठितवान् ।
13. (एतत्) ............. वर्णलेखनीभिः चित्रं रचयामः ।
14. (तत्) ............. टीकानां कर्ता मल्लिनाथः ।
15. (एतत्) ............. भारतीयसंस्कृत्यां महद् वैशिष्ट्यम् अस्ति ।

2. अधः कतिचन वाक्यानि सन्ति । तेषु अधोरेखाङ्कितं शब्दम् उद्दिश्य 'किम्' शब्दस्य स्त्रीलिङ्गरूपाणि उपयुज्य प्रश्नवाक्यानि लिखत –

1. सीता <u>जनकपुत्री</u> आसीत् ।
   **सीता का आसीत् ?**
2. जनकः भूमौ <u>सीतां</u> प्राप्तवान् ।
   ............................................. ?
3. <u>सीतया</u> सह रामस्य विवाहः अभवत् ।
   ............................................. ?
4. हनुमान् <u>सीतायै</u> अङ्गुलीयकं दत्तवान् ।
   ............................................. ?
5. रामः <u>सीतायाः</u> ऋते एकवर्षम् अवसत् ।
   ............................................. ?
6. <u>सीतायाः</u> प्रियः श्रीरामः ।
   ............................................. ?
7. <u>सीतायाम्</u> आदर्शनारीगुणाः सन्ति ।
   ............................................. ?

www.thearyasamaj.org

3. प्रथमवाक्ये प्रयुक्तस्य सर्वनामशब्दस्य एव उचितं रूपं द्वितीये वाक्ये रिक्तस्थाने लिखत-

1. अयं वृक्षः। **अस्य** वृक्षस्य फलं मधुरं भवति।
   (अस्य, अस्याः, तस्य)
2. ताः नर्तक्यः। ............. नर्तकीनां नृत्यम् अद्य आयोजितम् अस्ति।
   (एतेषाम्, एतासाम् , तासाम् )
3. तौ चतुरौ। ............. चतुराभ्यां पारितोषिकं ददामि।
   (एताभ्याम्, ताभ्याम् , तेभ्यः)
4. इमे मम सुहृदः। ............. सुहृदः अहं कदापि न विस्मरामि।
   (इमौ, तान् , इमान्)
5. सा नदी। ............. नद्यां बहवः नक्राः सन्ति।
   (तस्मिन् , तस्याम् , एतस्याम्)
6. एते छात्राः। ............. छात्रेषु कः चतुरः स्यात् ?
   (एतेषु, एषु, तेषु)
7. सः पर्वतः। ............. पर्वतात् तिस्रः नद्यः उद्भवन्ति।
   (अस्मात् , तस्मात् , अस्मत्)
8. इमे शिक्षिके। ............. शिक्षिकयोः पाठनेन छात्राः तुष्यन्ति।
   (अनयोः, एतयोः, एतासाम्)
9. ते आचार्याः। ............. आचार्यान् वयं प्रणमामः।
   (एतान् , इमान् , तान्)
10. इदं पुस्तकम्। ............. पुस्तके बहूनि चित्राणि सन्ति।
    (एतस्मिन् , अस्मिन् , तस्मिन्)
11. ताः धेनवः। ............. धेनुषु एका धेनुः कपिला अस्ति।
    (तासु, एतासु, तेषु)
12. एषः बालः। ............. बालाय किमपि न रोचते।
    (अस्मै, एतस्मै, एतस्यै)

www.thearyasamaj.org

13. तानि फलानि । ............ फलेभ्यः एकं भवान् स्वीकरोतु ।
(ताभ्यः, तेभ्यः, एभ्यः)

14. इमे मयूराः । ............ मयूरैः रुचिरं नृत्यते ।
(ताभिः, एभिः, आभिः)

15. ते घटाः । ............ घटानां वर्णः समानः ।
(तासाम् , तेषाम् , एषाम् )

16. इमानि चित्राणि । ............ चित्रेभ्यः एकं पृथक् स्थापयतु ।
(एभ्यः, एताभ्यः, आभ्यः)

17. इमाः नलिकाः । ............ नलिकाभ्यः जलं स्रवति ।
(आभ्यः, एभ्यः, ताभ्यः)

18. अयं मार्गः । ............ मार्गेण गच्छति चेत् भवान् नगरं प्राप्नोति ।
(एतेन, अनेन, अनया)

19. इमे वाहने । ............ वाहनयोः भवत्यै किं रोचते ?
(एनयोः, अनयोः, आवयोः)

20. एताः शाटिकाः । ............ शाटिकानां विन्यासः मनोहरः अस्ति।
(आसाम्, एतासाम्, तासाम्)

21. एतौ महाविद्यालच्छात्रौ । ............ छात्राभ्यां सह वार्तालापं कुर्मः ।
(आभ्याम्, आवाभ्याम्, एताभ्याम्)

22. इयं मम लेखनी । ............ लेखन्यै पञ्चविंशतिं रूप्यकाणि अददाम् ।
(अस्मै, अस्यै, एतस्यै)

23. इमौ चषकौ । ............ चषकाभ्याम् अतिथिभ्यः फलरसं देहि ।
(एताभ्याम्, आभ्याम्, एभ्याम्)

सूक्तिः – क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ।

www.thearyasamaj.org

# गणनां कुर्मः १०

## सङ्ख्यासु लिङ्गभेदः (विशेषणविशेष्यभावः)


पुंलिङ्गे




एकः बालकः ।



द्वौ युवकौ ।



त्रयः छात्राः ।



चत्वारः पत्रकाराः ।



पञ्च वैद्याः ।

स्त्रीलिङ्गे




एका बालिका ।




द्वे महिले ।



तिस्रः नर्तक्यः ।



चतस्रः कूप्यः ।




पञ्च द्रोण्यः ।


नपुंसकलिङ्गे




एकं दूरदर्शनम् ।




द्वे फले ।



त्रीणि पुष्पाणि ।



चत्वारि छत्राणि ।



पञ्च कङ्कतानि

www.thearyasamaj.org

पठत अवगच्छत च –

| प्रातिपदिकम् | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| एक | एकः | एका | एकम् |
| द्वि | द्वौ | द्वे | द्वे |
| त्रि | त्रयः | तिस्रः | त्रीणि |
| चतुर् | चत्वारः | चतस्रः | चत्वारि |
| पञ्चन् | पञ्च | पञ्च | पञ्च |
| षष् | षट् | षट् | षट् |
| सप्तन् | सप्त | सप्त | सप्त |
| अष्टन् | अष्ट | अष्ट | अष्ट |
| नवन् | नव | नव | नव |
| दशन् | दश | दश | दश |

## अवधेयम्

- एकं, द्वे, त्रीणि, चत्वारि – इत्यादयः सङ्ख्यावाचकशब्दाः अपि विशेषणानि भवन्ति।
- एकं, द्वे, त्रीणि, चत्वारि – इत्येतेषां चतुर्णाम् एव त्रिषु लिङ्गेषु भिन्नानि रूपाणि भवन्ति। ततः अग्रे त्रिषु अपि लिङ्गेषु समानं रूपं भवति।
- पञ्च इत्यतः आरभ्य नवदशपर्यन्तं सङ्ख्यावाचकशब्दाः नित्यबहुवचनान्ताः भवन्ति।
- 'अष्टन्'शब्दस्य अष्ट अष्टौ इति रूपद्वयं भवति।
- विंशतितः नवनवतिपर्यन्तं सर्वेऽपि सङ्ख्यावाचकशब्दाः एकवचनान्ताः स्त्रीलिङ्गाश्च भवन्ति।
- 'शतम्' शब्दः नपुंसकः पुंलिङ्गश्च।

www.thearyasamaj.org

पठत अवगच्छत च –

'एक'शब्दः

| | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| प्रथमाविभक्तिः | एकः | एका | एकम् |
| द्वितीयाविभक्तिः | एकम् | एकाम् | एकम् |
| तृतीयाविभक्तिः | एकेन | एकया | ......... |
| चतुर्थीविभक्तिः | एकस्मै | एकस्यै | ......... |
| पञ्चमीविभक्तिः | एकस्मात् | एकस्याः | ......... |
| षष्ठीविभक्तिः | एकस्य | एकस्याः | ......... |
| सप्तमीविभक्तिः | एकस्मिन् | एकस्याम् | ......... |

(शेषं पुंलिङ्गवत्)

'द्वि'शब्दः

| पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे | |
|---|---|---|---|
| द्वौ | द्वे | द्वे | प्रथमाविभक्तिः |
| द्वौ | द्वे | द्वे | द्वितीयाविभक्तिः |
| द्वाभ्याम् | *......... | *......... | तृतीयाविभक्तिः |
| द्वाभ्याम् | ......... | ......... | चतुर्थीविभक्तिः |
| द्वाभ्याम् | ......... | ......... | पञ्चमीविभक्तिः |
| द्वयोः | ......... | ......... | षष्ठीविभक्तिः |
| द्वयोः | ......... | ......... | सप्तमीविभक्तिः |

(शेषं पुंलिङ्गवत्)

'त्रि'शब्दः

| | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| प्रथमाविभक्तिः | त्रयः | तिस्रः | त्रीणि |
| द्वितीयाविभक्तिः | त्रीन् | तिस्रः | त्रीणि |
| तृतीयाविभक्तिः | त्रिभिः | तिसृभिः | *......... |
| चतुर्थीविभक्तिः | त्रिभ्यः | तिसृभ्यः | ......... |
| पञ्चमीविभक्तिः | त्रिभ्यः | तिसृभ्यः | ......... |
| षष्ठीविभक्तिः | त्रयाणाम् | तिसृणाम् | ......... |
| सप्तमीविभक्तिः | त्रिषु | तिसृषु | ......... |

(शेषं पुंलिङ्गवत्)

www.thearyasamaj.org

'चतुर्'शब्दः

| | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| प्रथमाविभक्तिः | चत्वारः | चतस्रः | चत्वारि |
| द्वितीयाविभक्तिः | चतुरः | चतस्रः | चत्वारि |
| तृतीयाविभक्तिः | चतुर्भिः | चतसृभिः | * ......... |
| चतुर्थीविभक्तिः | चतुर्भ्यः | चतसृभ्यः | ......... |
| पञ्चमीविभक्तिः | चतुर्भ्यः | चतसृभ्यः | ......... |
| षष्ठीविभक्तिः | चतुर्णाम् | चतसृणाम् | ......... |
| सप्तमीविभक्तिः | चतुर्षु | चतसृषु | ......... |

'पञ्चन्'शब्दः

| | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| प्रथमाविभक्तिः | पञ्च | * ......... | * ......... |
| द्वितीयाविभक्तिः | पञ्च | ......... | ......... |
| तृतीयाविभक्तिः | पञ्चभिः | ......... | ......... |
| चतुर्थीविभक्तिः | पञ्चभ्यः | ......... | ......... |
| पञ्चमीविभक्तिः | पञ्चभ्यः | ......... | ......... |
| षष्ठीविभक्तिः | पञ्चानाम् | ......... | ......... |
| सप्तमीविभक्तिः | पञ्चसु | ......... | ......... |

* यत्र 'पुंलिङ्गवत्' इति लिखितम् अस्ति तत्र पुलिङ्गरूपाणि दृष्ट्वा रिक्तस्थानानि पूरयत –

## अभ्यासः

1. 'एक'शब्दस्य रूपाणां साहाय्येन वाक्यानि पूरयत –

1. ............ शिष्यः अस्ति ।
2. सः सदा ............ मन्त्रं जपति स्म ।
3. ............ शिष्येण एव आचार्यः तुष्टः अभवत् ।
4. सः शिष्यः ............ अतिथये भोजनं ददाति ।
5. सः .............. आचार्यात् विद्यां प्राप्नोति ।
6. सः ............... ग्रन्थस्य सर्वान् श्लोकान् जानाति ।
7. सः ............... उटजे वसति ।

| |
|---|
| एकेन |
| एकस्य |
| एकः |
| एकस्मै |
| एकम् |
| एकस्मात् |
| एकस्मिन् |

www.thearyasamaj.org

2. आवरणे विद्यमानस्य सङ्ख्यावाचकस्य उचितं रूपं रिक्तस्थाने लिखत –

1. द्वे (द्वि) गायिके गायतः ।
2. ................ (त्रि) अपि पुत्रीषु माता स्निह्यति ।
3. वयं ..................... (चतुर् ) वेदान् अपि पठामः ।
4. .................. (त्रि) पुरुषैः साधितम् इदं कार्यम् ।
5. .................. (द्वि) वृक्षाभ्यां फलानि पतन्ति ।
6. .................. (पञ्च) छात्रेषु कः प्रथमस्थानं प्राप्नुयात् ?
7. .................. (चतुर्) कर्मकरेभ्यः वेतनं ददातु ।
8. प्रयागे .................. (त्रि) नदीनां सङ्गमः भवति ।
9. मृगाः .................. (चतुर् ) पादैः सञ्चरन्ति ।
10. मासे .................. (द्वि) पक्षौ भवतः ।
11. .................. (पञ्च) इन्द्रियाणां प्रवर्तने मनः एव कारणम् ।
12. .................. (चतुर्) युगानि सन्ति ।
13. रामः .................. (त्रि) अपि मातॄणां प्रियः पुत्रः आसीत् ।
14. वाप्यां .................. (द्वि) कमले विकसिते स्तः ।
15. छत्रपतेः शिवराजस्य यशः .................. (चतुर्) दिक्षु अपि प्रसृतम् ।

3. विशेष्यम् अनुसृत्य विशेषणस्य सङ्ख्यावाचकशब्दस्य उचितेन रूपेण रिक्तस्थानं पूरयत –

1. एका (1) गायिका गायति ।
2. .......... (3) वानराः क्रीडन्ति ।
3. .......... (2) पुस्तके स्तः ।
4. .......... (5) सेवकाः सन्ति ।
5. .......... (5) कमलानि सन्ति ।
6. .......... (1) पुष्पं पतति ।
7. .......... (3) धेनवः चरन्ति ।
8. .......... (5) मार्जालाः धावन्ति ।
9. .......... (2) लेखन्यौ स्तः ।
10. .......... (4) उपवेदाः सन्ति ।
11. ..........(3) कन्दुकानि क्रीणामि ।
12. .......... (1) वृद्धः गच्छति ।
13. ..........(5) फलानि सः चिनोति ।
14. .......... (2) युवकौ क्रीडतः ।
15. .......... (4) ते उत्पीठिकाः स्थापयन्ति ।
16. .......... (8) आसन्दाः सन्ति ।
17. .......... (7) वर्णान् लेपयति वर्णकारः ।
18. .......... (10) अङ्गुल्यः सन्ति ।
19. ..........(6) महाविद्यालयाः विद्यन्ते ।
20. .......... (9) रसाः सन्ति ।

www.thearyasamaj.org

4. कोष्ठके विद्यमानानि पदानि चित्वा रिक्तस्थानेषु योजयत –

1. अद्य मम गृहं प्रति **त्रयः** अतिथयः आगताः।
2. तस्मिन् ग्रामे ............... संस्कृतगृहाणि सन्ति।
3. भवान् .............. हस्ताभ्यां मा खादतु।
4. ............... मासेषु चैत्रः प्रथमः।
5. ............... लतायाम् एव पुष्पाणि सन्ति।
6. .................. नर्तकीनां नृत्यं पश्य।
7. .................. काव्यानां लेखनेन सः विख्यातः।
8. सः राजा ................ वीरैः सह युद्धं कृतवान्।
9. .............. ग्रामेभ्यः जनाः आगतवन्तः।
10. ............... बालिकाभ्यः पारितोषिकं दत्तवान्।
11. भारतस्य यशः ............... दिक्षु व्याप्तम् आसीत्।
12. सा आपणतः .............. लेखनीः क्रीणाति।

एकस्यां
षड्भ्यः
दशभिः
तिसृणां
त्रयः
चतसृषु
द्वाभ्यां
चतसृभ्यः
चत्वारि
द्वादशसु
पञ्चानां
तिस्रः

5. आवरणे विद्यमानसङ्ख्यानुगुणं रिक्तस्थानं पूरयत –

**एकस्मिन्** (1) ग्रामे ........... (4) युवकाः आसन्। ते ........... (4) अपि विविधशास्त्राणि जानन्ति स्म। तेषु ........... (4) युवकेषु ........... (1) युवकं विहाय अन्ये ........... (3) युवकाः मूर्खाः आसन्। कदाचित् ते ........... (1) वनमार्गेण गच्छन्ति स्म। तदा ........... (1) वृक्षस्य अधः ........... (1) सिंहस्य मृतशरीरं दृष्टवन्तः।

मृतं सिंहं दृष्ट्वा ........... (4) युवकेषु ........... (1) युवकः उक्तवान् – "मित्राणि! अस्माकं शास्त्रज्ञानस्य परीक्षणार्थम् उत्तमः अवसरः प्राप्तः। वयं मन्त्रशक्तिप्रयोगेण एनं मृतं सिंहं सजीवं कारयामः" इति।

तत् श्रुत्वा ........... (2) युवकौ तस्य वचनम् अङ्गीकृतवन्तौ। परन्तु बुद्धिमान् युवकः तेषां निर्णयं न अङ्गीकृतवान्। सः तान् ........... (3) अपि सुहृदः उक्तवान् –"भोः, कृपया एनं सिंहं मा जीवयन्तु। यदा सः प्राणान् धारयति तदा अस्मान् ........... (4) अपि मारयति। अतः एतम् उद्यमं परित्यजन्तु" इति।

www.thearyasamaj.org

परन्तु ........... (3) अपि मूर्खाः तस्य वचनं न श्रुतवन्तः । ते सिंहं जीवयितुम् आरभन्त । तदा बुद्धिमान् युवकः समीपस्थम् ........... (1) वृक्षम् आरुह्य उपविष्टवान् । ततः तेषां ........... (3) युवकानां मन्त्रप्रयोगेण सिंहः प्राणान् अधरत् । नितरां बुभुक्षितः सः झटिति एव तान् ........... (3) अपि युवकान् अमारयत् ।

6. कोष्ठके कानिचन पदानि सन्ति । तेषु भवतां गृहे कानि कानि कति सन्तीति लिखत –

| |
|---|
| भ्रातरः, भगिन्यः, प्रकोष्ठाः, व्यजनानि, आसन्दाः, अजाः, धेनवः, कुक्कुटाः, वृषभाः, पुस्तकानि, दण्डदीपाः, द्रोण्यः, द्वाराणि, वातायनानि, दर्व्यः, आच्छादकानि, घट्यः, स्यूताः |

उदा – **मम गृहे षोडश आसन्दाः सन्ति ।**

1. ........................................................................ ।
2. ........................................................................ ।
3. ........................................................................ ।
4. ........................................................................ ।
5. ........................................................................ ।
6. ........................................................................ ।
7. ........................................................................ ।
8. ........................................................................ ।
9. ........................................................................ ।
10. ........................................................................ ।
11. ........................................................................ ।
12. ........................................................................ ।
13. ........................................................................ ।
14. ........................................................................ ।
15. ........................................................................ ।

www.thearyasamaj.org

एतानि सुभाषितानि पठत अवगच्छत च –

एक एव खगो मानी वने वसति चातकः ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥

*वने वसत्सु पक्षिषु चातकपक्षी अत्यन्तं स्वाभिमानी । सः जलार्थं भगवन्तम् इन्द्रमेव याचते , न तु अन्यं कमपि । पिपासया मरणावस्थामेव प्राप्नुयात् चेदपि सः इन्द्रात् अन्यं न याचते ।*

विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥

*यत् किमपि कार्यं साधयितुं शस्त्रं शास्त्रं चेति विद्याद्वयं वर्तते । प्रथमा शस्त्रविद्या वार्धक्ये हास्यास्पदं भवति । परं द्वितीया शास्त्रविद्या सदैव गौरवास्पदं भवति ।*

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

*भूमौ जलम् अन्नं सुभाषितं चेति त्रीणि रत्नानि सन्ति । किन्तु मूढाः जनाः पाषाणखण्डान् एव रत्नानि मन्यन्ते ।*

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥

*ज्येष्ठानाम् अभिवादनस्य स्वभावः यस्य अस्ति, यः वयोवृद्धानां ज्ञानवृद्धानां च सेवनं करोति तस्य आयुः, विद्या, यशः बलं चेति एतानि चत्वारि वर्धन्ते ।*

पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह ।
पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह ॥

*बुद्धिमता जनेन पञ्चभिः जनैः सह गमनं करणीयम् । पञ्चभिः (बहुभिः) जनैः सह स्थातव्यं, वक्तव्यं च । एवं पञ्चभिः(बहुभिः) सह जीवनेन कदापि दुःखं न भवति ।*

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ॥

*परिश्रमः, साहसं, धैर्यं, बुद्धिः, शक्तिः, पराक्रमः इत्येते षड् गुणाः यत्र सन्ति तत्र ईश्वरः साहाय्यं करोति ।*

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥

www.thearyasamaj.org

*अयोध्या, मथुरा, माया (हरिद्वारम्), काशी, काञ्ची ,अवन्तिका (उज्जयिनी), द्वारका – इत्येतानि सप्त नगराणि मोक्षदायकानि सन्ति।*

उरसा शिरसा दृष्ट्या मनसा वचसा तथा।
पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥

*वक्षःस्थलेन, मस्तकेन, दृष्ट्या, मनसा, वाचा, पादाभ्यां, हस्ताभ्यां कर्णाभ्यां च क्रियमाणः नमस्कारः साष्टाङ्गनमस्कारः इति कथ्यते।*

लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥

*पुत्रः यावत् पञ्चवर्षीयः भवति तावत् लालनीयः। सः यावत् दशवर्षीयः भवति तावत् दण्डनीयः। यदा सः षोडशवर्षीयः भवति तदा तेन सह मित्रवत् व्यवहारः करणीयः।*

सूक्तिः – मन एव मनुष्याणां कारणं बन्धमोक्षयोः।

विशेषः

## लौकिकन्यायाः

प्रस्तुतं कमपि विषयं स्पष्टीकर्तुं संस्कृतसाहित्ये लौकिकन्यायानां प्रयोगः क्रियते। एतादृशाः शताधिकाः न्यायाः शास्त्रेषु काव्येषु च तत्र तत्र प्रयुक्ताः दृश्यन्ते।

1. **अन्धपरम्परान्यायः**

यदा कोऽपि जनः स्वबुद्ध्या अविचार्य अन्धः इव अन्येषाम् अनुकरणं करोति तदा एषः न्यायः प्रयुज्यते। सः न चिन्तयति यत् एतत् अनुकरणं स्वम् अन्धकारं प्रति नयति।

2. **अरुन्धतीदर्शनन्यायः**

यः अरुन्धतीनामकं तारकं प्रदर्शयितुम् इच्छति सः पूर्वम् अरुन्धत्याः समीपस्थं स्थूलम् अमुख्यं तारकं निर्दिशति। पश्चात् अरुन्धतीं ग्राहयति। एवं यदा सूक्ष्मः पदार्थः स्थूलेन पदार्थेन निर्दिश्यते तदा एषः न्यायः प्रयुज्यते।

3. **स्थालीपुलाकन्यायः**

यः ओदनं पचति सः ओदनः पक्वः न वा इति ज्ञातुं स्थाल्यां विद्यमानेभ्यः पुलाककणेभ्यः कमपि एकं सङ्गृह्य परीक्षते। एकस्य कणस्य परीक्षणेन एव सर्वस्य ज्ञानं भवति। अत्र प्रत्येकं कणस्य परीक्षणस्य आवश्यकता न भवति। एवं परीक्षणविषयकीं व्यक्तिं निर्देष्टुम् एषः न्यायः प्रयुज्यते।

www.thearyasamaj.org

# ११ अस्माकं राष्ट्रियदिनदर्शिका

**पूरणप्रत्ययान्ताः**



एतत् सम्भाषणम् उच्चैः पठत, अवगच्छत च –

सुधा – भगिनि ! किं कुर्वती अस्ति भवती ?

वसुधा – अहम् एकां दिनदर्शिकां रचयन्ती अस्मि ।

सुधा – भोः! अधुना विपण्यां विविधाः दिनदर्शिकाः लभ्यन्ते खलु ? पुनः निर्माणं किमर्थम् ?

वसुधा – एषा किञ्चित् भिन्ना अस्ति । अस्यां सर्वे भारतीयाः उत्सवाः, महापुरुषाणां जन्मतिथयः ऐतिहासिकमुहूर्ताश्च उल्लिखिताः सन्ति । तेन राष्ट्रस्य विषये ज्ञानं सुकरं भवेत् ।

सुधा – अतीव शोभनम् । भवती तत् दर्शयतु तावत् ।

वसुधा – ततः पूर्वं भवत्याः परीक्षां करोमि । भवती मम प्रश्नानाम् उत्तरं वदेत् ।

सुधा – अस्तु ।

वसुधा – स्वातन्त्र्यदिनोत्सवः कदा भवति ?

सुधा – कः न जानाति भोः ? अगस्तमासस्य **पञ्चदशे** दिनाङ्के ।

वसुधा – सुधे ! तर्हि गणेशोत्सवः कदा ?

सुधा – **चतुर्थ्यां** तिथौ इति तु जानामि । किन्तु मासं तु न स्मरामि ।

वसुधा – भवतु, अहमेव वदामि । भाद्रपदमासस्य शुक्लपक्षे **चतुर्थ्यां** तिथौ गणेशोत्सवः ।

सुधा – अस्तु । कः **तृतीयः** प्रश्नः ?

वसुधा – छत्रपतेः शिवराजस्य जन्म फाल्गुनमासस्य **द्वितीयायां** तिथौ, उत **तृतीयायां** तिथौ ?

सुधा – **तृतीयायां** तिथौ एव, न तु **द्वितीयायां** तिथौ ।

वसुधा – समीचीनम् उत्तरम् उक्तवती भवती । तर्हि एतद् वदतु, वयं नवरात्रोत्सवं कदा आचरामः ?

सुधा – आश्वयुजमासस्य शुक्लपक्षे **प्रथमायाः** तिथेः आरभ्य **नवमीं** तिथिं यावद् नवरात्रम्

www.thearyasamaj.org

आचरामः । तत्र **अष्टमी** तिथिः 'दुर्गाष्टमी' इति, **नवमी** तिथिः 'महानवमी' इति, **दशमी** तिथिः 'विजयदशमी' इति च विख्याताः ।

वसुधा - किमर्थं **दशमीं** तिथिं विजयदशमीं वदन्ति ?

सुधा - **दशम्यां** तिथौ एव दुर्गादेवी महिषासुरं हतवती । अतः देव्याः विजयकारणात् **दशमीं** तिथिं तथा वदामः । एतावता भवती मां प्रश्नैः पीडितवती । इदानीम् अहमपि किञ्चित् पृच्छामि ।

वसुधा - पृच्छतु तावत् ।

सुधा - चैत्रमासस्य **प्रथमायाः** तिथेः वैशिष्ट्यं किम् ?

वसुधा - चैत्रमासस्य **प्रथमायां** तिथौ एव 'युगादिपर्व' भवति ।

सुधा - सखि ! आषाढमासस्य **चतुर्दश्यां** तिथौ कोऽपि विशेषः अस्ति किम् ?

वसुधा - **चतुर्दश्याः** तिथेः विषये मम ज्ञानं नास्ति । परन्तु आषाढमासस्य पूर्णिमायाम् एव 'व्यासजयन्ती' इति जानामि । 'गुरुपूर्णिमा' इत्येव तस्याः प्रसिद्धिः ।

वसुधा - अस्तु भगिनि ! भवती अपि दिनदर्शिकायाः निर्माणे साहाय्यं करोतु ।

सुधा - निश्चयेन करोमि । वदतु, मया किं करणीयम् ?

वसुधा - भवती एतानि पत्राणि गृह्णातु । **प्रथमे** पत्रे उत्सवानाम् आवलिः अस्ति । **द्वितीये** पत्रे महापुरुषाणां जन्मतिथयः लिखिताः सन्ति । **तृतीयं** पत्रम् इदानीं न आवश्यकम् । तत् पार्श्वे स्थापयतु ।

सुधा - तथैव करोमि ।

वसुधा - भवती **प्रथमं** पत्रं **द्वितीयं** पत्रं च दृष्ट्वा कस्यां तिथौ कस्मिन् दिनाङ्के च किं भवति इति सूचयतु । अहं लिखामि ।

सुधा - अस्तु, एप्रिल्मासस्य **चतुर्दशे** दिनाङ्के अम्बेडकरजयन्ती भवति । श्रावणमासस्य कृष्णपक्षस्य **अष्टम्यां** तिथौ श्रीकृष्णजयन्ती भवति । तस्मिन्नेव मासे पूर्णिमायां संस्कृतदिनमपि भवति ।

वसुधा - भगिनि ! श्वः **द्वादशः** दिनाङ्कः खलु, मम परीक्षाः आरप्स्यन्ते । मया पठनीयम् अस्ति । अतः गच्छानि किम् ?

वसुधा - भवतु, भवती सम्यक् पठतु । पुनः कदा आगमनं भवेत् भवत्याः ?

सुधा - **षोडशे** दिनाङ्के आगमिष्यामि । यतः **पञ्चदशं** दिनाङ्कं यावत् मम परीक्षाः भविष्यन्ति ।

वसुधा - अस्तु, पुनर्मिलाव ।

www.thearyasamaj.org

पठत, अवगच्छत च –

| पूरणप्रत्ययान्ताः | | | |
|---|---|---|---|
| सङ्ख्या | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
| 1 | प्रथमः | प्रथमा | प्रथमम् |
| 2 | द्वितीयः | द्वितीया | द्वितीयम् |
| 3 | तृतीयः | तृतीया | तृतीयम् |
| 4 | चतुर्थः | चतुर्थी | चतुर्थम् |
| 5 | पञ्चमः | पञ्चमी | पञ्चमम् |
| 6 | षष्ठः | षष्ठी | षष्ठम् |
| 7 | सप्तमः | सप्तमी | सप्तमम् |
| 8 | अष्टमः | अष्टमी | अष्टमम् |
| 9 | नवमः | नवमी | नवमम् |
| 10 | दशमः | दशमी | दशमम् |
| 11 | एकादशः | एकादशी | एकादशम् |
| 12 | द्वादशः | द्वादशी | द्वादशम् |
| 13 | त्रयोदशः | त्रयोदशी | त्रयोदशम् |
| 14 | चतुर्दशः | चतुर्दशी | चतुर्दशम् |
| 15 | पञ्चदशः | पञ्चदशी | पञ्चदशम् |
| 16 | षोडशः | षोडशी | षोडशम् |
| 17 | सप्तदशः | सप्तदशी | सप्तदशम् |
| 18 | अष्टादशः | अष्टादशी | अष्टादशम् |
| 19 | नवदशः | नवदशी | नवदशम् |
| 20 | विंशतितमः | विंशतितमी | विंशतितमम् |
| 30 | त्रिंशत्तमः | त्रिंशत्तमी | त्रिंशत्तमम् |
| 40 | चत्वारिंशत्तमः | चत्वारिंशत्तमी | चत्वारिंशत्तमम् |
| 50 | पञ्चाशत्तमः | पञ्चाशत्तमी | पञ्चाशत्तमम् |
| 60 | षष्टितमः | षष्टितमी | षष्टितमम् |
| 70 | सप्ततितमः | सप्ततितमी | सप्ततितमम् |
| 80 | अशीतितमः | अशीतितमी | अशीतितमम् |
| 90 | नवतितमः | नवतितमी | नवतितमम् |
| 100 | शततमः | शततमी | शततमम् |

www.thearyasamaj.org

## अवधेयम्

- प्रथमः, द्वितीयः, तृतीयः – इत्यादयः पूरणप्रत्ययान्ताः इति उच्यन्ते।
  (एकं, द्वे, त्रीणि – इत्यादयः तु सङ्ख्याः इत्युच्यन्ते।)
- विंशतितः अग्रे विंशः / विंशतितमः, एकविंशः / एकविंशतितमः – चेति रूपद्वयं भवति। परन्तु अत्र एकमेव रूपं निर्दिष्टम् अस्ति।

## अभ्यासः

1. कोष्ठकस्थसङ्ख्यायाः पूरणप्रत्ययान्तं रूपं लिखत –

| | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे | |
|---|---|---|---|---|
| उदा. | त्रयोदशः | त्रयोदशी | त्रयोदशम् | (13) |
| 1. | .................. | .................. | .................. | (4) |
| 2. | .................. | .................. | .................. | (6) |
| 3. | .................. | .................. | .................. | (17) |
| 4. | .................. | .................. | .................. | (20) |
| 5. | .................. | .................. | .................. | (26) |
| 6. | .................. | .................. | .................. | (65) |
| 7. | .................. | .................. | .................. | (59) |
| 8. | .................. | .................. | .................. | (71) |
| 9. | .................. | .................. | .................. | (90) |
| 10. | .................. | .................. | .................. | (25) |
| 11. | .................. | .................. | .................. | (73) |
| 12. | .................. | .................. | .................. | (37) |
| 13. | .................. | .................. | .................. | (48) |
| 14. | .................. | .................. | .................. | (22) |
| 15. | .................. | .................. | .................. | (34) |
| 16. | .................. | .................. | .................. | (82) |
| 17. | .................. | .................. | .................. | (40) |

www.thearyasamaj.org

2. एषा वलयक्षेपक्रीडा। 30 छात्राः वृत्ताकारेण तिष्ठन्ति। कश्चन बालः वलयं वेगेन अन्यं बालम् उद्दिश्य क्षिपति। सः तत् गृहीत्वा अन्यस्मै ददाति। कः कस्मै वलयं ददाति इति अधः सूचितम् अस्ति। तदनुसारम् उचितेन पूरणप्रत्ययान्तेन वाक्यानि रचयत –

| | | | |
|---|---|---|---|
| 1. (1) बालकः – (9) बालकः | | 2. (9) बालकः – (12) बालिका | |
| 3. (12) बालिका – (27) बालकः | | 4. (27) बालकः – (2) बालिका | |
| 5. (2) बालिका – (8) बालिका | | 6. (8) बालिका – (16) बालकः | |
| 7. (16) बालकः – (25) बालिका | | 8. (25) बालिका – (11) बालिका | |
| 9. (11) बालिका – (29) बालकः | | 10. (29) बालकः – (14) बालिका | |

उदा – 1. **प्रथमः बालकः नवमाय बालकाय ददाति।**

2. ............................................................ ।
3. ............................................................ ।
4. ............................................................ ।
5. ............................................................ ।
6. ............................................................ ।
7. ............................................................ ।
8. ............................................................ ।
9. ............................................................ ।
10. ............................................................ ।

3. वर्षे प्रतिमासम् अपि कानिचन विशेषदिनानि भवन्ति। अत्र तादृशानि कानिचन दिनानि निर्दिष्टानि सन्ति। तानि कदा भवन्ति इति उदाहरणानुसारं वाक्यरूपेण लिखत –

| | |
|---|---|
| 1. जनवरिमासः – 12 विवेकानन्दजयन्ती | 2. जनवरिमासः – 26 गणतन्त्रदिनम् |
| 3. मार्च्मासः – 1 विश्ववनितादिनम् | 4. एप्रिल्मासः – 14 अम्बेडकरजयन्ती |
| 5. मई मासः – 1 विश्वकार्मिकदिनम् | 6. जुलैमासः – 5 विश्वपर्यावरणदिनम् |
| 7. सप्तम्बर्मासः – 5 अध्यापकदिनम् | 8. नवम्बर्मासः – 14 बालदिनम् |

उदा – 1. **जनवरिमासस्य द्वादशे दिनाङ्के विवेकानन्दजयन्ती भवति।**

2. ............................................................ ।
3. ............................................................ ।

www.thearyasamaj.org

4. ..........................................................................।
5. ..........................................................................।
6. ..........................................................................।
7. ..........................................................................।
8. ..........................................................................।

4. अधः प्रधानमन्त्रिणः प्रवासयोजना दत्ता अस्ति। एतस्याः आधारेण सः कस्मिन् दिनाङ्के कुत्र भविष्यति इति लिखत –

1. (1) – देहलीतः प्रस्थानम्
2. (2) – लखनऊनगरम्
3. (4) – पटनानगरम्
4. (7) – गुवाहटीनगरम्
5. (9) – कोलकत्ता
6. (10) – भुवनेश्वरम्
7. (12) – भाग्यनगरम्
8. (14) – चेन्नैनगरम्
9. (17) – तिरुवनन्तपुरम्
10. (19) – बेङ्गलूरुनगरम्
11. (20) – मुम्बयीनगरम्
12. (22) – भोपालम्
13. (24) – कर्णावती
14. (29) – चण्डीगढ़
15. (30) – श्रीनगरम्

उदा – 1. **प्रधानमन्त्री प्रथमे दिनाङ्के देहलीतः प्रस्थानं करोति ।**

2. ..........................................................................।
3. ..........................................................................।
4. ..........................................................................।
5. ..........................................................................।
6. ..........................................................................।
7. ..........................................................................।
8. ..........................................................................।
9. ..........................................................................।
10. ..........................................................................।
11. ..........................................................................।
12. ..........................................................................।
13. ..........................................................................।
14. ..........................................................................।
15. ..........................................................................।

www.thearyasamaj.org

5. पूर्वं दत्तां प्रवासयोजनाम् अनुसृत्य यूयम् अपि स्वकीयां योजनां लिखत –

उदा. **प्रथमे दिनाङ्के अहं विद्यालये भविष्यामि ।**

1. ................................................................................ ।
2. ................................................................................ ।
3. ................................................................................ ।
4. ................................................................................ ।
5. ................................................................................ ।
6. ................................................................................ ।
7. ................................................................................ ।
8. ................................................................................ ।

6. क्रीडाक्षेत्रं परितः वृक्षाः सन्ति । द्वौ वानरौ वृक्षात् वृक्षं गच्छन्तौ क्रीडतः । तौ कतमात् वृक्षात् कतमं वृक्षं गच्छतः इति अधः सूचितम् अस्ति । उचितेन पदेन वाक्यानि पूरयत –

प्रथमः वानरः

(1) ➡ (2) ➡ (3) ➡ (4) ➡ (5) ➡ (6) ➡ (7) ➡ (8) ➡ (9) ➡ (10) ➡ (11)

द्वितीयः वानरः

(25) ➡ (24) ➡ (23) ➡ (22) ➡ (21) ➡ (20) ➡ (19) ➡ (18) ➡
(17) ➡ (16) ➡ (15)

1. प्रथमः वानरः **प्रथमात्** वृक्षात् **द्वितीयं** वृक्षं गच्छति ।
2. ................................................................................ ।
3. ................................................................................ ।
4. ................................................................................ ।
5. ................................................................................ ।
6. ................................................................................ ।
7. ................................................................................ ।
8. ................................................................................ ।
9. ................................................................................ ।

www.thearyasamaj.org

10. .................................................................... ।
11. द्वितीयः वानरः .......................................................।
12. .....................................................................।
13. .....................................................................।
14. .....................................................................।
15. .....................................................................।
16. .....................................................................।
17. .....................................................................।
18. .....................................................................।
19. .....................................................................।
20. .....................................................................।

एतत् गणेशस्तोत्रम् उच्चैः पठत । अत्र प्रयुक्तानि पूरणप्रत्ययान्तरूपाणि जानीत च –

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टकम् ॥

नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं परम् ॥

एतत् सुभाषितम् उच्चैः पठत –

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ॥

*जीवनस्य प्रथमे भागे भवता विद्या न सम्पादिता । द्वितीये भागे धनं न सम्पादितम् । तृतीये भागे पुण्यं न सम्पादितम् । एवं चेत् चतुर्थे भागे किं वा करिष्यति ?*


सूक्तिः – वज्रादपि हि वीराणां चित्तरत्नमखण्डितम् ।

www.thearyasamaj.org

# १२ एकः पापानि कुरुते

चित्–चन–प्रयोगः

एतां कथाम् उच्चैः पठत, अवगच्छत च –



**कस्मिंश्चित्** ग्रामे **कश्चन** आश्रमः आसीत् । तत्र **कश्चन** गुरुः निवसति । तस्य दश शिष्याः आसन् । आश्रमसमीपे एव **काचित्** नदी प्रवहति स्म ।

**कदाचित्** गुरुः **कैश्चित्** शिष्यैः सह नौकया **कञ्चित्** देशं प्रति प्रस्थितवान् आसीत् । गमनसमये एते पुरतः **कुतश्चित्** आगच्छन्तीं **काञ्चित्** नौकां दृष्टवन्तः । तस्यां नौकायां बहवः जनाः आसन् । यदा एते दृष्टवन्तः तदा एव सा नौका अकस्मात् **काञ्चित्** शिलां घट्टयित्वा भग्ना अभवत् । नौकायां स्थिताः सर्वे नद्याम् अपतन् । **केचन** मृताः । अन्ये **केचन कथञ्चित्** रक्षां प्राप्तवन्तः च ।

तद् दृश्यं दृष्ट्वा गुरुः शिष्यान् उक्तवान् – "नौकायां **कश्चन** दुष्टः आसीत् , तस्य एकस्य कारणतः एषा दुर्घटना सम्भूता । निर्भाग्याः **केचन** मृत्युमुखं प्रविष्टवन्तः, अन्ये **केचन** मृतप्रायाश्च सञ्जाताः" इति ।

गुरोः वचनं श्रुत्वा सर्वे शिष्याः आश्चर्येण तं पृष्टवन्तः – "गुरो ! तेषु **कश्चित्** दुष्टः स्यात् नाम, परन्तु एकस्य दुष्टस्य कारणेन निरपराधैः अन्यैः अपि मरणं प्राप्तव्यम् इत्येतद् कथं समीचीनं भवेत्?" इति ।

गुरुः **किञ्चिदपि** न उक्तवान् । स्वल्पसमयानन्तरं ते अन्यत् तीरं प्राप्तवन्तः । सर्वे अग्रे गच्छन्तः आसन् । तदा **केनचित्** शिष्येण सिकतासु निमग्नः **कश्चन** शङ्खः दृष्टः । सः **कथञ्चित्** तं गृहीत्वा इतस्ततः भ्रामितवान् । शङ्खस्य अन्तः **काश्चन** पिपीलिकाः आसन् । तासु **काचित्** पिपीलिका तस्य हस्तम् अदशत् । तदा सः शिष्यः तीव्रवेदनाम् अनुभूय क्रोधेन तं शङ्खं नद्यां क्षिप्तवान् । सर्वाः पिपीलिकाः मृताः अभवन् ।

तदा गुरुः शिष्यान् उक्तवान् – "भोः शिष्याः ! पश्यन्तु, **काचित्** पिपीलिका एतम् अदशत् , किन्तु तस्याः कारणतः सर्वाः अपि पिपीलिकाः एतेन जले पातिताः । एवमेव एकः दुष्टः भवति चेदपि तस्य प्रभावः तं परितः स्थितानां निरपराधानां सज्जनानाम् उपरि अपि भवति" इति ।

गुरोः वचनं श्रुत्वा सर्वे विस्मिताः अभवन् ।

www.thearyasamaj.org

## अभ्यासः

1. पाठे स्थूलाक्षरैः मुद्रितान् शब्दान् चित्वा अधः लिखत –

| | | |
|---|---|---|
| 1. ................ | 2. ................ | 3. ................ |
| 4. ................ | 5. ................ | 6. ................ |
| 7. ................ | 8. ................ | 9. ................ |
| 10. ................ | 11. ................ | 12. ................ |
| 13. ................ | 14. ................ | 15. ................ |
| 16. ................ | 17. ................ | 18. ................ |
| 19. ................ | 20. ................ | 21. ................ |
| 22. ................ | 23. ................ | 24. ................ |

एते सर्वेऽपि शब्दाः अनिश्चितार्थकाः सन्ति।

### अवधेयम्

'किम्' इति शब्दः प्रश्नार्थकः। तस्य रूपैः सह चित्, चन योजनेन अनिश्चितार्थकत्वं सिद्ध्यति।

उदा – 1. काचित् गच्छति। (अत्र का गच्छति इति निश्चयः नास्ति।)

2. कश्चन अभिनयति। (अत्र कः अभिनयति इति निश्चयः नास्ति।)

3. शिशिरः केनचित् सह क्रीडति।(अत्र केन सह क्रीडति इति निश्चयः नास्ति।)

– एतादृशः अर्थः अनिश्चितार्थः।

एतानि रूपाणि पठत –

पुंलिङ्गे

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | कश्चित् | कौचित् | केचित् |
| *द्वितीयाविभक्तिः* | कञ्चित् | कौचित् | कांश्चित् |
| *तृतीयाविभक्तिः* | केनचित् | काभ्याञ्चित् | कैश्चित् |
| *चतुर्थीविभक्तिः* | कस्मैचित् | काभ्याञ्चित् | केभ्यश्चित् |
| *पञ्चमीविभक्तिः* | कस्माच्चित् | काभ्याञ्चित् | केभ्यश्चित् |
| *षष्ठीविभक्तिः* | कस्यचित् | कयोश्चित् | केषाञ्चित् |
| *सप्तमीविभक्तिः* | कस्मिंश्चित् | कयोश्चित् | केषुचित् |

www.thearyasamaj.org

पुंलिङ्गरूपाणि दृष्ट्वा रिक्तस्थानानि पूरयत –

नपुंसकलिङ्गे

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| किञ्चित् | केचित् | कानिचित् |
| किञ्चित् | केचित् | कानिचित् |
| ………… | ………… | ………… |
| ………… | ………… | ………… |
| ………… | ………… | ………… |
| ………… | ………… | ………… |
| ………… | ………… | ………… |

स्त्रीलिङ्गे

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| काचित् | केचित् | काश्चित् |
| काञ्चित् | केचित् | काश्चित् |
| कयाचित् | काभ्याञ्चित् | काभिश्चित् |
| कस्यैचित् | काभ्याञ्चित् | काभ्यश्चित् |
| कस्याश्चित् | काभ्याञ्चित् | काभ्यश्चित् |
| कस्याश्चित् | कयोश्चित् | कासाञ्चित् |
| कस्याञ्चित् | कयोश्चित् | कासुचित् |

## अवधेयम्

- कश्चित् , काचित् , किञ्चित् – इत्यादयः सर्वेऽपि विशेषणत्वेन उपयुज्यन्ते। अतः ते सर्वे विशेष्यस्य लिङ्गं वचनं विभक्तिं च अनुसरन्ति।

यथा – 1. सः कश्चित् बालकः।
2. काचित् महिला गच्छति।
3. तत्र किञ्चित् पुस्तकम् अस्ति।
4. ह्यः कश्चित् अतिथिः आगतवान्।
5. गुरुः कांश्चित् छात्रान् पाठयन् अस्ति।
6. वृद्धः केनचित् दण्डेन चलति।
7. माता कस्मैचित् भिक्षुकाय भोजनं दत्तवती।
8. मम भगिनी कयाचित् सख्या सह महाविद्यालयं गतवती।
9. कस्माच्चित् आपणात् वस्तूनि आनीतानि।
10. कस्मिंश्चित् वित्तकोषे सः उद्योगी अस्ति।

www.thearyasamaj.org

2. मञ्जूषातः उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत –

कयाचित् ,
कयोश्चित्, केषाञ्चित् ,
कस्माच्चित्, केषुचित्, कञ्चित्, कानिचित्,
केभ्यश्चित्, कस्याश्चित् , काञ्चित्

1. तात **काञ्चित्** कथां कथयतु ।
2. भोः ............. सेवकं कृपया प्रेषयतु ।
3. ............. महिलायाः स्यूतः एषः ।
4. ............. वर्णलेखन्या चित्रं रचितम् ।
5. एतानि फलानि ............. वृक्षेभ्यः पतितानि ।
6. ............. बालकयोः दुर्लालित्यं वर्तते ।
7. ............. धनिकानां पुत्राः अविनीताः भवन्ति ।
8. ............. यानात् सः अवतीर्णः ।
9. ............. गृहेषु विद्युत् नास्ति ।
10. अद्य मम ............. मित्राणि गृहम् आगच्छन्ति ।

3. एते सुभाषिते उच्चैः पठत –

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ॥

*लोके कोऽपि जनः सहजतया अन्यस्य कस्यचित् मित्रं न भवति । शत्रुः अपि न भवति । किमपि कारणम् अस्ति चेदेव जनाः मित्राणि शत्रवः वा भवन्ति ।*

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः ।
केचिज्ज्ञानावलेपेन केचिन्नष्टैस्तु नाशिताः ॥

*लोके केचन अज्ञानेन नष्टाः भवन्ति । अन्ये केचन प्रमादकारणेन नष्टाः भवन्ति । पुनः केचन अहं जानामि इति गर्वेण नष्टाः भवन्ति । एवं नष्टाः जनाः अन्यान् कांश्चित् नाशयन्ति अपि । अतः ते एतैः नाशिताः भवन्ति ।*

www.thearyasamaj.org

**अवधेयम्**

- चित् / चन – इत्येतयोः अर्थभेदः कोऽपि नास्ति ।
  कश्चित् / कश्चन – इत्येतयोः अर्थः समानः । एवम् इतरत्र अपि ।

1. आपणतः कानिचित् पत्राणि आनयामि । – आपणतः कानिचन पत्राणि आनयामि ।
2. केषुचित् नगरेषु जलाभावः अस्ति । – केषुचन नगरेषु जलाभावः अस्ति ।
3. परिश्रमिणः केचित् एव उत्तीर्णाः भवन्ति । – परिश्रमिणः केचन एव उत्तीर्णाः भवन्ति ।

4. कोष्ठकस्थानां शब्दानां साहाय्येन उदाहरणानुगुणं वाक्यानि योजयत –

| | |
|---|---|
| कासाञ्चित् | फलानि पक्वानि सन्ति । |
| कस्याञ्चित् | पुस्तकेषु वेदमन्त्राः सन्ति । |
| कानिचित् | नटः शाटिकां धृत्वा नटति । |
| कश्चित् | गायिकानां स्वरः मधुरः वर्तते । |
| कासुचित् | यानेन भवान् गन्तुं शक्नोति । |
| केचित् | कथायां चाणक्यस्य राष्ट्रभक्तिः दृश्यते । |
| केचन | संस्कृतपत्रिकासु सरलसंस्कृतं वर्तते । |
| केषुचित् | अतिथयः विमानेन आगताः । |
| केनचित् | नर्तक्यौ नृत्यतः । |
| केचित् | बालकाः बहु परिश्रमं कृत्वा लक्ष्यं प्राप्नुवन्ति । |

**अवधेयम्**

- किंशब्दस्य रूपैः सह यथा तथैव कुत्र, कति, कदा, कुतः, कथम् – इत्येतैः प्रश्नवाचकैः सह अपि चित् / चन योजयितुं शक्यते । तेषाम् अपि अनिश्चयार्थकत्वमेव ।

यथा – 1. सः जङ्गमदूरवाणीं **कुत्रचित्** पातितवान् ।
2. बाल्ये अहं **कदाचित्** हरिद्वारं गतवान् ।
3. जीवने कष्टानि भवन्त्येव । **कथञ्चित्** स्वकार्यं समाजकार्यञ्च साधनीयम् ।
4. गृहे मूषकबाहुल्यात् मम **कतिचित्** पुस्तकानि नष्टानि ।
5. **कुतश्चित्** वार्ता श्रुता मया । कुतः इति न स्मरामि ।

www.thearyasamaj.org

4. कोष्ठकस्य साहाय्येन अनेकानि वाक्यानि रचयत –

| | | | |
|---|---|---|---|
| उमा<br>अहम् | कञ्चित् / कञ्चन<br>काश्चित् / काश्चन<br>कानिचित् / कानिचन<br>काञ्चित् / काञ्चन<br>किञ्चित् / किञ्चन<br>कांश्चित् / कांश्चन | पुस्तकानि<br>ग्रन्थान्<br>पत्रिकाः<br>श्लोकम्<br>कविताम्<br>काव्यम् | अपठत्<br>अपठम् |

1. उमा कञ्चित् श्लोकम् अपठत् ।
2. ........................................................................ ।
3. ........................................................................ ।
4. ........................................................................ ।
5. ........................................................................ ।
6. ........................................................................ ।
7. ........................................................................ ।
8. ........................................................................ ।
9. ........................................................................ ।
10. ........................................................................ ।
11. ........................................................................ ।
12. ........................................................................ ।
13. ........................................................................ ।
14. ........................................................................ ।
15. ........................................................................ ।
16. ........................................................................ ।
17. ........................................................................ ।
18. ........................................................................ ।
19. ........................................................................ ।
20. ........................................................................ ।

www.thearyasamaj.org

5. आवरणे विद्यमानेषु रूपेषु उचितेन रूपेण रिक्तस्थानं पूरयत –

1. **केचन** छात्राः सर्वदा जल्पन्ति। (कानिचन, कश्चन, केचन)

2. ............ नाटकस्य सारांशं वद। (कस्याश्चित्, कस्यचित्, केषाञ्चित्)

3. शीघ्रं गच्छ, .............. आपणात् पुस्तकम् आनय। (कस्माच्चित्, कस्याश्चित्, कस्यचित्)

4. ................. अभिनेत्र्याः अभिमानिनः तत्र सम्मिलिताः। (काचित्, कस्याश्चित्, कस्यचित्)

5. ................. विद्यालयेषु चतुराः बालाः पठन्ति। (कासुचित्, कस्मिंश्चित्, केषुचित्)

6. ................. भारतीयाः वैज्ञानिकाः जगत्प्रसिद्धाः सन्ति। (केचित्, काश्चित्, कानिचित्)

7. प्रधानमन्त्री ................. मन्त्रिभिः सह समालोचयति। (काभिश्चित्, कैश्चित्, केनचित्)

8. माधुरी ................. वित्तकोषे अधिकारिणी अस्ति। (कस्मिंश्चित्, कस्याञ्चित्, केषुचित्)

9. राष्ट्राध्यक्षः ................. क्रीडकाय पारितोषिकं प्रददाति। (कस्यैचित्, कस्मैचित्, कयाचित्)

10. अहं ................. नर्तकीः अभिनन्दामि। (काश्चित्, कैश्चित्, काञ्चित्)

6. चित् / चन – उपयुज्य न्यूनातिन्यूनं दश वाक्यानि लिखत –




1. ............................................... ।
2. ............................................... ।
3. ............................................... ।
4. ............................................... ।
5. ............................................... ।
6. ............................................... ।
7. ............................................... ।
8. ............................................... ।
9. ............................................... ।
10. ............................................... ।

www.thearyasamaj.org

एतानि सुभाषितानि उच्चैः पठत –

पर्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि ।
न कथञ्चिन्महीपस्य चित्तान्तः केनचित् क्वचित् ॥

*भूमेः सीमा का इति द्रष्टुं शक्यते । समुद्रस्य पर्वतस्य वा अपि सीमा ज्ञातुं शक्यते । परन्तु राज्ञः (अधिकारे स्थितस्य) मनसि किम् अस्ति इति केनापि कथमपि ज्ञातुं नैव शक्यते ।*

मिथ्यारूपं न सन्दर्श्यं केनचित् कर्हिचित् क्वचित् ।
यथार्थेऽवगते सद्यो दुर्गतिस्तस्य जायते ॥

*केनापि जनेन कदापि कुत्रापि च स्वीयं रूपम् आच्छाद्य मिथ्यारूपं न दर्शनीयम् । यतः यदा तत् मिथ्यारूपम् अन्यैः अवगतं भवति तदा अस्य दुर्गतिः एव भवति ।*

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ।

*कस्यापि जनस्य श्वः किं भविष्यति इति कोऽपि न जानाति । अतः बुद्धिमान् जनः श्वः करणीयानि कार्याणि अद्यैव कृत्वा समापयेत् ।*

सूक्तिः – असतां सङ्गदोषेण साधवो यान्ति विक्रियाम् ।

विशेषः

**चाटुश्लोकः**

अद्याष्टमीति नवमीति चतुर्दशीति ज्योतिष्यवाचोपवसन्ति भक्त्या ।
अहो श्रुतेस्तत्त्वमसीति वाक्यं न विश्वसन्तीत्यद्भुतमेतदेव ॥

'अद्य अष्टमी, अतः भोजनं न क्रियते' 'अद्य नवमी, अतः उपवासः' 'चतुर्दशी कारणतः उपवासः क्रियते मया' – इत्यादीनि वचनानि बहुधा श्रूयन्ते लोके । तादृशेषु दिनेषु उपवासस्य आचरणात् पुण्यमिति ज्योतिषिकैः यदुक्तं तत्र विश्वसन्तः जनाः एवं व्यवहरन्ति । किन्तु 'तत्त्वमसि' प्रभृतिषु वाक्येषु जनाः विश्वासं न कुर्वन्ति । बाह्याचरणे अधिकश्रद्धा, तत्त्वे अश्रद्धा च लोकस्य स्वभावः भवति प्रायः ।

www.thearyasamaj.org

# १३ भ्रातृमेलनम्

आत्मनेपदिनां धातूनां परिचयः
लट्लकारः

एतां कथाम् उच्चैः पठत, अवगच्छत च –



पाण्डवाः वनवासम् आचरन्तः बदरिकाश्रमम् आगताः। द्रौपद्या सहिताः ते तत्र रमणीयेषु काननप्रदेशेषु विहरन्तः **रमन्ते**। द्रौपदी अपि विहरन्ती **मोदते**।

एकदा द्रौपदी वायुना आनीतम् एकं सुन्दरं पुष्पम् **ईक्षते**। तत् सौगन्धिकं कमलम् इति सा **जानीते**। सा तादृशानि अधिकानि पुष्पाणि **कामयते**। अतः सा पतिं भीमसेनं **प्रार्थयते** – ''भवान् एतादृशानि अन्यानि बहूनि पुष्पाणि आनयतु'' इति।

भीमसेनः गदापाणिः सन् **प्रतिष्ठते**। ताम् एव दिशं गत्वा सः गन्धमादनपर्वते सर्वत्र **मृगयते**। सर्वे प्राणिनः तं कुतूहलेन **निरीक्षन्ते**। अग्रे गतः भीमसेनः कदलीवनम् **आलोकते**। तत्र हनुमान् निद्रावशगः आसीत्। सः स्वर्गद्वारम् आवृत्य **शेते** स्म। भीमसेनः तस्य समीपं गत्वा सिंहनादं **कुरुते**। तदा हनुमान् लोचने ईषद् उन्मील्य **स्मयते**। ततः **भाषते** च – ''किमर्थं सुखसुप्तं मां प्रबोधयसि ? त्वं कः ? किमर्थम् आगतः ? एषः देवलोकस्य मार्गः **वर्तते**। अत्र मनुष्याणां प्रवेशाय अनुमतिः न **विद्यते**'' इति।

तदा भीमसेनः **ब्रूते** – ''अहं कुन्तीपुत्रः भीमसेनः। एतेन मार्गेण गन्तुम् इच्छामि। त्वम् उत्तिष्ठ। मार्गं प्रयच्छ'' इति।

हनुमान् वदति –''अहं व्याधिपीडितः अस्मि। अतः उत्थातुं मम शक्तिः न **विद्यते**। यदि त्वया अवश्यं गन्तव्यं तर्हि मां लङ्घयित्वा गच्छ'' इति।

तदा भीमसेनः वदति – ''परमात्मा देहं व्याप्य **अवतिष्ठते** इति अहं **जाने**। तव लङ्घनेन तस्य अवमाननं कर्तुं न **उत्सहे**। अन्यथा हनुमान् सागरम् इव त्वां लङ्घयित्वा गच्छेयम्'' इति।

www.thearyasamaj.org

हनुमान् पृच्छति – "कः सः हनुमान् ? किमर्थं सः सागरं लङ्घितवान् ?" इति।

"हनुमान् मम भ्राता। रामायणे सः अतिविख्यातः। रामपत्न्याः सीतायाः अन्वेषणाय सः शतयोजन–विस्तृतं सागरं लङ्घितवान्। अहमपि बले पराक्रमे युद्धे च तेन तुल्यः **वर्ते**" इति साभिमानं वदति भीमसेनः। अन्ते "मार्गं प्रयच्छ" इति पुनरपि वदति।

हनुमान् वदति – "जरया मम उत्थातुं शक्तिः नास्ति। त्वमेव अनुकम्पया एतत् पुच्छम् अपसार्य गच्छ" इति।

भीमसेनः 'पुच्छे गृहीत्वा एतं वानरं यमसदनं प्रेषयामि' इति मनसा चिन्तयति। ततः सः अवज्ञया वामहस्तेन पुच्छं गृहीतवान्। किन्तु तत् पुच्छं किञ्चिदपि न **कम्पते**। अधुना भीमसेनः बाहुभ्यां पुच्छम् उत्क्षेप्तुं **प्रयतते**। तथापि पुच्छं न **कम्पते**। भीमसेनस्य शरीरं **स्विद्यते**। पुनःपुनः प्रयत्नेनापि सः विफलः **जायते**। सः नितरां **लज्जते**। अन्ते सः हनुमन्तं नमस्कृत्य **प्रार्थयते** – "कपिशार्दूल ! मां क्षमताम्। वानररूपधृक् भवान् सिद्धः, देवः गन्धर्वः वा कः इति वदतु। अहं शिष्यवत् भवन्तं पृच्छामि। कृपया वदतु" इति।

तदा हनुमान् स्वस्य परिचयम् उक्तवान्। भीमसेनः भक्त्या तं नमस्कृतवान्। हनुमान् प्रीत्या तम् आलिङ्गितवान्। ततः सः भीमसेनस्य प्रार्थनाम् अङ्गीकृत्य रामावतारे स्वस्य यादृशं शरीरम् आसीत् तादृशं विशालं शरीरं दर्शितवान्। अन्ते तम् आशीर्भिः अनुगृह्य अन्तर्हितः अभवत्।

## अभ्यासः

1. अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि पदानि अत्र लिखत –

| | | | | |
|---|---|---|---|---|
| रमन्ते | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |

*एतानि सर्वाणि आत्मनेपदिक्रियापदानि सन्ति।*

www.thearyasamaj.org

2. एतानि वाक्यानि उच्चैः सावधानतया पठत –

1. भक्तः देवं **वन्दते**।
2. कपोतः आकाशे **डयते**।
3. वृक्षशाखा वायुना **कम्पते**।
4. धीरः कष्टं **सहते**।
5. शिशुः क्रमशः **वर्धते**।
6. ग्रीष्मकाले तापः **एधते**।
7. छात्रः क्रीडया **मोदते**।
8. बालः इन्द्रजालं **वीक्षते**।
9. गोविन्दः सर्वत्र **स्पर्धते**।
10. अद्य अतीव शैत्यं **वर्तते**।
11. भवत्यः किमर्थं **लज्जन्ते** ?
12. ते उच्चैः **भाषन्ते**।
13. गुरवः छात्रान् **क्षमन्ते**।
14. दुष्टाः सर्वान् **बाधन्ते**।
15. मनसि संशयाः **जायन्ते**।
16. शत्रवः युद्धे **म्रियन्ते**।
17. जनाः चलनचित्रम् **आलोकन्ते**।
18. वैज्ञानिकाः सफलतां प्राप्तुं **यतन्ते**।
19. एते सर्वदा **त्वरन्ते**।
20. छात्राः गुरून् **सेवन्ते**।

पूर्वम् अस्माभिः पठितानि क्रियापदानि एतादृशानि – गच्छति, पठति, लिखति, तिष्ठति, पश्यति – इत्यादीनि। एतेषु वाक्येषु तु सन्ति – वन्दते, डयते, कम्पते, सहते, वर्धते, एधते – इत्येतादृशानि।

➪ एतानि परिशीलयत –

| | |
|---|---|
| पतति | स्पर्धते |
| क्रीडति | वीक्षते |
| नृत्यति | वर्तते |
| चिन्तयति | लज्जते |
| स्मरति | भाषते |
| गायति | यतते |
| नयति | जायते |
| एतानि परस्मैपदिरूपाणि। | एतानि आत्मनेपदिरूपाणि। |

एतानि सर्वाणि रूपाणि लट्लकारस्य प्रथमपुरुषैकवचनरूपाणि।

www.thearyasamaj.org

## अवधेयम्

क्रियापदस्य मूलं धातुः। यथा – 'पठति' इत्यस्य क्रियापदस्य मूलं 'पठ' इति धातुः।

धातवः त्रिविधाः सन्ति – परस्मैपदिनः, आत्मनेपदिनः उभयपदिनः च इति। पठ, लिख, क्रीड्, मिल, गम् – इत्यादयः धातवः परस्मैपदिनः। वन्द् , एध, लभ् , ईक्ष, लज्ज् – इत्यादयः धातवः आत्मनेपदिनः।

परस्मैपदिनां धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ति' इति श्रूयते। यथा – पठति, लिखति, मिलति।

आत्मनेपदिनां धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ते' इति श्रूयते।

यथा – वीक्षते, लज्जते, कम्पते।

उभयपदिनां तु धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ति, ते' इत्येतदुभयमपि श्रूयते।

यथा – करोति / कुरुते, याचति / याचते, जानाति / जानीते।

➪ अधः कानिचित् क्रियापदरूपाणि सन्ति। सर्वाणि लट्लकारस्य प्रथमपुरुषैकवचनरूपाणि। पूर्वोक्तायाः सूचनायाः साहाय्येन एतेषु परस्मैपदिधातूनां रूपाणि आत्मनेपदिधातूनां रूपाणि च पृथक्कृत्य लिखत–

| | | | | | |
|---|---|---|---|---|---|
| पश्यति | अस्ति | भाषते | स्पृशति | जायते | लज्जते |
| गूहते | पतति | कम्पते | तिष्ठति | कामयते | पलायते |
| द्योतते | म्रियते | ऊहते | इच्छति | वदति | कर्षति |
| रटति | गाहते | वर्तते | स्मरति | स्निह्यति | नयति |
| मोदते | विद्यते | स्मयते | स्नाति | दिशति | गच्छति |

| परस्मैपदिरूपाणि | | | आत्मनेपदिरूपाणि | | |
|---|---|---|---|---|---|
| पश्यति | ............ | ............ | लज्जते | ............ | ............ |
| ............ | ............ | ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ | ............ | ............ |
| ............ | ............ | ............ | ............ | ............ | ............ |

www.thearyasamaj.org

➪ आत्मनेपदिनां धातूनां लट्लकारे रूपाणि एवं भवन्ति –

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| | *प्रथमपुरुषः* | एधते | एधेते | एधन्ते |
| *'एध' धातुः* | *मध्यमपुरुषः* | एधसे | एधेथे | एधध्वे |
| | *उत्तमपुरुषः* | एधे | एधावहे | एधामहे |
| | *प्रथमपुरुषः* | सहते | सहेते | सहन्ते |
| 'सह' (षह) *धातुः* | *मध्यमपुरुषः* | सहसे | सहेथे | सहध्वे |
| | *उत्तमपुरुषः* | सहे | सहावहे | सहामहे |

**अभ्यासः**

1. रिक्तस्थानानि पूरयत –

| 'वन्द्' धातुः | | | 'कपि' धातुः | | |
|---|---|---|---|---|---|
| वन्दते | ............ | ............ | ............ | ............ | कम्पन्ते |
| वन्दसे | ............ | ............ | ............ | ............ | कम्पध्वे |
| वन्दे | ............ | ............ | ............ | ............ | कम्पामहे |

| 'वृध्' धातुः | | | 'मुद' धातुः | | |
|---|---|---|---|---|---|
| ............ | वर्धेते | ............ | ............ | मोदेते | ............ |
| ............ | वर्धेथे | ............ | मोदसे | ............ | ............ |
| ............ | वर्धावहे | ............ | ............ | ............ | मोदामहे |

➪ परस्मैपदिधातोः आत्मनेपदिधातोश्च लट्लकाररूपेषु कीदृशः भेदः अस्ति इति पठत, अवगच्छत च –

| परस्मैपदी 'पठ' धातुः | | | आत्मनेपदी 'वन्द्' धातुः | | |
|---|---|---|---|---|---|
| पठति | पठतः | पठन्ति | वन्दते | वन्देते | वन्दन्ते |
| पठसि | पठथः | पठथ | वन्दसे | वन्देथे | वन्दध्वे |
| पठामि | पठावः | पठामः | वन्दे | वन्दावहे | वन्दामहे |

www.thearyasamaj.org

2. रिक्तस्थानानि पूरयत–

| परस्मैपदी 'लिख'धातुः | | | आत्मनेपदी 'स्पर्ध'धातुः | | |
|---|---|---|---|---|---|
| लिखति | .......... | .......... | स्पर्धते | .......... | .......... |
| .......... | .......... | .......... | .......... | .......... | .......... |
| .......... | .......... | .......... | .......... | .......... | .......... |

| परस्मैपदी 'क्रीड्'धातुः | | | आत्मनेपदी 'ऊह'धातुः | | |
|---|---|---|---|---|---|
| क्रीडति | .......... | .......... | ऊहते | .......... | .......... |
| .......... | .......... | .......... | .......... | .......... | .......... |
| .......... | .......... | .......... | .......... | .......... | .......... |

3. एतेषां प्रश्नानाम् उत्तराणि लिखत –

1. द्रौपदी गङ्गातीरे किं करोति ? **द्रौपदी गङ्गातीरे विहरन्ती मोदते ।**
2. सा किं वीक्षते ? ................................................ ।
3. भीमसेनः कथं प्रतिष्ठते ? ................................................ ।
4. अग्रे गतः भीमसेनः किम् आलोकते ? ................................................ ।
5. हनुमान् कथं शेते स्म ? ................................................ ।
6. कस्य शरीरं स्विद्यते ? ................................................ ।

4. पाठे स्थितानि कानिचन वाक्यानि अत्र सन्ति। तेषां प्रश्नवाक्यानि रेखाङ्कितशब्दानाम् आधारेण लिखत–

1. पाण्डवाः <u>बदरिकाश्रमे</u> रमन्ते। **पाण्डवाः कुत्र रमन्ते ?**
2. <u>द्रौपदी</u> अधिकानि पुष्पाणि कामयते। ................................................ ।
3. भीमसेनः <u>कदलीवनम्</u> आलोकते। ................................................ ।
4. सः <u>गन्धमादनपर्वते</u> मृगयते। ................................................ ।
5. <u>परमात्मा</u> देहं व्याप्य अवतिष्ठते। ................................................ ।
6. भीमसेनः <u>हनुमन्तं</u> प्रार्थयते। ................................................ ।

www.thearyasamaj.org

5. एतेषु वाक्येषु परस्मैपदिक्रियापदानि प्रयुक्तानि सन्ति। तत्समानार्थकानि आत्मनेपदिक्रियापदानि कोष्ठके दत्तानि सन्ति। ततः उचितं क्रियापदं चित्वा रिक्तस्थाने लिखत–

| लभसे, वन्दे, वीक्षेते, कामयामहे, वर्तन्ते, मन्यध्वे<br>भाषेथे, मोदन्ते, त्रायते, वन्दामहे |
|---|

यथा –

1. वयं भारतमातरं प्रणमामः। / वन्दामहे
2. ईश्वरः भक्तान् कष्टात् रक्षति। / .............. ।
3. यूयं किं चिन्तयथ ? / .............. ।
4. तौ आकाशं पश्यतः। / .............. ।
5. युवां सत्यं वदथः। / .............. ।
6. बालिकाः चित्रं दृष्ट्वा तुष्यन्ति। / ............... ।
7. अहं देवं प्रणमामि। / ............. ।
8. वयं विश्वशान्तिम् इच्छामः। / ............. ।
9. ते मार्गे सन्ति। / .............. ।
10. त्वं कीर्तिं प्राप्नोषि। / ............. ।

6. अत्र दत्तं गद्यांशम् उचितेन क्रियापदेन पूरयत– (सौकर्याय कानिचित् क्रियापदानि अस्माभिः लिखितानि अपि सन्ति।)

संस्कृतसाहित्ये अनेकाः कवयित्र्यः <u>वर्तन्ते</u> (वृत्)। तासां जीवनचरित्रविषये वयम् अधिकं न <u>जानीमहे</u> (ज्ञा)। तासां कृतीः अपि पूर्णतया न <u>लभामहे</u>। प्रायः उपचत्वारिंशानां कवयित्रीणां मुक्तकानि काव्यानि वा अद्य <u>लभामहे</u>। (लभ्)

स्वतन्त्रकाव्यकर्त्रीषु विज्जिका अग्रस्थाने ............... (वि + राज्)। तस्याः 'विजयाम्बिका' इत्यपि नाम .............(विद्)। सा कर्णाटके जन्म अलभत। 'कौमुदीमहोत्सव'नामकं नाटकं सा लिखितवती। अपरा कवयित्री तिरुमलाम्बा स्वीयेन 'वरदाम्बिकापरिणय'नामकेन चम्पूग्रन्थेन संस्कृताकाशे ............. (शोभ्)। 'रघुनाथाभ्युदय'नामकस्य ऐतिहासिककाव्यस्य कर्त्री रामभद्राम्बा सप्तदशे शतके तञ्जावूरुनगरे अजायत।

www.thearyasamaj.org

पण्डिताः प्रसिद्धकाव्येषु 'मधुराविजयम्' अन्यतमं ............ (मन्) । अस्य कर्त्री गङ्गादेवी विजय-नगरस्थापकस्य बुक्करायस्य स्नुषा .............(वृत्) ।

एवमेव देवकुमारिका, शीलाभट्टारिका, क्षमाराव् - इत्यादयः अन्याः अपि कवयित्र्यः ...........(विद) । एतासां कवयित्रीणां काव्यैः संस्कृतसाहित्यलोकः नितरां ............... (प्र+काश्) ।

7. प्रथमं वाक्यम् अवधानेन पठत । द्वितीयवाक्यस्य कर्तृपदं दृष्ट्वा वाक्यानि परिवर्तयत -


| | |
|---|---|
| यथा - आकाशे सूर्यः प्रकाशते । | **आकाशे नक्षत्राणि प्रकाशन्ते ।** |
| 1. सर्वे कीर्तिं कामयन्ते । | अहं ....................................... । |
| 2. यूयं नितरां मोदध्वे । | तौ ....................................... । |
| 3. युवकौ गुरुं वन्देते । | वयं ....................................... । |
| 4. एताः संस्कृतेन भाषन्ते । | यूयं ....................................... । |
| 5. भवान् न स्पर्धते । | भवन्तौ ....................................... । |
| 6. के कष्टात् पलायन्ते ? | कौ....................................... । |
| 7. वयं संस्कृतोन्नतिम् अपेक्षामहे । | आवां ....................................... । |
| 8. तौ किमर्थं शङ्केते ? | यूयं ....................................... । |
| 9. भवत्यः किम् ऊहन्ते ? | त्वं ....................................... । |
| 10 . एतौ कष्टं सहेते । | वयं ....................................... । |
| 11. अहं क्रीडाम् आलोके । | युवां ....................................... । |
| 12. खद्योतः द्योतते । | खद्योताः ....................................... । |
| 13. त्वम् आसन्दे विराजसे । | ते ....................................... । |
| 14. आवां वर्धावहे । | भवन्तः ....................................... । |
| 15. ताः सत्कार्ये रमन्ते । | वयं ....................................... । |
| 16. पुष्पाणि वृक्षे शोभन्ते । | पुष्पं....................................... । |
| 17. युवां विजयं लभेथे । | अहं ....................................... । |
| 18. वयं राष्ट्राय प्रयतामहे । | सर्वे ....................................... । |

सूक्तिः - सत्यमेव जयते, नानृतम् ।

www.thearyasamaj.org

# १४ सर्वे मम बान्धवाः

आत्मनेपदिनः धातवः
लोट्लकारः



एतत् सम्भाषणम् उच्चैः पठत –

नन्दिनी – अमृते ! भवती ह्यः विद्यालयं किमर्थं न आगतवती ?

अमृता – मम मातुलः विदेशात् आगतः । अतः एव । सखि ! ह्यः कः कः पाठः आसीत् ?

नन्दिनी – ह्यः गणितपाठः आसीत् । विज्ञानपाठः अपि आसीत् ।

अमृता – किं संस्कृतपाठः न आसीत् ?

नन्दिनी – न । ह्यः आचार्यः गुरुगोविन्दसिंहस्य पुत्रयोः जोरावरसिंह–फतेसिंहयोः कथाम् अवदत् । अहो ! अतीव हृदयस्पर्शिनी कथा सा । तस्याः श्रवणेन नेत्रे सजले जाते । अन्ते आचार्यः अस्मान् उपदिष्टवान् अपि । तस्य एकैकं वाक्यमपि मनसि अनवरतं गुञ्जति ।

अमृता – आचार्यः किं किम् उपदिष्टवान् ? कृपया **ब्रूताम्** ।

नन्दिनी – तयोः बालकयोः बलिदानगाथां वर्णयन् सः उक्तवान् – ''प्रियच्छात्राः ! भवन्तः अपि एतौ बालकौ इव **वर्धन्ताम्** । मातृभूमिं सदैव **आद्रियन्ताम्** । लघुषु विषयेषु कदापि मा **स्पर्धन्ताम्** । सज्जनानां सम्पर्कं **कुर्वताम्** । सदैव पुण्यात्मनां चरितानि **अधीयताम्** । पूज्यान् जनान् सदा **वन्दन्ताम्** । सर्वप्राणिषु दयां **कुर्वताम्** । सर्वान् **आद्रियन्ताम्** । असत्यम् अहितं वा मा **ब्रुवताम्** । एकैकः अपि अपरस्य हिताय **यतताम्** । न कस्यापि हिंसां **कामयताम्** । सर्वे मम बान्धवाः इति **मन्यताम्** । कोऽपि कुकर्मसु न कदापि **रमताम्** । देशस्य यशः श्रेयश्च भवादृशान् बालान् अवलम्बेते । यतः अद्यतनबालाः एव श्वस्तननागरिकाः । अतः यूयं सदैव अवधानेन **वर्तध्वम्** ।''

अमृता – अहो ! कीदृशानि महत्त्वपूर्णानि वचनानि । नन्दिनि ! आचार्यस्य वचनानि आवां सदा स्मराव । सदैव स्नेहेन **वर्तावहै** । सहैव **रमावहै** ।

नन्दिनी – तथैव भवतु ।

www.thearyasamaj.org

➪ आत्मनेपदिनां धातूनां लोट्लकारे रूपाणि एवं भवन्ति –

'वन्द्' धातुः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| *प्रथमपुरुषः* | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| *मध्यमपुरुषः* | वन्दस्व | वन्देथाम् | वन्दध्वम् |
| *उत्तमपुरुषः* | वन्दै | वन्दावहै | वन्दामहै |

एवमेव ईक्षते, शोभते, वर्धते, स्पर्धते, गाहते, रोचते, मोदते, लभते, रमते, भाषते, राजते, कम्पते, लज्जते – इत्यादयः ।

**अभ्यासः**

1. उदाहरणपदानि दृष्ट्वा रिक्तस्थानानि उचितपदैः पूरयत –

| | सः | ते | त्वम् | यूयं | अहम् | वयम् |
|---|---|---|---|---|---|---|
| रमते | रमताम् | रमन्ताम् | रमस्व | रमध्वम् | रमै | रमामहै |
| सहते | ....... | ....... | ....... | ....... | ....... | ....... |
| लोकते | ....... | ....... | ....... | ....... | ....... | ....... |
| वर्तते | ....... | ....... | ....... | ....... | ....... | ....... |
| लभते | ....... | ....... | ....... | ....... | ....... | ....... |
| वन्दते | ....... | ....... | ....... | ....... | ....... | ....... |
| द्योतते | ....... | ....... | ....... | ....... | ....... | ....... |
| विद्यते | ....... | ....... | ....... | ....... | ....... | ....... |
| कम्पते | ....... | ....... | ....... | ....... | ....... | ....... |
| शोभते | ....... | ....... | ....... | ....... | ....... | ....... |
| ऊहते | ....... | ....... | ....... | ....... | ....... | ....... |
| सेवते | ....... | ....... | ....... | ....... | ....... | ....... |
| डयते | ....... | ....... | ....... | ....... | ....... | ....... |
| ईक्षते | ....... | ....... | ....... | ....... | ....... | ....... |

www.thearyasamaj.org

2. कोष्ठकात् उचितं रूपं चित्वा लिखत। तदेव वाक्यं बहुवचने परिवर्त्य पार्श्वे लिखत –

1. वृक्षः **कम्पताम्**। (कम्पन्ताम् , कम्पताम् , कम्पेताम्) .................................. ।
2. पक्षी ............... । (डयन्ताम्, डयताम्, डयै) .................................. ।
3. अहं गुरुं ............... । (वन्दस्व, वन्दै, वन्दामहै) .................................. ।
4. सः उद्याने ............ । (रमताम्, रमस्व, रमन्ताम्) .................................. ।
5. त्वं नाटकं ............ । (वीक्षताम्, वीक्षध्वम्, वीक्षस्व) .................................. ।
6. सर्वः सुखं .......... । (लभताम्, लभस्व, लभन्ताम्) .................................. ।
7. त्वम् आचार्यं ........... । (सेवताम्, सेवध्वम्, सेवस्व) .................................. ।
8. भवती मा .............(लज्जै, लज्जताम्, लज्जन्ताम्) .................................. ।

## अवधेयम्

केषाञ्चित् आत्मनेपदिधातूनां रूपेषु भेदः भवति। एतानि रूपाणि उच्चैः पठत जानीत च –

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| 'कृञ्' धातुः | *प्रथमपुरुषः* | कुरुताम् | कुर्वाताम् | कुर्वताम् |
| | *मध्यमपुरुषः* | कुरुष्व | कुर्वाथाम् | कुरुध्वम् |
| | *उत्तमपुरुषः* | करवै | करवावहै | करवामहै |
| *'शीङ्' धातुः* | *प्रथमपुरुषः* | शेताम् | शयाताम् | शेरताम् |
| | *मध्यमपुरुषः* | शेष्व | शयाथाम् | शेध्वम् |
| | *उत्तमपुरुषः* | शयै | शयावहै | शयामहै |
| *'ब्रूञ्' धातुः* | *प्रथमपुरुषः* | ब्रूताम् | ब्रुवाताम् | ब्रुवताम् |
| | *मध्यमपुरुषः* | ब्रूष्व | ब्रुवाथाम् | ब्रूध्वम् |
| | *उत्तमपुरुषः* | ब्रवै | ब्रवावहै | ब्रवामहै |

www.thearyasamaj.org

3. अधस्तनवाक्येषु क्रियापदानि विभज्य प्रयुक्तानि। तेषां योजनेन वाक्यानि परिवर्तयत –

| | |
|---|---|
| 1. छात्राः वन्दनं कुर्वताम्। | छात्राः **वन्दन्ताम्** । |
| 2. निरीक्षकः ईक्षणं कुरुताम्। | ........................................ । |
| 3. भवान् अवलोकनं कुरुताम्। | ........................................ । |
| 4. पक्षिणः आकाशे डयनं कुर्वताम्। | ........................................ । |
| 5. वयं सेवां करवामहै। | ........................................ । |
| 6. वानरौ कूर्दनं कुर्वाताम्। | ........................................ । |
| 7. अहं सेवनं करवै। | ........................................ । |
| 8. वैद्याः परीक्षणं कुर्वताम्। | ........................................ । |
| 9. शिशुः तल्पे शयनं कुरुताम्। | ........................................ । |
| 10. सस्यानां वर्धनं भवतु। | सस्यानि ........................................ । |
| 11. वृक्षाणां कम्पनं भवतु। | वृक्षाः ........................................ । |

3. प्रथमकोष्ठके दत्तानां कर्तृपदानाम् अनुसारं द्वितीयकोष्ठकस्थानि क्रियापदानि लोट्लकारे परिवर्त्य वाक्यानि रचयत –

| | |
|---|---|
| सः, एषः, भवान्, सा, बालकः<br>ते, ताः, एताः, भवन्तः, अहम्,<br>त्वम्, आवाम्, वयम्, यूयम् | भाषते, वन्दते, सेवते,<br>लभते, लोकते, वीक्षते,<br>ब्रूते, कुरुते, शेते, रमते |

यथा –

**सः गुरुं वन्दताम्।**      **वयं देवं वन्दामहै।**

1. ..............................।
2. ..............................।
3. ..............................।
4. ..............................।

www.thearyasamaj.org

5. ..............................।
6. ..............................।
7. ..............................।
8. ..............................।
9. ..............................।
10. ..............................।
11. ..............................।
12. ..............................।
13. ..............................।
14. ..............................।
15. ..............................।
16. ..............................।
17. ..............................।
18. ..............................।
19. ..............................।
20. ..............................।
21. ..............................।
22. ..............................।
23. ..............................।
24. ..............................।
25. ..............................।
26. ..............................।
27. ..............................।
28. ..............................।
29. ..............................।
30. ..............................।

सूक्तिः – सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।

**विशेषः**

## चाटुश्लोकः

किं वाससेत्यत्र विचारणीयं वासःप्रधानं खलु योग्यतायाः ।
पीताम्बरं वीक्ष्य ददौ स्वकन्यां चर्माम्बरं वीक्ष्य विषं समुद्रः ॥

वस्त्रेण किम् ? इति विषये चिन्तनीयं किञ्चित् अस्ति । वस्त्रं योग्यतायाः निर्णायकं भवति । भगवान् विष्णुः पीताम्बरधारी अस्ति इति तं दृष्ट्वा समुद्रराजः तस्मै पुत्रीं लक्ष्मीं दत्तवान् । शिवः तु चर्माम्बरधारी । तं दृष्ट्वा समुद्रराजः तस्मै विषं दत्तवान् !

www.thearyasamaj.org

# सागरतीरविहारः १५

आत्मनेपदिनः धातवः
लृट्लकारः



विनीतः 'श्वः अहं किं करिष्यामि' इति चिन्तयन् अस्ति । तस्य वाक्यानि उच्चैः पठत –

'श्वः रविवासरः । सायम् अहं सागरतीरं गमिष्यामि । तत्र गोपालः मां **प्रतीक्षिष्यते** । सायङ्काले सागरशोभा नितरां **वर्धिष्यते** । बहवः जनाः तत्र **वर्तिष्यन्ते** । सर्वेऽपि सागरसौन्दर्यम् **आस्वदिष्यन्ते** ।

आकाशे चन्द्रः **प्रकाशिष्यते,** नक्षत्राणि **द्योतिष्यन्ते** । तदा सूर्यः सागरे **गाहिष्यते** । सः रक्तवर्णेन **शोभिष्यते** । सः पक्वं फलम् इव **भासिष्यते** । आवां तं सानन्दं **लोकिष्यावहे** । सर्वे जनाः अपि **लोकिष्यन्ते** । क्रीडारताः बालाः तत्र **वर्तिष्यन्ते** । तेषां चेष्टाः **वीक्षिष्यावहे** । तैः साकं भृशं **मोदिष्यावहे** । रात्रिं यावत् तत्रैव **रंस्यावहे** ....।'

➪ पठत जानीत च –

| लट्लकारः | लृट्लकारः | लट्लकारः | लृट्लकारः |
|---|---|---|---|
| वर्धते | वर्धिष्यते | द्योतते | द्योतिष्यते |
| वर्तते | वर्तिष्यते | भासते | भासिष्यते |
| शोभते | शोभिष्यते | ईक्षते | ईक्षिष्यते |
| लोकते | लोकिष्यते | स्वदते | स्वदिष्यते |
| मोदते | मोदिष्यते | कम्पते | कम्पिष्यते |

www.thearyasamaj.org

➪ आत्मनेपदिनां धातूनां लृट्लकारे रूपाणि एवं भवन्ति –

'वन्द्' धातुः

| | | | |
|---|---|---|---|
| *प्रथमपुरुषः* | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| *मध्यमपुरुषः* | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| *उत्तमपुरुषः* | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

➪ *कानिचन विशिष्टरूपाणि* –

रम् – रमते –रंस्यते
मन – मन्यते – मंस्यते
शीङ् – शेते – शयिष्यते
उत् +पद् –उत्पद्यते – उत्पत्स्यते
क्रीञ् –क्रीणीते –क्रेष्यते
कृञ् – कुरुते – करिष्यते
प्र +ष्ठा – प्रतिष्ठते – प्रस्थास्यते

## अभ्यासः

1. रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| वर्तते | वर्तिष्यते | ............. | वर्तिष्यन्ते |
| (वृत्) | ............. | ............. | ............. |
| | वर्तिष्ये | वर्तिष्यावहे | ............. |
| मोदते | ............ | ............ | मोदिष्यन्ते |
| (मुद) | मोदिष्यसे | ........... | ........... |
| | ........... | ........... | मोदिष्यामहे |
| कम्पते | ............ | कम्पिष्येते | ............ |
| (कम्प्) | ............ | ............ | कम्पिष्यध्वे |
| | ............ | ............ | ............ |
| शोभते | शोभिष्यते | ............ | ............ |
| (शुभ) | ............ | शोभिष्येथे | ............ |
| | ............ | ............ | शोभिष्यामहे |
| लोकते | ............ | ............ | ............ |
| (लोकृ) | लोकिष्यसे | ............ | ............ |
| | ............ | ............ | ............ |

www.thearyasamaj.org

2. अधः दत्तानां क्रियापदानां भविष्यत्कालरूपाणि उपयुज्य पार्श्वे दत्तानां कर्तृवाचकशब्दानां योजनेन वाक्यानि रचयत –

सः
ते
एताः
युवकौ
अहम्
वयम्
आवाम्
त्वम्
यूयम्

वन्दते, कुरुते, सेवते, प्रतिष्ठते, मोदते, कामयते, रमते, प्रार्थयते, वीक्षते

उदा –

1. सः वन्दिष्यते ।　　2. ते वन्दिष्यन्ते ।

3. ........................ ।　　4. ........................ ।

5. ........................ ।　　6. ........................ ।

7. ........................ ।　　8. ........................ ।

9. ........................ ।　　10. ........................ ।

11. ........................ ।　　12. ........................ ।

13. ........................ ।　　14. ........................ ।

15. ........................ ।　　16. ........................ ।

17. ........................ ।　　18. ........................ ।

19. ........................ ।　　20. ........................ ।

21. ........................ ।　　22. ........................ ।

23. ........................ ।　　24. ........................ ।

25. ........................ ।　　26. ........................ ।

27. ........................ ।　　28. ........................ ।

29. ........................ ।　　30. ........................ ।

www.thearyasamaj.org

3. पाठाधारितानाम् अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत –

1. गोपालः सागरतीरे किं करिष्यते ?

............................................................ ।

2. किं सायङ्काले सागरशोभा वर्धिष्यते ?

आम्, ...................................................... ।

3. किं सर्वे सागरसौन्दर्यम् आस्वदिष्यन्ते ?

............................................................ ।

4. किं चन्द्रः आकाशे प्रकाशिष्यते ?

............................................................ ।

5. किं सायङ्काले सूर्यः सागरे गाहिष्यते ?

............................................................ ।

6. सायङ्काले आकाशे कः रक्तवर्णेन शोभिष्यते ?

............................................................ ।

7. सागरतीरे रात्रिं यावत् कौ रंस्येते ?

............................................................ ।

8. सागरतीरे कीदृशाः बालाः वर्तिष्यन्ते ?

............................................................ ।

9. सायङ्काले पक्वं फलम् इव कः भासिष्यते ?

............................................................ ।

10. किं द्वे मित्रे सागरतीरे मोदिष्येते ?

............................................................ ।

www.thearyasamaj.org

4. निम्नलिखितेषु वाक्येषु लृट्लकारस्य रूपाणि प्रयुज्य वाक्यानि लिखत –

1. आकाशे चन्द्रः भासते। ..............................................।
2. सायङ्काले सागरशोभा वर्धते। ..............................................।
3. तारकाः आकाशे शोभन्ते। ..............................................।
4. क्रीडारताः बालाः तत्र वर्तन्ते। ..............................................।
5. शिशुः क्रमशः वर्धते। ..............................................।
6. सा सर्वत्र स्पर्धते। ..............................................।
7. ते उच्चैः भाषन्ते। ..............................................।
8. छात्राः जनान् सेवन्ते। ..............................................।
9. भवत्यः किमर्थम् अवलोकन्ते ? ..............................................।
10. मम मनसि संशयाः न जायन्ते। ..............................................।
11. वृक्षशाखा वायुना कम्पते। ..............................................।
12. पादपाः वर्धन्ते। ..............................................।
13. ग्रीष्मकाले तापः एधते। ..............................................।
14. बालाः कुत्र रमन्ते ? ..............................................।
15. सः पुस्तकं क्रीणीते। ..............................................।

5. यथानिर्दिष्टं परिवर्त्य लिखत –

1. सः प्रतीक्षिष्यते।
..............................................। (उत्तमपुरुषे)
2. सः पक्वं फलम् इव भासिष्यते।
..............................................। (मध्यमपुरुषे)
3. बालाः तत्र वर्तिष्यन्ते।
..............................................। (एकवचने)
4. आवां तेषां चेष्टाः वीक्षिष्यावहे।
..............................................। (प्रथमपुरुषे एकवचने)

www.thearyasamaj.org

5. रात्रिं यावत् तत्र एव रंस्यावहे।

............................................। (बहुवचने)

6. त्वं पुस्तकं वन्दिष्यसे।

............................................। (द्विवचने)

7. युवां प्रस्थास्येथे।

............................................। (उत्तमपुरुषे)

8. पादपाः उत्पत्स्यन्ते।

............................................। (द्विवचने)

9. त्वं मोदिष्यसे।

............................................। (प्रथमपुरुषे)

10. आवां मंस्यावहे।

............................................। (बहुवचने)

सूक्तिः – चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।

## लौकिकन्यायाः

4. **काकतालीयन्यायः**

कश्चित् काकः यदा तालवृक्षस्य समीपम् आगच्छत् तदा एव तस्मात् वृक्षात् पक्वं फलं अधः न्यपतत्। काकः तच्च फलं खादित्वा सन्तुष्टः अभवत्। एवम् अकस्मादेव अविचिन्तितरूपेण घटनाद्वयं प्रवर्तते तदा एषः न्यायः प्रयुज्यते।

5. **घट्टकुटीप्रभातन्यायः**

कथ्यते यत् शकटवान् वणिक् कश्चन करं दातुं न इच्छति स्म। राजमार्गेण गमनेन तत्र घट्टकुट्यां तिष्ठद्भ्यः अधिकारिभ्यः करः दातव्यः भवति इति चिन्तयित्वा सः तं मार्गं परिहरन् केनचित् दुर्गमेण मार्गेण रात्रौ प्रस्थितः। किन्तु इतस्ततः अटन् सः दौर्भाग्येण प्रभाते घट्टकुटीसमीपम् एव आगत्य अतिष्ठत्। विवशः सः करं दत्तवान्। कार्यं परिहर्तुम् इच्छायां सत्याम् अपि तत् अन्ततो गत्वा यदा अवश्यं करणीयं भवति तदा एषः न्यायः प्रयुज्यते।

www.thearyasamaj.org

# चिन्तां मा कुरु १६

विधिलिङ्लकारः
(सम्भावनार्थे)



नूतना रमेशश्च दम्पती। तौ पुत्रस्य जन्मदिनोत्सवम् अधिकृत्य तत्पूर्वदिने वार्तालापं कुरुतः। एतत् सम्भाषणम् उच्चैः पठत –

नूतना – भोः! श्वः विवेकस्य जन्मदिनोत्सवः। स्मरति खलु भवान्?

रमेशः – स्मरामि। अहं मित्राणि निमन्त्रितवान् अपि।

नूतना – तर्हि श्वः के के **आगच्छेयुः**?

रमेशः – राकेशः **आगच्छेत्**। सन्दीपः सपत्नीकः **आगच्छेत्**। (स्मृत्वा) अथवा तौ दम्पती न **आगच्छेताम्**। यतः तयोः गृहं प्रति ग्रामात् बान्धवाः आगताः सन्ति। मम महाविद्यालयात् त्रयः सहोद्योगिनः **आगच्छेयुः**। भवत्याः सखी शैलजा आगमिष्यति किम्?

नूतना – प्रायः सा आगन्तुं न **शक्नुयात्**। यतः तस्याः पुत्री रुग्णा अस्ति। कदाचित् तस्याः पतिः **आगच्छेत्**। भवान् सायं पञ्चवादनात् पूर्वं गृहं **प्राप्नुयात्** खलु?

रमेशः – **प्राप्नुयाम्**। प्रायः अहं गिरीशश्च मिलित्वा एव **आगच्छेव**।

नूतना – कः गिरीशः?

रमेशः – मम भागिनेयः भोः! श्वः भवत्याः बहूनि कार्याणि **भवेयुः** खलु! यदि सः आगमिष्यति तर्हि किञ्चित् साहाय्यं **भवेत्**।

www.thearyasamaj.org

नूतना – निश्चयेन। अन्यथा अहं सर्वं कार्यं कथं **कुर्याम्** ? विवेक ! श्वः ये आगमिष्यन्ति ते त्वां प्रश्नान् **पृच्छेयुः**। त्वया सह प्रीत्या वार्तालापं **कुर्युः**। त्वयापि तैः सह सम्यक् वार्तालापः करणीयः।

विवेकः – अस्तु अम्ब !

नूतना – केऽपि बालाः क्रीडितुं बहिः **आह्वयेयुः**। परन्तु श्वः बहिः मा गच्छ। यतः मध्ये मध्ये अहं वा तव पिता वा त्वाम् **आह्वयेव**।

विवेकः – तथैव अस्तु अम्ब !

रमेशः – आगताः जन्मदिनस्य शुभाशयान् **वदेयुः**। केऽपि उपायनं किमपि **दद्युः** अपि। धन्यवादः वक्तव्यः त्वया।

विवेकः – तर्हि श्वः मम कष्टमेव **भवेत्**।

नूतना – किमपि कष्टं न भविष्यति। चिन्तां मा कुरु।

## अवधेयम्

एतानि वाक्यानि सावधानं पठत –

1. सन्दीपः सपत्नीकः आगच्छेत्। अथवा तौ दम्पती न आगच्छेताम्।
2. प्रायः सा आगन्तुं न शक्नुयात्।
3. कदाचित् तस्याः पतिः आगच्छेत्।
4. प्रायः अहं गिरीशश्च मिलित्वा एव आगच्छेव।

उपरिलिखितेषु वाक्येषु जनानाम् आगमनस्य सम्भावनामात्रम् अस्ति। इदं निश्चितं नास्ति यत् ते जनाः आगमिष्यन्ति एव। 'कदाचित्, प्रायः, अथवा' इत्यादिपदानि सम्भावनां प्रदर्शयन्ति। 'सम्भावना' (ऊहा) इत्यर्थे विधिलिङ्लकारस्य प्रयोगः क्रियते। (अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि सर्वाणि विधिलिङ्–लकारस्य रूपाणि।)

## अभ्यासः

1. एतानि उदाहरणवाक्यानि परिशीलयत, लिखत च यत् अत्र सन्देहः अस्ति, उत न इति।

| | |
|---|---|
| 1. प्रायः अद्य वृष्टिः न **भवेत्**। | सन्देहः अस्ति। |
| 2. कदाचित् मम प्राप्तेः पूर्वमेव ते **गच्छेयुः**। | .................. |
| 3. यदि यानं शीघ्रं **गच्छेत्** तर्हि समये **प्राप्नुयाम्** एव। | .................. |

www.thearyasamaj.org

4. सम्भवतः कक्ष्यायां श्वः गणितपाठः **भवेत्** । ................
5. कदाचित् परीक्षा अस्मिन् मासे एव **भवेत्** । ................
6. कदाचित् विद्युत् गता **स्यात्** । ................
7. सर्वे खादन्ति । ................
8. सर्वे **पश्येयुः** । ................
9. अहं सर्वं न जानामि । ................
10. अहं सर्वं न **जानीयाम्** । ................

परस्मैपदिनां धातूनां विधिलिङ्लकारे रूपाणि एवं भवन्ति –

'पठ' धातुः

| | | | |
|---|---|---|---|
| *प्रथमपुरुषः* | पठेत् | पठेताम् | पठेयुः |
| *मध्यमपुरुषः* | पठेः | पठेतम् | पठेत |
| *उत्तमपुरुषः* | पठेयम् | पठेव | पठेम |

एवमेव लिखति, नयति, गच्छति, तिष्ठति, पृच्छति, खादति, पश्यति, इच्छति, वदति, पतति, पिबति, हसति, क्रीडति, चलति – इत्यादीनां विधिलिङ्रूपाणि भवन्ति ।

## अभ्यासः

2. रिक्तस्थानानि पूरयत –

| | प्रथमपुरुषः | | उत्तमपुरुषः | |
|---|---|---|---|---|
| | एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
| गच्छति | गच्छेत् | गच्छेयुः | गच्छेयम् | गच्छेम |
| पृच्छति | ............ | ............ | ............ | ............ |
| नयति | ............ | ............ | ............ | ............ |
| नमति | ............ | ............ | ............ | ............ |
| वदति | ............ | ............ | ............ | ............ |
| खादति | ............ | ............ | ............ | ............ |
| इच्छति | ............ | ............ | ............ | ............ |
| स्मरति | ............ | ............ | ............ | ............ |

www.thearyasamaj.org

## अवधेयम्

केषाञ्चित् धातूनां रूपाणि भिन्नानि भवन्ति -

यथा -

'ग्रह'धातुः

| | | |
|---|---|---|
| गृह्णीयात् | गृह्णीयाताम् | गृह्णीयुः |
| गृह्णीयाः | गृह्णीयातम् | गृह्णीयात |
| गृह्णीयाम् | गृह्णीयाव | गृह्णीयाम |

एवमेव बध्नाति, जानाति, क्रीणाति, प्रीणाति, अश्नाति - इत्यादीनां रूपाणि भवन्ति।

'शक्'धातुः

| | | |
|---|---|---|
| शक्नुयात् | शक्नुयाताम् | शक्नुयुः |
| शक्नुयाः | शक्नुयातम् | शक्नुयात |
| शक्नुयाम् | शक्नुयाव | शक्नुयाम |

एवमेव चिनोति, आप्नोति, शृणोति, तनोति - इत्यादीनां रूपाणि भवन्ति।

'कृञ्'धातुः

| | | |
|---|---|---|
| कुर्यात् | कुर्याताम् | कुर्युः |
| कुर्याः | कुर्यातम् | कुर्यात |
| कुर्याम् | कुर्याव | कुर्याम |

'दा'धातुः

| | | |
|---|---|---|
| दद्यात् | दद्याताम् | दद्युः |
| दद्याः | दद्यातम् | दद्यात |
| दद्याम् | दद्याव | दद्याम |

3. अधोलिखितानि वाक्यानि सम्भावनारूपेण परिवर्त्य लिखत -

1. मम मित्रम् आगच्छति। ............................................ ।
2. सः पत्रं लिखति। ............................................ ।
3. अतिथयः प्रश्नान् पृच्छन्ति। ............................................ ।
4. आवां त्वाम् आह्वयावः। ............................................ ।
5. सः श्वः चिन्तां करिष्यति। ............................................ ।
6. वयं प्रीत्या वार्तालापं कुर्मः। ............................................ ।
7. सर्वे आगन्तुं न शक्नुवन्ति। ............................................ ।
8. तौ दम्पती न आगमिष्यतः। ............................................ ।
9. भवत्याः बहूनि कार्याणि भवन्ति। ............................................ ।
10. अनेन मम साहाय्यं भवति। ............................................ ।

www.thearyasamaj.org

4. उदाहरणानुसारं रिक्तस्थानानि पूरयत –

| | | | | |
|---|---|---|---|---|
| क्रीणाति | क्रीणीयात् | क्रीणीयुः | क्रीणीयाम् | क्रीणीयाम |
| गृह्णाति | .......... | ............. | .............. | ........... |
| अश्नाति | .......... | ............. | .............. | ........... |
| जानाति | .......... | ............. | .............. | ........... |
| बध्नाति | .......... | ............. | .............. | ........... |
| शक्नोति | शक्नुयात् | शक्नुयुः | शक्नुयाम् | शक्नुयाम |
| तनोति | .......... | ............. | .............. | ........... |
| शृणोति | .......... | ............. | .............. | ........... |
| प्राप्नोति | .......... | ............. | .............. | ........... |
| चिन्तयति | चिन्तयेत् | चिन्तयेयुः | चिन्तयेयम् | चिन्तयेम |
| गणयति | .......... | ............. | .............. | ........... |
| मार्जयति | .......... | ............. | .............. | ........... |
| कथयति | .......... | ............. | .............. | ........... |

5. कस्यचिदपि धातोः विधिलिङ्लकाररूपाणि उपयुज्य वाक्यानि रचयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सः | सः कुर्यात् । | तौ कुर्याताम् । | ते कुर्युः । |
| सा | ..................। | .........................। | .........................। |
| एषः | ..................। | .........................। | .........................। |
| एषा | ..................। | .........................। | .........................। |
| भवान् | ..................। | .........................। | .........................। |
| भवती | ..................। | .........................। | .........................। |
| अयं | ..................। | .........................। | .........................। |
| इयं | ..................। | .........................। | .........................। |
| त्वं | ..................। | .........................। | .........................। |
| अहम् | अहं शक्नुयाम् । | .........................। | .........................। |

www.thearyasamaj.org

6. युष्माकं गृहे उत्सवः अस्ति। सर्वे मिलित्वा कार्यं करिष्यन्ति। 'कः / का' किं कुर्यात् इति पञ्च वाक्यानि लिखत –

1. .................................................... ।
2. .................................................... ।
3. .................................................... ।
4. .................................................... ।
5. .................................................... ।

7. अधः लिखितानि वाक्यानि 'कदाचित् , प्रायः, श्वः, यदि' – इत्यादीनां पदानां प्रयोगेण सम्भावनार्थे परिवर्त्य लिखत –

| | |
|---|---|
| 1. अद्य रमेशः आगच्छति। | **कदाचित् अद्य रमेशः आगच्छेत् ।** |
| 2. सः आगत्य करोति। | ........................................ । |
| 3. त्वं मित्रगृहं गत्वा फलानि खादसि। | ........................................ । |
| 4. वयं तत्र न तिष्ठामः। | ........................................ । |
| 5. बालकाः अत्र क्रीडन्ति। | ........................................ । |
| 6. जनाः किं कुर्वन्ति ? | ........................................ ? |
| 7. सा आगच्छति, त्वमपि आगच्छसि। | ........................................ । |
| 8. कार्यं समाप्य यूयं खादथ। | ........................................ । |
| 9. भवन्तः पुस्तकालयं गत्वा लिखन्ति। | ........................................ । |
| 10. गृहे के के तिष्ठन्ति ? | ........................................ ? |

6. विधिलिङ्क्रियापदानां प्रयोगेण अधः लिखितं संवादं पूरयत–

श्यामः – किम् अद्य भवती तत्र गमिष्यति ?
विजिता – कदाचित् .............. ।
श्यामः – किं भवती कार्यं शीघ्रं करोति ?
विजिता – प्रायः शीघ्रम् एव .............. ।
श्यामः – प्रायः अहमपि शीघ्रं कार्यं .............. ।
विजिता – किं त्वं विद्यालये क्रीडिष्यसि ?
श्यामः – यदा विद्यालयं .............. (गम्) तदा ..............।

सूक्तिः – क्षणशः कणशश्चैव विद्याम् अर्थं च साधयेत्।

www.thearyasamaj.org

# वयं मिलित्वा कार्यं कुर्मः १७

विधिलिङ्लकारः
(विध्यर्थे)

एतत् दूरवाणीसम्भाषणम् उच्चैः पठत –

वरदा – हरिः ओम्, शारदा खलु ?

शारदा – आम् । वदतु, कः विशेषः ?

वरदा – सर्वं कुशलम् । भवती किमर्थं ह्यस्तनं मेलनं न आगतवती ?

शारदा – क्षम्यताम् । मया अन्यत्र गन्तव्यम् आपतितम् । अतः एव नागतवती । मेलने के के निर्णयाः स्वीकृताः ?

वरदा – प्रायः सर्वाणि कार्याणि चिन्तितानि । उत्तरदायित्वानि अपि निश्चितानि ।

शरदा – भगिनि, कस्यै किम् उत्तरदायित्वं दत्तम् ?

वरदा – सभाकार्यं नलिनी **पश्येत्** । तस्याः साहाय्यार्थं तिस्रः **भवेयुः** । अतिथीनां व्यवस्थां रेवती **निर्वहेत्** । गङ्गा तस्याः साहाय्यं **कुर्यात्** । लतिका शुभा च पानजलं **वितरेताम्** । कार्यक्रम–संचालनं लक्ष्मीः **कुर्यात्** ।

शारदा – भगिनि, वैयक्तिकगीतं का **गायेत्** ?

वरदा – गायत्री वैयक्तिकगीतं **गायेत्** । विजया स्वागतं विदिता धन्यवादं च **व्याहरेताम्** ।

शारदा – वरदे, अहं किं **कुर्याम्** ?

वरदा – भवती प्रचारकार्यं **कुर्यात्** । सर्वेभ्यः पत्रं **लिखेत्** । सर्वान् अपि **आह्वयेत्** । पत्रिकाभ्यः वार्ताम् अपि **दद्यात्** । यतः कार्यक्रमः भविष्यति इति सर्वेऽपि **जानीयुः** किल ....।

शारदा – अन्यत् किं किं **कुर्याम्** ?

वरदा – कार्यक्रमविवरणपत्रं सिद्धं **कुर्यात्** । तत्र दोषाः न **स्युः** ।

शारदा – अस्तु, तथैव करिष्यामि ।

वरदा – पुनः भवती गीतामपि **सूचयेत्** । यतः प्रार्थनां सा **गायेत्** । सा ह्यः नागता आसीत् ।

शारदा – भवतु, अवश्यं सूचयामि ।

वरदा – भवती समये एव **आगच्छेत्** । वयं सर्वाः अपि मिलित्वा कार्यक्रमं सम्यक् **कुर्याम** ।

शारदा – निश्चयेन । धन्यवादः ।

## अवधेयम्

1. भवान् श्वः समये प्राप्नुयात् ।
2. सर्वेऽपि गृहपाठान् अवश्यं लिखेयुः ।
3. छात्रः अध्यापकान् न उपहसेत् ।
4. सेवकाः कार्यं कुर्युः ।
5. भवती अद्य एव दूरवाणीं कुर्यात् ।
6. वयं कार्यक्रमं सम्यक् कुर्याम ।

उपरितनेषु वाक्येषु विधिः (आज्ञा) इत्यर्थे लिङ्लकारस्य प्रयोगः कृतः अस्ति ।

www.thearyasamaj.org

## अभ्यासः

1. अत्र मञ्जूषायां क्रियापदानि लिखितानि सन्ति । ततः विधिलिङ्लकारस्य क्रियापदानि एव चित्वा रिक्तस्थानेषु लिखत –

> चलति, अचलत्, पठेताम्, पठेम, नंस्यति, अशक्नोत्, शक्नुयात्, कुर्वन्तु, कुर्युः, शक्नुयाताम्, गृह्णीयुः, क्रीणाति, क्रीणीयात्, पठानि, पृच्छेयम्, प्राप्नुयात्, गणयेः, क्रीडेम, चलेताम्, दद्यात्, शृणोति, शृणुयात्, कुर्वः, कुर्याव, शक्नुयाम्

.................. .................. .................. ..................

.................. .................. .................. ..................

.................. .................. .................. ..................

.................. .................. .................. ..................

2. रमेशः श्वः जन्तुशालां गमिष्यति । अद्य सः कीदृशीं कल्पनां करोति इति कोष्ठकसाहाय्येन वाक्यानि लिखत–

| | | |
|---|---|---|
| मयूरः नृत्यति । | वानराः विहरन्ति । | सिंहाः गर्जन्ति । |
| पिकः कूजति । | अश्वः धावति । | गजौ क्रीडतः । |
| शुकाः वदन्ति । | राजहंसः तरति । | शशाः धावन्ति । |
| बकौ गृह्णीतः । | उष्ट्रः चर्वति । | व्याघ्रः गर्जति । |
| कच्छपः चलति । | अजगराः गिलन्ति । | मीनाः तरन्ति । |

1. मयूरः नृत्येत् । 2........................। 3........................।

4........................। 5........................। 6........................।

7........................। 8........................। 9........................।

10........................। 11........................। 12........................।

13 ........................। 14........................। 15........................।

www.thearyasamaj.org

3. लट्रूपाणां स्थाने विधिलिङ्रूपाणि योजयित्वा वाक्यानि रचयत –

उदा – छात्रः गृहपाठं लिखति। छात्रः गृहपाठं लिखेत्।

1. भवती काव्यं पठति। ......................................।
2. बालः क्षीरं पिबति। ......................................।
3. सः नगरं गच्छति। ......................................।
4. ते नाटकं पश्यन्ति। ......................................।
5. एताः नृत्यं कुर्वन्ति। ......................................।
6. वयं ज्ञानं सम्पादयामः। ......................................।
7. जनाः उद्याने विहरन्ति। ......................................।
8. बालिकाः कलहं न कुर्वन्ति। ......................................।
9. भवन्तः सर्वं जानन्ति। ......................................।
10. छात्राः वृष्टौ क्रीडन्ति। ......................................।
11. अहं देवं नमामि। ......................................।
12. सर्वे कर्मनिरताः भवन्ति। ......................................।
13. त्वं पुस्तकं क्रीणासि। ......................................।
14. वयम् अप्रियं न वदामः। ......................................।
15. अहं गुरोः वाक्यं स्मरामि। ......................................।
16. के कार्याणि कुर्वन्ति ? ......................................?
17. मातरः पुत्रान् लालयन्ति। ......................................।
18. वयं सज्जनैः सह वसामः। ......................................।
19. त्वं सङ्गीतं शृणोषि। ......................................।
20. गुरुः शिष्यान् उपदिशति। ......................................।
21. यूयं समाजसेवां कुरुथ। ......................................।
22. वैद्यः रोगिणं पश्यति। ......................................।
23. युवत्यः लेखनीः क्रीणन्ति। ......................................।
24. भवान् गीतं लिखति। ......................................।
25. ताः श्लोकान् वदन्ति। ......................................।

www.thearyasamaj.org

4. उदाहरणानुगुणम् आवरणे दत्तानां धातूनां विधिलिङ्लकाररूपम् उपयुज्य वाक्यानि लिखत –

उदा – **सः पाठं पठेत् । (पठ)**

1. ................................................................। (लिख)
2. ................................................................। (नम)
3. ते..............................................................। (गम्)
4. ................................................................। (ग्रह)
5. ................................................................। (चल)
6. ................................................................। (पठ)
7. अहं.............................................................। (दा)
8. ................................................................। (कृ)
9. ................................................................। (श्रु)
10. ...............................................................। (चि)
11. वयं............................................................। (वद)
12. ...............................................................। (प्रच्छ)
13. ...............................................................। (हस्)
14. ...............................................................। (पा)
15. ताः............................................................। (कृ)
16. ...............................................................। (क्री)
17. ...............................................................। (प्री)
18. ...............................................................। (खाद्)
19. युवकाः.........................................................। (कृ)

➪ एते सुभाषिते उच्चैः पठत, तत्र प्रयुक्तानि विधिलिङ्लकाररूपाणि जानीत च –

1. दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेत् जलम् ।
मन्त्रपूतं वदेत् वाक्यं मनःपूतं समाचरेत् ॥

2. सर्वथा सन्त्यजेत् वादं न कञ्चित् मर्मणि स्पृशेत् ।
सर्वान् परित्यजेत् अर्थान् स्वाध्यायस्य विरोधिनः ॥

सूक्तिः – मा कश्चित् दुःखभाग् भवेत् ।

www.thearyasamaj.org

# वीरमाता विदुला १८

आत्मनेपदिनः धातवः
(लङ्लकारः विधिलिङ्लकारश्च)

एतां कथाम् उच्चैः पठत –



सौवीरदेशे सञ्जयः नाम राजा **अवर्तत**। तस्य पिता वृद्धक्षत्रः। माता च विदुला।

कदाचित् सञ्जयस्य समीपराज्यस्थेन सिन्धुराजेन सह युद्धं **प्रावर्तत**। यद्यपि सञ्जयः भृशम् **अयुध्यत** तथापि तस्य सैन्यं पराजयम् **अलभत**। बहवः सैनिकाः **अम्रियन्त**। भीतः सञ्जयः प्राणान् रक्षितुं ततः **पलायत**। राजभवनम् आगतः सः अन्तःपुरं प्राप्य निरुत्साहतया **अशेत**।

रणाङ्गणात् आगतं पुत्रं विदुला दूरात् एव **अलोकत**। पश्चात् सा पुत्रस्य निकटं गत्वा **अब्रूत** – "सञ्जय! भवादृशं भीरुं पुत्रं प्राप्य अहं नितरां लज्जे। भवान् यावज्जीवं **युध्येत** इति चिन्तनं मम मनसि **अवर्तत**। परं भवान् भीरुः इव पलायितः। पुत्र! त्वं वीरक्षत्रियकुले **अजायथाः**। पलायनं न ते भूषणम्। अतः इदानीम् एव युद्धक्षेत्रं प्रतिनिवर्तस्व। 'मुहूर्तं ज्वलितं श्रेयः, न तु धूमायितं चिरम्' इति वाक्यं स्मर। पराक्रमेण युध्यस्व" इति।

तदा सञ्जयः – "अम्ब! शत्रुसैन्यम् अस्माकं सैन्यस्य अपेक्षया बृहत् शक्तियुक्तं च अस्ति। अतः एव वयं **पराजयामहि**। अग्रे बृहतः सैन्यस्य सङ्ग्रहं कृत्वा विजयं लप्स्ये। अद्य यदि तत्र गच्छेयं तर्हि अवश्यम् एव **म्रियेय**" इति अवदत्।

विदुला पुत्रस्य वचनं **निराकुरुत**। सा पुनरपि – "पुत्र! भवान् युद्धे **विजयेत**, न वा। चिन्तां मा करोतु। युद्धक्षेत्रं गच्छतु। राजानं भवन्तं पलायितं दृष्ट्वा सैनिकाः किं **कुर्वीरन्**? ते किङ्कर्तव्यताविमूढाः

www.thearyasamaj.org

**जायेरन्** । अतः भवान् आदौ विकीर्णस्य सैन्यस्य एकत्रीकरणं **कुर्वीत** । सिन्धुराजस्य सैन्ये विद्यमानान् दोषान् लोपान् च **जानीयात** । तस्य शत्रवः राजानः ये सन्ति तान् अपि आह्वयेत् । तदनन्तरं तेन सह **युध्येत** । भवान् अवश्यं **विजयेत**''इति तं प्रोत्साहितवती ।

मातुः वचनेन सञ्जयः जागरितः । सः असामान्यं धैर्यम् **अलभत** । तस्य उत्साहः **अवर्धत** । सः उत्थाय मातरं प्रणम्य – ''अम्ब ! धीरमातुः भवत्याः वचनैः अहं नूतनः मनुष्यः **अजाये** । मम पराक्रमं **लोकताम्** । अद्य अवश्यं विजयं **लभेय**'' इति उक्त्वा युद्धार्थं **प्रातिष्ठत** ।

सञ्जयः मातृवचनानुसारं शीघ्रमेव सैन्यं सज्जीकृत्य झटिति शत्रोः सैन्यस्य उपरि आक्रमणम् **अकुरुत** । विजयोन्मत्तः सिन्धुराजः तस्य सैनिकाः च एतेन आक्रमणेन **व्यस्मयन्त** । सञ्जयस्य सैनिकाः अपूर्वशौर्येण **अयुध्यन्त** । विजयम् **अलभन्त** च ।

विजयश्रीलालितं पुत्रं विदुला यथोचितं स्वागतीकृतवती ।

एतस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि क्रियापदानि अत्र संगृह्णीत –

| | | | | |
|---|---|---|---|---|
| ............... | ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... | ............... |

एतानि सर्वाणि लङ्लकारस्य विधिलिङ्लकारस्य च रूपाणि ।

आत्मनेपदिनां धातूनां लङ्लकारे रूपाणि एवं भवन्ति –

| *'वृध्' धातुः* | | | *'लभ्' धातुः* | | |
|---|---|---|---|---|---|
| अवर्धत | अवर्धेताम् | अवर्धन्त | अलभत | अलभेताम् | अलभन्त |
| अवर्धथाः | अवर्धेथाम् | अवर्धध्वम् | अलभथाः | अलभेथाम् | अलभध्वम् |
| अवर्धे | अवर्धावहि | अवर्धामहि | अलभे | अलभावहि | अलभामहि |

www.thearyasamaj.org

विधिलिङ्लकारे रूपाणि एवं भवन्ति –

| | | | | | |
|---|---|---|---|---|---|
| वर्धेत | वर्धेयाताम् | वर्धेरन् | लभेत | लभेयाताम् | लभेरन् |
| वर्धेथाः | वर्धेयाथाम् | वर्धेध्वम् | लभेथाः | लभेयाथाम् | लभेध्वम् |
| वर्धेय | वर्धेवहि | वर्धेमहि | लभेय | लभेवहि | लभेमहि |

एतानि रूपाणि सावधानतया उच्चैः पठत –

| लट्लकारः | लङ्लकारः | विधिलिङ्लकारः |
|---|---|---|
| वर्तते | अवर्तत | वर्तेत |
| लभते | अलभत | लभेत |
| जायते | अजायत | जायेत |
| शोभते | अशोभत | शोभेत |
| कम्पते | अकम्पत | कम्पेत |
| विद्यते | अविद्यत | विद्येत |
| प्रार्थयते | प्रार्थयत | प्रार्थयेत |
| उत्पद्यते | उदपद्यत | उत्पद्येत |
| रमते | अरमत | रमेत |
| विजयते | व्यजयत | विजयेत |

**अभ्यासः**

1. सूचनानुसारम् अधः दत्तानां धातूनां रूपाणि लिखत, पठत च –

i

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अशोभत | ........... | ........... |
| मध्यमपुरुषः | ........... | ........... | ........... |
| उत्तमपुरुषः | ........... | ........... | ........... |

शोभते लङ्

ii

सेवते विधिलिङ्

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | सेवेत | ........... | ........... |
| मध्यमपुरुषः | ........... | ........... | ........... |
| उत्तमपुरुषः | ........... | ........... | ........... |

www.thearyasamaj.org

iii

| | | | | |
|---|---|---|---|---|
| प्रथमपुरुषः | ........... | ........... | ........... | लभते विधिलिङ् |
| मध्यमपुरुषः | ........... | ........... | ........... | |
| उत्तमपुरुषः | ........... | ........... | ........... | |

iv

| | | | | |
|---|---|---|---|---|
| रमते लङ् | प्रथमपुरुषः | ........... | ........... | ........... |
| | मध्यमपुरुषः | ........... | ........... | ........... |
| | उत्तमपुरुषः | ........... | ........... | ........... |

v

| | | | | |
|---|---|---|---|---|
| प्रथमपुरुषः | ........... | ........... | ........... | मोदते लङ् |
| मध्यमपुरुषः | ........... | ........... | ........... | |
| उत्तमपुरुषः | ........... | ........... | ........... | |

vi

| | | | | |
|---|---|---|---|---|
| जायते विधिलिङ् | प्रथमपुरुषः | ........... | ........... | ........... |
| | मध्यमपुरुषः | ........... | ........... | ........... |
| | उत्तमपुरुषः | ........... | ........... | ........... |

2. एतेषु वाक्येषु प्रयुक्तानां लट्लकाररूपाणां स्थाने लङ्लकाररूपाणि उपयुज्य वाक्यानि पुनः लिखत – यथा –

छात्राः संस्कृतेन भाषन्ते । **छात्राः संस्कृतेन अभाषन्त ।**

1. त्वं लज्जसे । ........................................ ।
2. वयं ज्ञानं लभामहे । ........................................ ।
3. बालौ नद्यां प्लवेते । ........................................ ।
4. पक्षिणः वेगेन डयन्ते । ........................................ ।

www.thearyasamaj.org

5. यूयं गुरुं वन्दध्वे । ........................................ ।
6. एषा किमर्थं खिद्यते ? ........................................ ?
7. आवां क्षमावहे । ........................................ ।
8. वायुना वृक्षाः कम्पन्ते । ........................................ ।
9. अहं देवं प्रार्थये । ........................................ ।
10. युवकौ मोदेन कूर्दते । ........................................ ।
11. युवां देशं सेवेथे । ........................................ ।
12. वयं संस्कृतकार्याय यतामहे । ........................................ ।

3. अधः दत्तानि वाक्यानि परिशीलयत, तेषाम् इतरवचनयुक्तानि वाक्यानि रचयत –

| | | |
|---|---|---|
| यथा – सः अभाषत । | **तौ अभाषेताम् ।** | **ते अभाषन्त ।** |
| 1. वयम् अवन्दामहि । | ........................। | ..............................। |
| 2. युवकौ अकम्पेताम् । | ........................। | ..............................। |
| 3. त्वम् असहथाः । | ........................। | ..............................। |
| 4. बालिकाः अवर्धन्त । | ........................। | ..............................। |
| 5. युवाम् अशोभेथाम् । | ........................। | ..............................। |
| 6. अहम् ऐक्षे । | ........................। | ..............................। |
| 7. यूयम् असेवध्वम् । | ........................। | ..............................। |
| 8. भवान् अलभत । | ........................। | ..............................। |
| 9. आवाम् अमन्यावहि । | ........................। | ..............................। |
| 10. भवत्यः अरमन्त । | ........................। | ..............................। |

4. अधः दत्तानि वाक्यानि विधिलिङ्वाक्यत्वेन परिवर्तयत –

यथा – धीरः कदापि न पलायते । **धीरः कदापि न पलायेत ।**

1. वृक्षाः शीघ्रं वर्धन्ते । ........................................।
2. त्वं परीक्षायां विजयसे । ........................................।

www.thearyasamaj.org

3. वयं संस्कृतेन एव भाषामहे। ..........................................।
4. भवन्तौ अवधानेन वीक्षेते। ..........................................।
5. छात्राः धार्मिकशिक्षां लभन्ते। ..........................................।
6. यूयं कदापि न स्पर्धध्वे। ..........................................।
7. युद्धे सैनिकाः विजयन्ते। ..........................................।
8. युवाम् उत्तमकार्ये रमेथे। ..........................................।
9. वयं स्वराष्ट्राय यतामहे। ..........................................।
10. तत् पुस्तकं स्वस्थाने वर्तते। ..........................................।

5. धर्मेन्द्रः सैन्ये अधिकारी अस्ति। अवकाशदिनेषु सः ग्रामम् आगतवान् आसीत्। आगमनात्पूर्वं सः तत्र किं किं करणीयम् इति एवं योजनां कृतवान् आसीत् –

1. आदौ ग्रामं गमिष्यामि। (✔)
2. गृहं प्राप्स्यामि। (✔)
3. मातापितरौ वन्दिष्ये। (✔)
4. मित्रैः मेलिष्यामि। (X)
5. बान्धवान् वीक्षिष्ये। (✔)
6. नूतनं वाहनं क्रेष्यामि। (X)
7. सेवाकेन्द्रं गत्वा रुग्णान् सेविष्ये। (X)
8. संस्कृतं पठिष्यामि। (✔)
9. संस्कृतेन भाषिष्ये। (✔)
10. तीर्थाटनं करिष्ये। (X)
11. दिनद्वयात् पूर्वमेव कार्यस्थानं प्रति प्रस्थास्ये। (✔)

परन्तु सः तेषु कानिचित् कार्याणि कर्तुं शक्तः, कानिचित् न शक्तः। चिह्नं दृष्ट्वा सः कानि कर्तुं शक्तः, कानि न शक्तः इति लङ्लकाररूपाणि उपयुज्य उदाहरणानुसारं लिखत –

उदा – 1. **धर्मेन्द्रः आदौ ग्रामम् अगच्छत्।**

2. ..........................................।

3. ..........................................।

www.thearyasamaj.org

4. ..............................................।

5. ..............................................।

6. ..............................................।

7. ..............................................।

8. ..............................................।

9. ..............................................।

10. ..............................................।

11. ..............................................।

➪ एते सुभाषिते पठत –

1. गते शोकं न कुर्वीत भविष्यं नैव चिन्तयेत् ।
वर्तमानेषु कालेषु वर्तयन्ति विचक्षणाः ॥

बुद्धिमता पुरुषेण गतः विषयः न चिन्तनीयः । भविष्यतः विषयेऽपि न चिन्तनीयम् । तेन वर्तमानकालविषये एव चिन्तनीयं, व्यवहर्तव्यं च ।

2. श्वः कार्यमद्य कुर्वीत पूर्वाह्ने चापराह्निकम् ।
न हि प्रतीक्षते मृत्युः कृतमद्य न वा कृतम् ॥

श्वः करणीयं कार्यं बुद्धिमान् अद्यैव कुर्यात् । अपराह्णे करणीयं कार्यं पूर्वाह्णे एव कुर्यात् । यतः मृत्युः अनेन एतत् कार्यं कृतमस्ति न वा इति न प्रतीक्षते ।

सूक्तिः – न निश्चितार्थात् विरमन्ति धीराः ।

**अमरकोषः**

राजा राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ।

राजा, राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः महीक्षित् – इति राज्ञः षड् नामानि ।

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।
मृधमास्कन्दनं सङ्ख्यं समीकं साम्परायिकम् ॥

युद्धम्, आयोधनं, जन्यं, प्रधनं, प्रविदारणं, मृधम्, आस्कन्दनं, सङ्ख्यं, समीकं, साम्परायिकम् – इत्येतानि १० युद्धस्य नामानि ।

www.thearyasamaj.org

# ११ यदि अध्ययनम् अकरिष्यं तर्हि ...

लृङ्लकारः

एतत् सम्भाषणम् उच्चैः पठत -



गोपालः - भगिनि ! चायं शीतलम् अस्ति ।

अञ्जना - भवान् विलम्बं कृतवान् । भवान् यदि स्नानं शीघ्रम् **अकरिष्यत्** तर्हि चायं शीतलं न **अभविष्यत्** ।

गोपालः - किन्तु अहं फेनकमेव विलम्बेन प्राप्तवान् । भवती फेनकं योग्ये स्थले **अस्थापयिष्यत्** चेत् मम विलम्बः न **अभविष्यत्** ।

अञ्जना - अस्तु । अहं पुनः उष्णं करोमि । प्रतीक्षां करोतु । चायं पीत्वा अध्ययनं करोतु ।

गोपालः - अवश्यं खलु । गतवर्षे अहं यदि सम्यक् अध्ययनम् **अकरिष्यं** तर्हि उत्तीर्णः **अभविष्यम्** ।

अञ्जना - भवान् परीक्षाकाले एव रुग्णः अभवत् । भवान् यदि स्वस्थः **अभविष्यत्** तर्हि लेखितुं कष्टं न **अभविष्यत्** ।

गोपालः - अस्मिन् वर्षे भवती अपि साहाय्यं करोतु ।

अञ्जना - अवश्यं करिष्यामि । किन्तु भवान् अपि उत्साही भवतु । अर्जुनं स्मरतु ।

गोपालः - कथम् ?

अञ्जना - अर्जुनः निरुत्साहतया यदि युद्धं न **अकरिष्यत्** तर्हि कर्तव्यलोपः **अभविष्यत्** ।

गोपालः - ज्ञातम् । हनुमान् अपि तादृशः एव उत्साही खलु ? सः यदि सागरं न **अतरिष्यत्** तर्हि सीतां कथम् **अद्रक्ष्यत्** ?

अञ्जना - एवमेव अस्ति । भवतः उष्णं चायं सिद्धम् । स्वीकरोतु । अहं पाकं करोमि ।


www.thearyasamaj.org

➯ पठत अवगच्छत च –

1. ललितः यदि अध्ययनम् **अकरिष्यत्** तर्हि सः उत्तीर्णः **अभविष्यत्**।
2. अर्जुनः यदि रणाङ्गणात् पलायनम् **अकरिष्यत्** तर्हि जनाः तम् **अनिन्दिष्यन्**।
3. भवन्तः यदि पर्याप्तम् **अखादिष्यन्** तर्हि शरीरं दुर्बलं न **अभविष्यत्**।
4. भवत्यः यदि समये स्थानकम् **अगमिष्यन्** तर्हि लोकयानेन गन्तुम् **अशक्ष्यन्**।
5. घनश्यामः यदि तरणकौशलम् **अज्ञास्यत्** तर्हि वाप्याम् **अस्नास्यत्**।
6. तरणकासारे जलम् उष्णम् **अभविष्यत्** चेत् पर्यटकाः अकोपिष्यन्।
7. त्वं सावधानम् **अचलिष्यः** चेत् न **अपतिष्यः**।
8. यूयं देवकीं मन्दिरम् **अनेष्यत** चेत् सा **अनन्दिष्यत्**।
9. वृष्टिः **अभविष्यत्** चेत् बालकाः **अमोदिष्यन्त**।

अत्र स्थूलाक्षरैः मुद्रितानि लृङ्लकारस्य रूपाणि सन्ति।

➯ सावधानं पश्यत, जानीत च –




➯ परस्मैपदिधातूनां लृङ्लकारे रूपाणि एवं भवन्ति –

| | | | |
|---|---|---|---|
| 'भू'धातुः | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| | अभविष्यः | अभविष्यतम् | अभविष्यत |
| | अभविष्यम् | अभविष्याव | अभविष्याम |

➯ आत्मनेपदिधातूनां लृङ्लकारे रूपाणि एवं भवन्ति –

| | | | |
|---|---|---|---|
| 'वन्द्'धातुः | अवन्दिष्यत | अवन्दिष्येताम् | अवन्दिष्यन्त |
| | अवन्दिष्यथाः | अवन्दिष्येथाम् | अवन्दिष्यध्वम् |
| | अवन्दिष्ये | अवन्दिष्यावहि | अवन्दिष्यामहि |

www.thearyasamaj.org

➪ अवधानपूर्वकं पठत –

1. विजयः यदि मार्गनियमं **पर्यपालयिष्यत्** तर्हि दुर्घटना न अभविष्यत् ।
2. हनुमान् सञ्जीविनीं न **आनेष्यत्** चेत् रामलक्ष्मणौ संज्ञां न **प्राप्स्यताम्** ।
3. मिहिरः वैद्यस्य सूचनाम् **अवागमिष्यत्** चेत् शीघ्रं स्वस्थः अभविष्यत् ।
4. अहं तत्र **उपावेक्ष्यं** चेत् युतकं मलिनम् अभविष्यत् ।
5. भीमः यदि दुर्योधनं वक्षसि एव **प्राहरिष्यत्** तर्हि **पराजेष्यत** ।
6. आवां समये **आगमिष्याव** चेत् मोदकम् अपि **प्राप्स्याव** ।
7. यात्रिकाः यदि पराक्रमं **प्रादर्शयिष्यन्** तर्हि शत्रवः विमानं न **अपाहरिष्यन्** ।
8. सरोवरः **अशोक्ष्यत्** चेत् मृगाः **न्यवर्तिष्यन्त** ।

एतेषु वाक्येषु उपसर्गसहितानां धातूनां लृङ्लकाररूपाणि स्थूलाक्षरैः मुद्रितानि सन्ति ।

➪ पठत, जानीत च –

| उपसर्गसहितक्रियाः | लङ्रूपाणि | | लृङ्रूपाणि |
|---|---|---|---|
| अपगच्छति | अप +अगच्छत् | अपागच्छत् | अपागमिष्यत् |
| परिहरति | परि + अहरत् | पर्यहरत् | पर्यहरिष्यत् |
| आनयति | आ + अनयत् | आनयत् | आनेष्यत् |
| आगच्छति | आ +अगच्छत् | आगच्छत् | आगमिष्यत् |
| प्रतिवदति | प्रति + अवदत् | प्रत्यवदत् | प्रत्यवदिष्यत् |
| अनुकरोति | अनु + अकरोत् | अन्वकरोत् | अन्वकरिष्यत् |
| प्रविशति | प्र + अविशत् | प्राविशत् | प्रावेक्ष्यत् |
| उत्तिष्ठति | उत् + अतिष्ठत् | उदतिष्ठत् | उदस्थास्यत् |
| विहरति | वि +अहरत् | व्यहरत् | व्यहरिष्यत् |
| प्रार्थयते | प्र +आर्थयत | प्रार्थयत | प्रार्थयिष्यत |
| निर्गच्छति | निर् +अगच्छत् | निरगच्छत् | निरगमिष्यत् |
| उपदिशति | उप +अदिशत् | उपादिशत् | उपादेक्ष्यत् |
| विराजते | वि + अराजत | व्यराजत | व्यराजिष्यत |
| व्यवहरति | वि +अव +अहरत् | व्यवाहरत् | व्यवाहरिष्यत् |

www.thearyasamaj.org

विशेषः –

| | | |
|---|---|---|
| स्वीकरोति | – स्वी +अकरिष्यत् | → स्व्यकरिष्यत् |
| अङ्गीकरोति | – अङ्गी +अकरिष्यत् | → अङ्ग्यकरिष्यत् |

## अभ्यासः

1. उदाहरणानुगुणं लृङ्प्रयोगेण वाक्यानि लिखत –

उदा – मुनिः शापं ददाति । दुष्यन्तः शकुन्तलां विस्मरति ।

**मुनिः यदि शापं न अदास्यत् तर्हि दुष्यन्तः शकुन्तलां न व्यस्मरिष्यत् ।**

1. भूपेशः पूर्वाभ्यासं कृतवान् । सः पर्वतम् आरोहत् ।

.................................................................... ।

2. रामः वने व्यचरत् । सः बहून् राक्षसान् समहरत् ।

.................................................................... ।

3. अहं छत्रं न स्वीकृतवान् । आर्द्रः अभवम् ।

.................................................................... ।

4. भवत्यौ पाठं न विस्मृतवत्यौ । शिक्षकः न तर्जितवान् ।

.................................................................... ।

5. यूयं निरीक्षकं पर्यपृच्छत । निरीक्षकः अकुप्यत् ।

.................................................................... ।

6. युवां न उदतिष्ठतम् । चोराः धनम् अपाहरन् ।

.................................................................... ।

7. बालिकाः गीतं न अन्वगायन् । गीतं कण्ठस्थम् अभवत् ।

.................................................................... ।

2. कोष्ठके लिखितानि पदानि चित्वा वाक्यानि पूरयत –

| | | | |
|---|---|---|---|
| अभविष्यत् | अगमिष्यत् | अन्वकरिष्यन् | अकरिष्यत् |
| प्राप्स्यत् | उदतरिष्यत् | अलप्स्यत | व्यस्मरिष्यत् |

ललितः विद्यालयं न गतवान् । सः प्रतिदिनं विद्यालयम् **अगमिष्यत्** चेत् सम्यक् अध्ययनम् ............. । सम्यक् अध्ययनम् ............. चेत् परीक्षां निःशङ्कम् ............. । परीक्षाम् ............. चेत् उच्चशिक्षणम् ............. । उच्चशिक्षणम् ............. चेत्

www.thearyasamaj.org

विवेकं .............. । विवेकं .............. चेत् निरन्तरं राष्ट्रसेवाम् ..............। निरन्तरं राष्ट्रसेवाम् ..............चेत् लोकस्य हितम् .............. । लोकः चिरकालं तं न .............. । तस्मात् ललितस्य जीवनयात्रा सफला .............. ।

3. वाक्ये प्रयुक्तानां लट्रूपाणां स्थाने लृङ्रूपाणि उपयुज्य वाक्यानि पुनः लिखत –

उदा – विद्युत् भवति, दीपः ज्वलति ।
**यदि विद्युत् अभविष्यत् तर्हि दीपः अज्वलिष्यत् ।**

1. छात्राः भवन्ति, शिक्षकः पाठयति ।
...................................................................... ।
2. कोषे धनम् अस्ति, फलं क्रीणामि ।
...................................................................... ।
3. उत्साहः अस्ति, भवान् लक्ष्यं प्राप्नोति ।
...................................................................... ।
4. विरामः अस्ति, भवती नाटकं पश्यति ।
...................................................................... ।
5. भवतः वचनं सत्यम् अस्ति, अङ्गीकरोमि ।
...................................................................... ।
6. वृक्षाः उन्नताः भवन्ति, पतन्ति ।
...................................................................... ।
7. सः सम्यक् कार्यं करोति, निर्वाचने जयति ।
...................................................................... ।
8. भवान् कम्बलं धरति, शैत्यं न बाधते ।
...................................................................... ।
9. जलं भवति, तडागः शुष्कः न भवति ।
...................................................................... ।
10. अनिलः आलस्यं त्यजति, सुखम् अनुभवति ।
...................................................................... ।

www.thearyasamaj.org

एतनि वाक्यानि सावधानतया परिशीलयत – 

## सकर्मकाः अकर्मकाः च धातवः

सकर्मकाः

| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|
| लेखकः | ग्रन्थं | पठति। (पठ) |
| सैनिकः | देशं | रक्षति। (रक्ष) |
| अतिथिः | भोजनं | करोति। (कृ) |
| भक्तः | देवम् | अर्चति। (अर्च) |
| भवती | दूरदर्शनं | पश्यति। (दृश्) |
| सः | सर्वं | जानाति। (ज्ञा) |
| धेनुः | तृणं | खादति। (खाद्) |
| बालः | विषयं | स्मरति। (स्मृ) |

अकर्मकाः

| कर्तृपदम् | क्रियापदम् |
|---|---|
| शिक्षकः | अस्ति। (अस) |
| बाला | हसति। (हस्) |
| मयूरः | नृत्यति। (नृत्) |
| शिशुः | क्रीडति। (क्रीड्) |
| हरिणः | धावति। (धाव्) |
| भीरुः | रोदिति। (रुद्) |
| शुकः | डयते। (डी) |
| सस्यं | वर्धते। (वृध्) |

### अवधेयम्

- उपरितनवाक्येषु प्रयुक्ताः पठ, रक्ष, कृ – इत्यादयः धातवः **सकर्माकाः**, यतः एतेषां कर्म सम्भवति।
- अपरस्मिन् भागे विद्यमानेषु वाक्येषु प्रयुक्ताः अस, हस्, नृत् –इत्यादयः धातवः **अकर्मकाः**, यतः एतेषां धातूनां कर्म न सम्भवति।
- केषां धातूनां कर्म सम्भवति केषां च कर्म न सम्भवति इत्यस्य ज्ञानाय कश्चन क्रमः अनुसर्तव्यः भवति।

i. प्रथमतया क्रियापदम् उच्चारणीयम्। यथा – पठति।

ii. तदनन्तरं कर्तृसहितं क्रियापदम् उच्चारणीयम्। यथा – लेखकः पठति।

iii. कर्तृक्रिययोः मध्ये द्वितीयाविभक्तिसम्बद्धः कं / कां / किम् इति प्रश्नः करणीयः।

यथा – लेखकः कं /कां / किं पठति ?

लेखकः ग्रन्थं / पत्रिकां / रामायणं पठति।

अत्र उत्तरं प्राप्यते, अतः 'पठ' धातुः सकर्मकः।

iv. प्रश्नकरणानन्तरं यदि उत्तरं प्राप्यते तर्हि धातुः सकर्मकः इति निश्चेतुं शक्यते।

v. पूर्वतनक्रमेणैव प्रश्नकरणानन्तरं यदि उत्तरं न प्राप्यते तर्हि धातुः अकर्मकः इति निश्चेतुं शक्यम्।

यथा – क) अस्ति। ख)शिक्षकः अस्ति। ग) शिक्षकः कं /कां /किम् अस्ति ?

शिक्षकः ....... अस्ति। अत्र उत्तरं न प्राप्यते, अतः 'अस' धातुः अकर्मकः।

www.thearyasamaj.org

## अभ्यासः

4. यथानिर्देशं धातुः सकर्मकः उत अकर्मकः इति लिखत –

| क्रियापदम् | कर्तृसहितक्रियापदम् | कर्तृसहितक्रियामुद्दिश्य प्रश्नः | उत्तरमस्ति उत न | सकर्मकः/अकर्मकः |
|---|---|---|---|---|
| इच्छति | बालः इच्छति | बालः कं/कां/ किम् इच्छति | अस्ति | सकर्मकः |
| वर्धते | बालः वर्धते | बालः कं/कां/ किम् वर्धते | नास्ति | अकर्मकः |
| वन्दते | ............... | ............................ | ........ | .............. |
| उपविशति | ............... | ............................ | ........ | .............. |
| लभते | ............... | ............................ | ........ | .............. |
| शृणोति | ............... | ............................ | ........ | .............. |
| सहते | ............... | ............................ | ........ | .............. |
| क्रीणाति | ............... | ............................ | ........ | .............. |
| पतति | ............... | ............................ | ........ | .............. |
| कम्पते | ............... | ............................ | ........ | .............. |
| श्लाघते | ............... | ............................ | ........ | .............. |

5. उदाहरणानुगुणं वाक्यं सकर्मकवाक्यम्, उत अकर्मकवाक्यम् इति आवरणे लिखत –

उदा – सः वदति। **(सकर्मकवाक्यम्)** बालकः पतति। **(अकर्मकवाक्यम्)**

1. बालः क्षिपति। ( .............. ) 2. दीपः ज्वलति। ( .............. )
3. आरक्षकः गृह्णाति। ( .............. ) 4. सज्जनः त्यजति। ( .............. )
5. मार्जारः गच्छति। ( .............. ) 6. नदी प्रवहति। ( .............. )
7. सः शक्नोति। ( .............. ) 8. कर्मकरः क्षालयति।( .............. )
9. आनन्दः भवति। ( .............. ) 10. मशकः दशति। ( .............. )
11. अहं मन्ये। ( .............. ) 12. चोरः पलायते। (..............)
13. सा वसति। ( .............. ) 14. भवान् पिबति। ( .............. )
15. मूर्खः निन्दति ( .............. ) 16. यानं तिष्ठति। ( .............. )
17. भवती खिद्यते। ( .............. ) 18. पक्षी चिनोति। ( .............. )
19. मेघः वर्षति। ( .............. ) 20. चित्रं शोभते। ( .............. )

www.thearyasamaj.org

द्विकर्मकाः धातवः

एतानि वाक्यानि सावधानतया परिशीलयत –

1. भिक्षुकः **धनिकं धनं** याचति। (याच्)
2. अध्यापकः **छात्रं प्रश्नं** पृच्छति। (प्रच्छ)
3. पितामहः **पौत्रं कथां** वदति। (वद)
4. सेवकः **आसन्दं प्रकोष्ठं** नयति। (नी)
5. कर्मकरः **पेटिकाम् आपणं** वहति। (वह)

## अवधेयम्

- याच्, प्रच्छ, वद– इत्येतादृशाः उपरितनवाक्येषु प्रयुक्ताः धातवः **द्विकर्मकाः**, यतः एतेषां कर्मद्वयं सम्भवति।
- द्विकर्मकप्रयोगे एकं कर्म प्रधानम्, अपरं च गौणं भवति।

गौणं कर्म – यस्य कर्मणः **अन्यविभक्तिप्राप्तिसम्भावना अस्ति** तत् गौणं कर्म इति ज्ञातुं शक्यते।
यथा –भिक्षुकः धनिकं धनं याचति – इत्यत्र धनिककर्मणः धनिकात् इति पञ्चमीविभक्तिः अपि भवितुम् अर्हति। अतः अत्र धनिकः गौणं कर्म भवति।

प्रधानं कर्म – यस्य कर्मणः **सर्वदा कर्मत्वम् एव भवति** यत्र च **अन्यविभक्तेः प्रयोगस्य सम्भावना नास्ति** तत् प्रधानं कर्म।
यथा – 'भिक्षुकः धनिकं धनं याचति' इत्यस्मिन् वाक्ये धनम् इत्यस्य सर्वदा 'कर्मत्वम्' एव भवति।अतः तत्र द्वितीयाविभक्तिः एव भवति।

- द्विकर्मकाः धातवः षोडश सन्ति। तेषां लट्लकारे प्रथमपुरुषैकवचनरूपाणि एवं भवन्ति –

| | | |
|---|---|---|
| 1.दोग्धि (दुह) | 2. याचति (याच्) | 3. पचति (पच्) |
| 4. दण्डयति (दण्ड) | 5. रुणद्धि (रुध्) | 6. पृच्छति (प्रच्छ) |
| 7. चिनोति (चि) | 8. ब्रवीति (ब्रू) | 9. शास्ति (शास्) |
| 10 . जयति (जि) | 11. मथ्नाति(मन्थ) | 12. मुष्णाति (मुष) |
| 13. नयति (नी) | 14. हरति (हृ) | 15. कर्षति (कृष) |
| 16. वहति (वह) | | |

- एवं धातवः सकर्मकाः, अकर्मकाः द्विकर्मकाः च इति त्रिधा भवन्ति।

सूक्तिः – बहुविघ्नास्तु सदा कल्याणसिद्धयः।


www.thearyasamaj.org

# २० संस्कृतिः संस्कृताश्रिता

एतत् सम्भाषणम् उच्चैः पठत –

कर्मणिप्रयोगः
(वर्तमानकाले)

(कश्चन प्रधानाचार्यः । संस्कृतकार्यक्रमेषु महती आसक्तिः तस्य । सः विद्यालये अध्यापकानाम् एकां गोष्ठीम् आहूय कार्यक्रमाणां सन्दर्भे चर्चां करोति ।)




प्रधानाचार्यः – संस्कृतसप्ताहस्य आचरणसन्दर्भे अस्माभिः प्रतिवर्षं बहवः कार्यक्रमाः **क्रियन्ते** । अस्मिन् वर्षे अपि कार्यक्रमाः **क्रियन्ते** खलु ?

राजेन्द्रः – निश्चयेन श्रीमन् ! अस्मिन् वर्षे प्रथमदिनस्य कार्यक्रमाय पञ्चमवर्गस्य छात्राः सज्जीकृताः । विद्यालयस्य पुरतः मार्गे स्थित्वा तैः सर्वेषां ललाटे तिलकं **धार्यते**, संस्कृतसप्ताहस्य शुभाशयाः **उच्यन्ते** ।

प्रधानाचार्यः – समीचीनम् एतत् । अभयवर्य ! भवता किं **चिन्त्यते** ?

www.thearyasamaj.org

अभयः – द्वितीये दिने मया गीतस्पर्धा **आयोज्यते**।

प्रधानाचार्यः – तस्मिन् कार्यक्रमे कैः कैः भागः **गृह्यते** ?

अभयः – षष्ठवर्गस्य छात्रैः समूहगीतं **प्रस्तूयते**।

श्वेता – सप्तमवर्गस्य छात्रैः देशभक्तिगीतं **गीयते**।

प्रधानाचार्यः – तृतीये दिने संस्कृतभारत्याः विज्ञानप्रदर्शिनी **आयोज्यते** खलु ?

अभयः – आं श्रीमन् !

गौरवः – चतुर्थे दिने तु श्रावणपूर्णिमा। अतः सर्वैः परस्परं रक्षासूत्रं **बध्यते**। पञ्चमे दिने अष्टमवर्गस्य छात्रैः तत्र तत्र वीथीनाटकं **प्रदर्श्यते**।

पङ्कजा – षष्ठे दिने सर्वैः छात्रैः शोभायात्रा **क्रियते**। तदर्थं केन वस्तूनि **सङ्गृह्यन्ते** ? केन फलकानि **लिख्यन्ते** ? केन कुत्र नेतृत्वं **विधीयते** इत्येवं सर्वं निश्चेतव्यम्।

प्रधानाचार्यः – साधु ! साधु ! यदि सर्वैः मिलित्वा **निश्चीयते** तर्हि ..........

सर्वे – आम्, अस्माभिः तथैव **क्रियते**।

प्रधानाचार्यः – समग्रकार्यक्रमः केन **निरुह्यते** ?

राजेन्द्रः – मया।

अभयः – मया मञ्चः **अलङ्क्रियते**।

गौरवः – मया सर्वाणि अपेक्षितानि वस्तूनि **आनीयन्ते**।

पङ्कजा, श्वेता – आवाभ्यां कार्यक्रमार्थं छात्राः **सज्जीक्रियन्ते**।

पङ्कजा – गीतानां रागसंयोजनाय नृत्यनिर्देशनाय च सङ्गीतशिक्षिकया साहाय्यं **क्रियते** किम् ?

प्रधानाचार्यः – निश्चयेन **क्रियते**। संस्कृतकार्यक्रमाय तस्याम् अपि महान् उत्साहः **दृश्यते** एव। तदर्थं मया सा **सूच्यते**। अस्माभिः सर्वैः **ज्ञायते** एव यत् संस्कृतसप्ताहस्य अन्तिमे दिने अस्माकं विद्यालयस्य वार्षिकोत्सवः अपि। तस्मात् सवैभवं कार्यक्रमः **आचर्यते**। अद्यत्वे संस्कृतेन कृताः कार्यक्रमाः जनैः **श्लाघ्यन्ते**। प्रमुखेभ्यः अभिभावकेभ्यः सर्वेभ्यः संस्कृतानुरागिभ्यः च मया आमन्त्रणं **प्रेष्यते**। केचन प्रतिष्ठिताः अपि विशेषेण **आहूयन्ते**। तेषां पुरतः चिताः सांस्कृतिककार्यक्रमाः **प्रस्तूयन्ते**। अन्ते च पुरस्काराः **प्रदीयन्ते**। प्रतीकचिह्नानि प्रमाणपत्राणिच **वितीर्यन्ते**। वयं सर्वे सम्भूय संस्कृतसप्ताहम् आचराम। कार्यक्रमं यशस्विनं च कुर्याम।

www.thearyasamaj.org

➪ एतानि वाक्यानि सावधानतया उच्चैः पठत –

छात्रेण **श्लोकः पठ्यते** ।
बालेन **चाकलेहः खाद्यते** ।
मया **फलरसः पीयते** ।
तेन **भिक्षा त्यज्यते** ।
अस्माभिः **देवः अर्च्यते** ।
नेत्रा **देशः रक्ष्यते** ।
युष्माभिः **सत्कार्यं क्रियते** ।
भवद्भिः **चोरः ताड्यते** ।
कविना **गीतं रच्यते** ।
भवत्या **कार्यक्रमः अवलोक्यते** ।

अध्यापकेन **ग्रन्थः लिख्यते** ।
सुधया **फलानि इष्यन्ते** ।
मित्रेण **लेखन्यः नीयन्ते** ।
दुर्जनैः **सज्जनाः निन्द्यन्ते** ।
त्वया **कथाः उच्यन्ते** ।
रजकैः **वस्त्राणि क्षाल्यन्ते** ।
भवता **पत्रिकाः स्थाप्यन्ते** ।
बालेन **विषयाः ज्ञायन्ते** ।
सर्वैः **नियमाः पाल्यन्ते** ।
भवतीभिः **स्पर्धाः आयोज्यन्ते** ।

➪ पूर्वम् अस्माभिः पठितानि वाक्यानि एतादृशानि –

**बालः** पाठं **पठति** ।
**अहं** कार्यं **करोमि** ।
**त्वं** मन्त्रान् **स्मरसि** ।

**छात्रः** विषयं **जानाति** ।
**वयं** देवं **नमामः** ।
**यूयं** विद्यालयं **गच्छथ** ।

➪ एतानि वाक्यानि परिशीलयत –

| कर्तरिप्रयोगः | कर्मणिप्रयोगः |
|---|---|
| **बालः** पाषाणं **क्षिपति** । | बालेन **पाषाणः क्षिप्यते** । |
| **सेवकः** धनम् **इच्छति** । | सेवकेन **धनम् इष्यते** । |
| **सा** शाटिकां **क्षालयति** । | तया **शाटिका क्षाल्यते** । |
| **अहं** लेखनीं **नयामि** । | मया **लेखनी नीयते** । |
| **बालिकाः** प्रश्नं **लिखन्ति** । | बालिकाभिः **प्रश्नः लिख्यते** । |
| **भवान्** घटीः **पश्यति** । | भवता **घट्यः दृश्यन्ते** । |
| **त्वम्** आसन्दान् **मार्जयसि** । | त्वया **आसन्दाः मार्ज्यन्ते** । |
| **वयम्** आपणं **गच्छामः** । | अस्माभिः **आपणः गम्यते** । |

www.thearyasamaj.org

## अवधेयम्

कर्तरिप्रयोगसम्बद्धवाक्यानां परिशीलनानन्तरं वयं कर्तरिप्रयोगस्य नियमान् एवं सङ्ग्रहीतुं शक्नुमः -

i. **कर्तरिप्रयोगे कर्तृपदं प्रथमाविभक्त्यन्तं भवति।**

यथा - 'छात्रः श्लोकं पठति' इत्यत्र **छात्रः** इति कर्तृपदं प्रथमाविभक्त्यन्तम् अस्ति।

ii. **कर्तरिप्रयोगे कर्मपदं** (यदि भवति तर्हि) **द्वितीयाविभक्त्यन्तं भवति।**

यथा - 'लेखकः ग्रन्थं लिखति' इत्यत्र **ग्रन्थम्** इति द्वितीयाविभक्त्यन्तम् अस्ति।

iii. **कर्तरिप्रयोगे कर्तुः क्रियापदस्य च वचनसम्बन्धः पुरुषसम्बन्धः च भवति।** (कर्तृपदम् एकवचनान्तं चेत् क्रियापदम् अपि एकवचनान्तं भवति। कर्तृपदं द्विवचनान्तं बहुवचनान्तं वा चेत् क्रियापदम् अपि द्विवचनान्तं बहुवचनान्तं वा भवति। कर्तारम् अनुसृत्य प्रथमपुरुषस्य मध्यमपुरुषस्य उत्तमपुरुषस्य वा क्रियापदस्य प्रयोगः भवति।)

यथा -

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| क) **छात्रः** | श्लोकं | **पठति**। | (वचनसम्बन्धः) | ख) **सः** | कार्यं | **करोति**। | (पुरुषसम्बन्धः) |
| **छात्रौ** | श्लोकं | **पठतः**। | (वचनसम्बन्धः) | **त्वं** | कार्यं | **करोषि**। | (पुरुषसम्बन्धः) |
| **छात्राः** | श्लोकं | **पठन्ति**। | (वचनसम्बन्धः) | **अहं** | कार्यं | **करोमि**। | (पुरुषसम्बन्धः) |

एते अंशाः अस्माभिः पूर्वमपि परिशीलिताः स्युः एव।

एवमेव कर्मणिप्रयोगसम्बद्धवाक्यानि परिशील्य वयं कर्मणिप्रयोगस्य नियमान् एवं सङ्ग्रहीतुं शक्नुमः -

i. **कर्मणिप्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति।**

ii. **कर्मणिप्रयोगे कर्मपदं प्रथमाविभक्त्यन्तं भवति।**

iii. **कर्मणिप्रयोगे कर्मणः क्रियापदस्य च वचनसम्बन्धः पुरुषसम्बन्धः च भवति।** (कर्मपदम् एकवचनान्तं चेत् क्रियापदम् अपि एकवचनान्तं भवति। कर्मपदं द्विवचनान्तं बहुवचनान्तं वा चेत् क्रियापदम् अपि द्विवचनान्तं बहुवचनान्तं वा भवति। कर्म अनुसृत्य प्रथमपुरुषस्य मध्यमपुरुषस्य उत्तमपुरुषस्य वा क्रियापदस्य प्रयोगः भवति।)

| | | | | |
|---|---|---|---|---|
| यथा - क) | बालकेन | **चाकलेहः** | **खाद्यते**। | (वचनसम्बन्धः) |
| | बालकेन | **चाकलेहौ** | **खाद्येते**। | (वचनसम्बन्धः) |
| | बालकेन | **चाकलेहाः** | **खाद्यन्ते**। | (वचनसम्बन्धः) |

www.thearyasamaj.org

| | | | | |
|---|---|---|---|---|
| ख) | बालकेन | **सः** | **ताड्यते।** | (पुरुषसम्बन्धः) |
| | बालकेन | **त्वं** | **ताड्यसे।** | (पुरुषसम्बन्धः) |
| | बालकेन | **अहं** | **ताड्ये।** | (पुरुषसम्बन्धः) |

**अवधेयम्**

**वचनसम्बन्धः पुरुषसम्बन्धः च**

**कर्तरिप्रयोगः**

बालकः (प्र.वि.) — श्लोकं (द्वि.वि.) — पठति

**कर्तृपदम्** — **कर्मपदम्** — **क्रियापदम्**

**कर्मणिप्रयोगः**

बालकेन (तृ.वि.) — श्लोकः (प्र.वि.) — पठ्यते ➡ **धातुः +य +ते**

**वचनसम्बन्धः पुरुषसम्बन्धः च**

➡ कर्मणिप्रयोगे वाक्यानि एवं भवन्ति –

| | | | |
|---|---|---|---|
| *प्रथमपुरुषः* | बालेन सः दृश्यते। | बालेन तौ दृश्येते। | बालेन ते दृश्यन्ते। |
| *मध्यमपुरुषः* | बालेन त्वं दृश्यसे। | बालेन युवां दृश्येथे। | बालेन यूयं दृश्यध्वे। |
| *उत्तमपुरुषः* | बालेन अहं दृश्ये। | बालेन आवां दृश्यावहे। | बालेन वयं दृश्यामहे। |

**अवधेयम्**

| | कर्तरिप्रयोगे | कर्मणिप्रयोगे |
|---|---|---|
| परस्मैपदी | पठति | पठ् + य + ते |
| आत्मनेपदी | सेवते | सेव् + य +ते |

➡ उपरि दत्तेषु धातुरूपेषु परस्मैपदिनाम् अन्ते 'ति' इति, आत्मनेपदिनाम् अन्ते 'ते' इति च अस्ति।

➡ कर्मणि प्रयोगे तु उभयविधानाम् अपि धातूनाम् अन्ते 'ते' इति आत्मनेपदिरूपमेव भवति।

➡ कर्मणिप्रयोगे धातोः अनन्तरं 'य' इति श्रूयते।

www.thearyasamaj.org

## अभ्यासः

1. अधः क्रियापदैः सह मूलधातवः अपि निर्दिष्टाः सन्ति। तेषां यथानिर्देशं कर्मणि रूपं लिखत–

| | | |
|---|---|---|
| पठति (पठ्) | पठ् + य +ते | पठ्यते |
| जपति (जप्) | .................... | .................... |
| आप्नोति (आप्) | .................... | .................... |
| पश्यति (दृश्) | .................... | .................... |
| जानाति (ज्ञा) | .................... | .................... |
| इच्छति (इष्) | .................... | .................... |
| जिघ्रति (घ्रा) | .................... | .................... |
| सहते (सह्) | .................... | .................... |
| वन्दते (वन्द्) | .................... | .................... |
| सेवते (सेव्) | .................... | .................... |
| वीक्षते (वि+ईक्ष्) | .................... | .................... |
| लभते (लभ्) | .................... | .................... |

2. अधस्तनकर्तरिप्रयोगवाक्यानि कर्मणिप्रयोगवाक्यत्वेन परिवर्त्य लिखत –

| कर्तरिप्रयोगः | कर्मणिप्रयोगः |
|---|---|
| उदा – 1. सः पाठं पठति। (पठ्) | तेन पाठः पठ्यते । |
| 2. छात्रः प्रश्नं पृच्छति।(पृच्छ्) | ................................. । |
| 3. पाचकः तण्डुलं पचति। (पच्) | ................................. । |
| 4. अहं कथां जानामि। (ज्ञा) | ................................. । |
| 5. मित्रं पत्रं प्रेषयति। (प्रेष्) | ................................. । |
| 6. महिला शाटिकां क्रीणाति। (क्री) | ................................. । |
| 7. एषः विषयं शृणोति। (श्रु) | ................................. । |
| 8. भ्राता द्रोणीं क्षालयति। (क्षाल्) | ..........................क्षाल्यते । |

www.thearyasamaj.org

9. स्वामी सेवकं सूचयति। (सूच्) ............................सूच्यते ।
10. भक्तः देवं वन्दते। (वन्द्) ................................ ।
11. धीरः कष्टं सहते। (सह्) ................................ ।
12. विजेता पुरस्कारं लभते। (लभ्) ................................ ।
13. सन्ततिः प्रतिष्ठां विन्दते। (विन्द्) ................................ ।
14. निर्धनः धनं याचते। (याच्) ................................ ।
15. शिष्यः गुरुं सेवते। (सेव्) ................................ ।
16. जनाः इन्द्रजालं वीक्षन्ते।(वि+ईक्ष्) ................................ ।
17. शिशुः आहारम् अपेक्षते। (अप+ईक्ष्) ................................ ।
18. बालः चित्रम् आलोकते। (आ+लोक्) ................................ ।

## अवधेयम्

धातुः व्यञ्जनान्तः चेत् यकारयोजनेन कर्मणिरूपं सिद्ध्यति।

यथा – रक्षति – रक्ष्यते (रक्ष् +य+ते)
खादति – खाद्यते (खाद् +य+ते)

येषां धातूनां कर्तरिप्रयोगे 'य' दृश्यते तेषां धातूनां कर्मणिप्रयोगे एकः एव 'य'कारः दृश्यते।

यथा – क्षालयति – क्षाल्यते
सूचयति – सूच्यते

अधस्तनवाक्यानि सावधानतया पठत –

| कर्तरिप्रयोगः | कर्मणि प्रयोगः |
|---|---|
| सः दुर्गुणं त्यजति। (त्यज्) | तेन दुर्गुणः त्यज्यते। |
| कार्यकर्ता गीतं गायति। (गा) | कार्यकर्त्रा गीतं गीयते। |
| अहम् आम्ररसं पिबामि। (पा) | मया आम्ररसः पीयते। |
| सौचिकः वस्त्रं माति। (मा) | सौचिकेन वस्त्रं मीयते। |
| सर्वे उपहारान् ददति। (दा) | सर्वैः उपहाराः दीयन्ते। |
| नायकः नेतृत्वं विदधाति (वि+धा) | नायकेन नेतृत्वं विधीयते। |

www.thearyasamaj.org

## अवधेयम्

'आ'कारान्तानां धातूनां कर्मणिप्रयोगे 'ई' इति भवति। यथा – दा –दी, पा –पी

3. उदाहरणानुगुणं यथोचितधातुरूपेण रिक्तस्थानानि पूरयत –

उदा –

| | | | |
|---|---|---|---|
| 1. | गायकेन | गीतं (गा) | **गीयते ।** |
| | | गीते | **गीयेते ।** |
| | | गीतानि | **गीयन्ते ।** |
| 2. | कुम्भकारेण | घटः (निर्+मा) | .............. |
| | | घटौ | .............. |
| | | घटाः | .............. |
| 3. | सम्पादकेन | पत्रिका (दा) | .............. |
| | | पत्रिके | .............. |
| | | पत्रिकाः | .............. |
| 4. | तेन | कार्यं (वि+धा) | .............. |
| | | कार्ये | .............. |
| | | कार्याणि | .............. |
| 5. | संन्यासिना | वस्तु (जहाति, हा) | .............. |
| | | वस्तुनी | .............. |
| | | वस्तूनि | .............. |

### विशेषक्रियापदानि

* कर्तरि कर्मणि च प्रथमपुरुषस्य एकवचनरूपम् उच्चैः पठत –

| धातुः | कर्तरि | कर्मणि | धातुः | कर्तरि | कर्मणि |
|---|---|---|---|---|---|
| जि | जयति | जीयते | क्री | क्रीणाति | क्रीयते |
| चि | चिनोति | चीयते | नी | नयति | नीयते |
| अधि+इ | अधीते | अधीयते | कृ | करोति | क्रियते |
| श्रु | शृणोति | श्रूयते | धृ | धरति | ध्रियते |
| स्तु | स्तौति | स्तूयते | वृ | वृणोति | व्रियते |
| ध्यै | ध्यायति | ध्यायते | तॄ | तरति | तीर्यते |

www.thearyasamaj.org

## अवधेयम्

- 'इ'कारान्तानाम् 'उ'कारान्तानां च धातूनां कर्मणि प्रयोगे दीर्घं रूपं भवति ।
  यथा- जि - जीयते स्तु - स्तूयते
- ईकारान्तानाम्, ऊकारान्तानां च धातूनां कर्मणि प्रयोगे दीर्घं रूपं भवति ।
  यथा - नी - नीयते धू - धूयते
- ऋकारान्तस्य धातोः 'रि', 'ॠ'कारन्तस्य 'ईर्' ऐकारान्तस्य 'आ' इति च प्रायः भवति ।
  यथा - कृ - क्रियते तॄ -तीर्यते , ध्यै -ध्यायते ।

## अभ्यासः

1. अधस्तनवाक्यानि कर्मणिवाक्यत्वेन परिवर्तयत -

| कर्तरिप्रयोगः | कर्मणिप्रयोगः |
|---|---|
| 1. रक्षकः शत्रून् जयति । | **रक्षकेण शत्रवः जीयन्ते ।** |
| 2. भक्ता पुष्पाणि चिनोति । | ........................................ । |
| 3. शिक्षिका ग्रन्थम् अधीते । | ........................................ । |
| 4. अधिकारी विचारान् शृणोति । | ........................................ । |
| 5. सा लेखनीं क्रीणाति । | ........................................ । |
| 6. सेवकः स्यूतान् नयति । | ........................................ । |
| 7. सचिवाः कार्यं कुर्वन्ति । | ........................................ । |
| 8. बालिकाः वस्त्रं धरन्ति । | ........................................ । |
| 9. वरः कन्यां वृणोति । | ........................................ । |
| 10. सैनिकः नदीं तरति । | ........................................ । |
| 11. भक्तः देवं ध्यायति । | ........................................ । |
| 12. भाषणकारः विषयं प्रस्तौति । | ........................................ । |
| 13. वयं गीतानि शृणुमः । | ........................................ । |
| 14. यूयं सत्कार्यं कुरुथ । | ........................................ । |
| 15. यतिः भगवन्तं स्तौति । | ........................................ । |

www.thearyasamaj.org

## अवधेयम्

1. यदि धातोः आरम्भे 'वा' दृश्यते तर्हि तस्य 'उ' इति परिवर्तनं भवति।
यथा –

| | | | | |
|---|---|---|---|---|
| (क) | वद् | वदति | उद्यते | व् → उ |
| | वच् | वक्ति | उच्यते | व् → उ |
| | वप् | वपति | उप्यते | व् → उ |
| | वह् | वहति | उह्यते | व् → उ |
| (ख) | (आ) ह्वे | आह्वयति | आहूयते | दीर्घः भवति |

## अभ्यासः

2. यथोचितं कर्मणिप्रयोगेण रिक्तस्थानानि पूरयत –

| शिक्षकेण | वद् | वच् | आ +ह्वे |
|---|---|---|---|
| सः | ....... | उच्यते | ....... |
| तौ | उद्येते | ....... | ....... |
| ते | ....... | ....... | आहूयन्ते |
| त्वम् | ....... | उच्यसे | ....... |
| युवाम् | ....... | ....... | ....... |
| यूयम् | उद्यध्वे | ....... | आहूयध्वे |
| अहं | ....... | उच्ये | ....... |
| आवाम् | उद्यावहे | ....... | ....... |
| वयम् | ....... | ....... | आहूयामहे |

www.thearyasamaj.org

3. कोष्ठकस्थैः उचितैः कर्मपदैः रिक्तस्थानानि पूरयत –

उपायनानि, जलम्, देशः, बीजानि, भारः, सेवकाः, त्वम्, पुष्पम् , अहम्, प्रकृतिः, आभूषणानि, देवः, यूयम्, तृणम्,

1. बालेन ............ घ्रायते ।
2. कर्मकरेण ............ उह्यते ।
3. कृषकेण ............उप्यन्ते ।
4. मित्रेण ............दीयन्ते ।
5. अतिथिना ............पीयते ।
6. दुष्टेण ............ निन्द्ये ।
7. महिलया ............ क्रीयन्ते ।
8. भगिन्या ............ प्रेषयध्वे ।
9. कविना ............ वर्ण्यते ।
10. अधिकारिणा ............ सूच्यन्ते ।
11. सैनिकेन ............ रक्ष्यते ।
12. पित्रा ............ आहूयसे ।
13. धेनुभिः ............चर्व्यते ।
14. मया ............ वन्द्यते ।

एते सुभाषिते उच्चैः पठत –

1. गम्यते यदि मृगेन्द्रमन्दिरं लभ्यते करिकपोलमौक्तिकम् ।
जम्बुकालयगतेन लभ्यते वत्सपुच्छखुरचर्मखण्डनम् ॥

*यदि सिंहस्य गुहा गम्यते तर्हि तत्र गजानां गण्डस्थलात् प्राप्तं मौक्तिकं लभ्यते । यदि शृगालस्य आवासः गम्यते तर्हि तत्र तु तेन मारितस्य वत्सस्य पुच्छखुरचर्मादीनां खण्डाः लभ्यन्ते ।*

2. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैरारभ्यते रज्जुः तया नागोऽपि बध्यते ॥

*अल्पानि अपि वस्तूनि यदि एकत्रितानि क्रियन्ते तर्हि महत् कार्यमपि साधयितुं शक्यते । तृणानि यदि विशकलितानि भवन्ति तर्हि तानि अतीव दुर्बलानि । तथापि तानि यदि एकत्रीकृत्य रज्जुरूपेण क्रियन्ते तर्हि तया रज्ज्वा गजस्य अपि बन्धनं कर्तुं शक्यते ।*

सूक्तिः – आपत्काले च कष्टे च नोत्साहस्त्यज्यते बुधैः ।

www.thearyasamaj.org

# त्यक्ताहङ्कारेण भाररहितेन भूयते २१

भावेप्रयोगः
(वर्तमानकाले)


एतां कथां सावधानतया उच्चैः पठत अवगच्छत च –



एकः काकः। तेन आकाशे **डीयते**। तेन सह अन्यैः अपि पक्षिभिः **डीयते**। तैः एकत्र मांसखण्डः दृश्यते। मांसखण्डं मुखेन गृहीत्वा काकेन **पलायते**। अनुक्षणं तस्य पृष्ठतः अन्यैः काकैः गृध्रैः च **धाव्यते**। मांसखण्डं रक्षितुम् अनेन काकेन ततोऽपि उपरि **डीयते**। काकैः गृध्रैः चापि स्वस्य श्रान्तताम् अपरिगणय्य तस्य पृष्ठतः **डीयते**।

अनेन काकेन तु **कम्प्यते**। तस्मात् काकस्य मुखात् मांसखण्डेन **पत्यते**। अधः पतितं मांसखण्डं ग्रहीतुम् अन्यैः काकैः गृध्रैश्च **धाव्यते**।





तदा काकेन अन्यपक्षिभ्यः मुक्तेन **भूयते**। तेन ज्ञायते यत् अधुना मया स्वतन्त्रेण **भूयते** इति।



मांसखण्डेन इव अस्मासु अपि अहङ्कारेण **भूयते**। यदि सः अहङ्कारः त्यक्तः भवति तर्हि जीवनेन भाररहितेन **भूयते**। मुक्तेन काकेन गगनसौन्दर्यं यथा द्रष्टुं **शक्यते** तथैव अस्माभिः अपि जीवनसौन्दर्यं द्रष्टुं **शक्यते**।



एतानि वाक्यानि सावधानतया उच्चैः पठत –

| | |
|---|---|
| काकेन आकाशे **डीयते**। | तेन **धाव्यते**। |
| मम सन्तोषेण **भूयते**। | वृक्षैः **कम्प्यते**। |
| कन्दुकेन **पत्यते**। | पुष्पेण **विकस्यते**। |
| सूर्येण **प्रकाश्यते**। | शुनकैः **भष्यते**। |

एतेषु वाक्येषु प्रयुक्ताः सर्वेऽपि अकर्मकाः धातवः सन्ति।

www.thearyasamaj.org

➪ अकर्मकधातूनां कर्तरिप्रयोगः भावेप्रयोगश्च सम्भवतः।

यथा –

| | |
|---|---|
| छात्रः उपविशति। | छात्रेण उपविश्यते। |
| एते उत्तिष्ठन्ति। | एतैः उत्थीयते। |
| शिशुः रोदिति। | शिशुना रुद्यते। |
| भगिनी हसति। | भगिन्या हस्यते। |
| नर्तक्यः नृत्यन्ति। | नर्तकीभिः नृत्यते। |

**अवधेयम्**

एतेषां वाक्यानां परिशीलनानन्तरं वयं भावेप्रयोगस्य नियमान् एवं संग्रहीतुं शक्नुमः –

i. भावेप्रयोगे कर्तृपदं तृतीयाविभक्त्यन्तं भवति।

ii. भावेप्रयोगे कर्मपदं न भवति।

iii. भावेप्रयोगे क्रियापदं सर्वदा प्रथमपुरुष-एकवचनान्तमेव भवति।

यथा – पत्यते, धाव्यते। (पत्येते, धाव्येते – इत्यादीनां रूपाणां प्रयोगः कदापि न सम्भवति। एवमेव मध्यमपुरुषस्य उत्तमपुरुषस्य च अपि न सम्भवति।)

## अभ्यासः

1. एतानि वाक्यानि भावेप्रयोगे परिवर्तयत –

| कर्तरिप्रयोगः | भावे प्रयोगः |
|---|---|
| 1. पुष्पं विकसति। | **पुष्पेण विकस्यते।** |
| 2. शिशवः रुदन्ति। | ..................................। |
| 3. बालः उत्तिष्ठति। | ..................................। |
| 4. जनाः उपविशन्ति। | ..................................। |
| 5. सः कुप्यति। | ..................................। |
| 6. शुनकाः भषन्ति। | ..................................। |
| 7. त्वं खिद्यसे। | ..................................। |
| 8. उन्मत्ताः हसन्ति। | ..................................। |

www.thearyasamaj.org

9. सिंहः गर्जति । ....................................... ।
10. दीपाः ज्वलन्ति । ....................................... ।
11. नर्तकी नृत्यति । ....................................... ।
12. महिलाः लज्जन्ते । ....................................... ।
13. पापं क्षयति । ....................................... ।
14. गङ्गा वहति । ....................................... ।
15. आरक्षकाः वसन्ति । ....................................... ।
16. सस्यं कम्पते । ....................................... ।
17. वयं तिष्ठामः । ....................................... ।
18. शाखाः वर्धन्ते । ....................................... ।
19. चित्रं शोभते । ....................................... ।
20. पर्यटकाः भ्रमन्ति । ....................................... ।

### अवधेयम्

| सकर्मकाः धातवः | | अकर्मकाः धातवः | |
|---|---|---|---|
| **कर्तरिप्रयोगः** | **कर्मणिप्रयोगः** | **कर्तरिप्रयोगः** | **भावेप्रयोगः** |

प्रयोगपरिवर्तनसन्दर्भे अवधातव्याः केचन अंशाः सन्ति । यथा –

अ. प्रयोगपरिवर्तनसन्दर्भे **कर्तृपदस्य कर्मपदस्य क्रियापदस्य च रूपेषु परिवर्तनं भवति** । परन्तु वाक्ये स्थितानाम् अन्येषां शब्दानां परिवर्तनं न भवति ।

यथा – **सुरेशः** प्रतिदिनं सायङ्काले गृहे **पाठं पठति** ।

एतस्य कर्मणिप्रयोगः यथा – **सुरेशेन** सायङ्काले गृहे **पाठः पठ्यते** ।

अत्र प्रतिदिनं सायङ्काले गृहे – इत्येतेषां रूपाणां परिवर्तनं न जातम् । तानि रूपाणि कर्तरिप्रयोगे कर्मणिप्रयोगे च समानानि एव । एवमेव भावेप्रयोगे अपि ।

www.thearyasamaj.org

2. उपरितनान् अंशान् मनसि निधाय अधः लिखितायाः कथायाः कर्मणि भावे वा प्रयोगपरिवर्तनं कुरुत –

1. एकः भिक्षुकः अस्ति।

............................................................................. ।

2. सः भिक्षाटनं कृत्वा जीवति।

............................................................................. ।

3. प्रतिदिनं प्रभाते एव सः प्रतिष्ठते।

............................................................................. ।

4. सः भिक्षाटनं कुर्वन् सर्वत्र भ्रमति।

............................................................................. ।

5. कदाचित् सः जीर्णानि कागदानि संगृह्य तेषां विक्रयणेन अपि धनं सम्पादयति।

............................................................................. ।

6. एकदा सायङ्काले सः गृहम् आगच्छति।

............................................................................. ।

7. तस्मिन् दिने सङ्गृहीतानि कागदानि पृथक्करोति।

............................................................................. ।

8. तत्र एकां कागदपोटलिकां सः पश्यति।

............................................................................. ।

9. तत्र शतं रूप्यकाणि सन्ति।

............................................................................. ।

10. भिक्षुकः चिन्तयति।

............................................................................. ।

11. अनन्तरं सः आरक्षककार्यालयं गच्छति।

............................................................................. ।

12. सः आरक्षकाय धनं ददाति, विषयं निवेदयति च।

............................................................................. ।

13. आरक्षकः नितरां मोदते।

............................................................................. ।

14. सः भिक्षुकं श्लाघते।

............................................................................. ।

15. धनं तस्य स्वामिने अर्पयामि इति च सः कथयति।

............................................................................. ।

www.thearyasamaj.org

आ. प्रयोगपरिवर्तनसन्दर्भे कर्तृपदस्य कर्मपदस्य वा विशेषणानि सन्ति चेत् तेषां रूपाणामपि विभक्ति – परिवर्तनं भवति ।

यथा – कुशलः लेखकः उत्तमां कथां लिखति ।

एतस्य वाक्यस्य कर्मणिप्रयोगः एवं भवति –

कुशलेन लेखकेन उत्तमा कथा लिख्यते ।

अत्र विशेषणानामपि परिवर्तनं विशेष्यानुगुणं भवति ।

## अभ्यासः

3. एतेषां वाक्यानां प्रयोगपरिवर्तनं कुरुत –

1. कुशलः गायकः उत्तमं गीतं गायति ।

   ................................................................................ ।
2. चपलः वानरः मधुराणि फलानि खादति ।

   ................................................................................ ।
3. वीराः सैनिकाः दुष्टान् शत्रून् मारयन्ति ।

   ................................................................................ ।
4. बुद्धिमती उमा आत्मीयाः सखीः सत्करोति ।

   ................................................................................ ।
5. उदात्ताः पुरुषाः क्षुद्रान् विषयान् न चिन्तयन्ति ।

   ................................................................................ ।
6. प्रसिद्धाः अभियन्तारः भव्यानि भवनानि निर्मान्ति ।

   ................................................................................ ।
7. सुन्दरी बालिका समीचीनम् अभिनयं करोति ।

   ................................................................................ ।
8. चतुराः पत्रकाराः सुचिन्तितान् प्रश्नान् पृच्छन्ति ।

   ................................................................................ ।
9. वृद्धः पितामहः रमणीयाः कथाः वदति ।

   ................................................................................ ।
10. बलवान् सिंहः दुर्बलान् मृगान् मारयति ।

   ................................................................................ ।

www.thearyasamaj.org

4. कर्मणिप्रयोगेण भावेप्रयोगेण च लिखिताम् एतां कथां पठित्वा कर्तरिप्रयोगेण परिवर्तयत –

1. एकेन रजकेन भूयते।

........................................................................................ ।

2. तेन एकः गर्दभः पाल्यते।

........................................................................................ ।

3. तेन गर्दभाय अधिकः आहारः न दीयते।

........................................................................................ ।

4. अतः गर्दभेन कुप्यते।

........................................................................................ ।

5. एकदा गर्दभस्य बुभुक्षया भूयते।

........................................................................................ ।

6. तदा तेन दूरं गम्यते, तत्र क्षेत्राणि दृष्ट्वा तुष्यते।

........................................................................................ ।

7. गर्दभेन एवं चिन्त्यते –

........................................................................................ –

8. यदि मया सिंहस्य चर्म ध्रियते तर्हि मां दृष्ट्वा सर्वैः धाव्यते।

........................................................................................ ।

9. एकेन अपि मां ताडयितुं समीपं न आगम्यते।

........................................................................................ ।

10. एवं चिन्तयित्वा गर्दभेन एकं सिहचर्म आनीयते। तत् ध्रियते च।

........................................................................................ ।

11. प्रतिदिनं तेन सानन्दं सस्यानि खाद्यन्ते।

........................................................................................ ।

12. कृषकैः भीत्या गर्दभस्य छाया अपि न स्पृश्यते।

........................................................................................ ।

13. एकदा तत् क्षेत्रं प्रति एकया गर्दभ्या आगम्यते।

........................................................................................ ।

14. तां दृष्ट्वा गर्दभेन आनन्देन रट्यते।

........................................................................................ ।

15 तदा 'एषः मिथ्यासिंहः' इति जनैः ज्ञायते।

........................................................................................ ।

16. तैः आगत्य गर्दभः दण्डैः ताड्यते। गर्दभेन मृतेन भूयते।

........................................................................................ ।

सूक्तिः – जितक्रोधेन सर्वं हि जगदेतद्विजीयते।

www.thearyasamaj.org

# जन्तुशाला वीक्ष्यताम् २२

कर्मणिप्रयोगः भावेप्रयोगश्च
(लोट्लकारः)

एतत् सम्भाषणम् उच्चैः पठत –

माता – विवेक ! **उत्थीयताम्** । शीघ्रम् **उत्थीयताम्** । षड्वादनं सञ्जातम् ।

विवेक : – अद्य तु रविवासरः । .....

माता – सत्यं, किन्तु अद्य सर्वैः जन्तुशाला गन्तव्या अस्ति । पित्रा अपि अस्माभिः सह आगम्यते । न स्मर्यते किम् ?

विवेक : – आं स्मृतम् । उमेश ! प्रकाश ! राधिके ! **उत्थीयताम्** । सर्वैः **उत्थीयताम्** । स्नानादिकं शीघ्रं **समाप्यताम्** । अद्य वयं जन्तुशालां द्रष्टुं गच्छामः ।

पिता – शैलजे ! भवत्या शीघ्रं पाकः **निर्मीयताम्** । आवश्यकं चेत् सर्वेषां साहाय्यं **स्वीक्रियताम्** । नववादने प्रस्थानं कुर्मः । तावता सर्वैः सज्जैः **भूयताम्** ।

(सर्वे मिलित्वा जन्तुशालाम् आगच्छन्ति ।)

उमेश : – पितः ! अत्र बहु जनसम्मर्दः अस्ति ।

पिता – आम् । अद्य अवकाशदिनं खलु । अतः महान् जनसम्मर्दः दृश्यते । **श्रूयताम्** । भवद्भिः सर्वैः परस्परं हस्तः **गृह्यताम्** । केनाऽपि अपृष्ट्वा इतस्ततः मा **गम्यताम्** । वामतः क्रमशः प्राणिनः **वीक्ष्यन्ताम्** ।

विवेक : – उमेश ! तत्र पञ्जरे सिंहः **दृश्यताम्** ।

उमेशः – प्रकाश ! सर्वैः **अवलोक्यताम्** । इदानीं सिंहः जृम्भमाणः दृश्यते ।

माता – भोः ! राधिका द्रष्टुं न शक्नोति । सा **उन्नीयताम्** ।

पिता – अस्तु । राधिके ! **आगम्यताम्** । इदानीं **वीक्ष्यताम्** ।

विवेक : – पितः ! अहम् अग्रे गच्छानि किम् ?

माता – मास्तु, अग्रे मास्तु । फलके लिखिताः सूचनाः **पठ्यन्ताम्** ।

विवेक : – (पठति) दूरात् प्राणिवीक्षणं **क्रियताम्** । तेभ्यः खादितुं किमपि मा **दीयताम्** ।

पिता – तत्र **दृश्यताम्** । कति गजाः सन्ति ?

माता – प्रकाश ! गजानां गणना **क्रियताम्** ।

प्रकाशः – एकं, द्वे, त्रीणि............. दश । दश गजाः सन्ति ।

विवेकः – पितः ! तत्र दीर्घः मकरः अस्ति । गच्छानि किम् ?

www.thearyasamaj.org

उमेशः - पितः ! अहमपि गच्छामि ।

पिता - विवेक ! उमेशः अपि **नीयताम्** । किन्तु समीपं मा **गम्यताम्**, न वा मकरः **स्पृश्यताम्** ।

विवेकः - अस्तु । उमेश ! मया सह **आगम्यताम्** । तत्र गत्वा पश्याव ।

पिता - शैलजे ! भवत्या उमेशविवेकाभ्यां सह **स्थीयताम्** । अहं तावत् राधिकाप्रकाशौ अन्यत्र नीत्वा अन्यान् प्राणिनः दर्शयामि । **आगम्यताम्** । **दृश्यन्ताम्** अत्रत्याः खगाः, चिक्रोडाः, शशाः, श्वेतमूषकाः, बकाः, वानराः ............ ।

राधिका - बुभुक्षा बाधते पितः ! भोजनं **प्रदीयताम्** ।

पिता - विवेक ! उमेश ! सर्वैः **आगम्यताम्** । भोजनं कुर्मः ।

प्रकाशः - भोजनं मास्तु । मह्यं पयोहिमं **दीयताम्** ।

पिता - भवतु, भवते पयोहिमम् आनयामि ।

माता - सर्वेभ्यः पयोहिमं **क्रीयतां** भोः ।

पिता - अहं यावत् पयोहिमं क्रीत्वा आगच्छामि तावत् भोजनं **परिवेष्यताम्** । तदनन्तरं गृहं गच्छाम ।

I एतानि वाक्यनि सावधानतया उच्चैः पठत –

| कर्तरिप्रयोगः | कर्मणिप्रयोगः |
|---|---|
| 1. भवती कर्तव्यं स्मरतु । | भवत्या कर्तव्यं **स्मर्यताम्** । |
| 2. शिशुः दुग्धं पिबतु । | शिशुना दुग्धं **पीयताम्** । |
| 3. भवत्यः उपहारं ददतु । | भवतीभिः उपहारः **दीयताम्** । |
| 4. यूयं विषयं जानीत । | युष्माभिः विषयः **ज्ञायताम्** । |
| 5. भवन्तः कार्यक्रमं पश्यन्तु । | भवद्भिः कार्यक्रमः **दृश्यताम्** । |
| 6. लेखकः गद्यानि लिखतु । | लेखकेन गद्यानि **लिख्यन्ताम्** । |
| 7. भवान् श्लोकान् पठतु । | भवता श्लोकाः **पठ्यन्ताम्** । |
| 8. कर्मकरः कार्याणि करोतु । | कर्मकरेण कार्याणि **क्रियन्ताम्** । |
| 9. त्वं गीतानि शृणु । | त्वया गीतानि **श्रूयन्ताम्** । |
| 10. भक्तः देवं वन्दताम् । | भक्तेन देवः **वन्द्यताम्** । |

www.thearyasamaj.org

एतानि वाक्यानि सावधानं परिशीलयत –

| कर्तरिप्रयोगः | भावेप्रयोगः |
|---|---|
| 1. भवान् तिष्ठतु। | भवता **स्थीयताम्**। |
| 2. भवती नृत्यतु। | भवत्या **नृत्यताम्**। |
| 3. त्वं वर्धस्व। | त्वया **वर्ध्यताम्**। |
| 4. भवन्तः न खिद्यन्ताम्। | भवद्भिः न **खिद्यताम्**। |
| 5. भवत्यः उत्तिष्ठन्तु। | भवतीभिः **उत्थीयताम्**। |
| 6. यूयं सञ्चरत। | युष्माभिः **सञ्चर्यताम्**। |
| 7. भवन्तौ रुदिताम्। | भवद्भ्यां **रुद्यताम्**। |
| 8. भवत्यौ हसताम्। | भवतीभ्यां **हस्यताम्**। |
| 9. विमानम् उड्डयताम्। | विमानेन **उड्डीयताम्**। |
| 10. सर्वे उपविशन्तु। | सर्वैः **उपविश्यताम्**। |

## अभ्यासः

1. उदाहरणानुगुणं रिक्तस्थाननि पूरयत –

| कर्तरि | कर्मणि | कर्तरि | कर्मणि |
|---|---|---|---|
| रक्षतु | रक्ष्यताम् | लभताम् | लभ्यताम् |
| नयतु | ............. | सेवताम् | ............. |
| ऊहताम् | ............. | ददातु | ............. |
| वन्दताम् | ............. | वदतु | ............. |
| ईक्षताम् | ............. | शृणोतु | ............. |
| सहताम् | ............. | जानातु | ............. |
| आह्वयतु | ............. | आलोकताम् | ............. |
| गायतु | ............. | अपेक्षताम् | ............. |
| **कर्तरि** | **भावे** | **कर्तरि** | **भावे** |
| वर्धताम् | वर्ध्यताम् | वर्तताम् | ............. |
| रमताम् | ............. | शोभताम् | ............. |
| कम्पताम् | ............. | शेताम् | शय्यताम् |

www.thearyasamaj.org

2. उदाहरणानुगुणं रिक्तस्थाननि पूरयत –

उदा –

| | | | |
|---|---|---|---|
| **पश्यतु** | दृश्यताम् | दृश्येताम् | दृश्यन्ताम् |
| | दृश्यस्व | दृश्येथाम् | दृश्यध्वम् |
| | दृश्ये | दृश्यावहै | दृश्यामहै |
| **जानातु** | ज्ञायताम् | ............... | ............... |
| | ............... | ............... | ............... |
| | ............... | ............... | ............... |
| **वदतु** | उद्यताम् | ............... | ............... |
| | ............... | ............... | ............... |
| | ............... | ............... | ............... |
| **लभताम्** | लभ्यताम् | ............... | ............... |
| | ............... | ............... | ............... |
| | ............... | ............... | ............... |

3. उदाहरणानुगुणं कर्मणि परिवर्तयत –

क) उदा –

आरक्षकः चोरं ताडयतु — **आरक्षकेण चोरः ताड्यताम् ।**

1. बालः कन्दुकं क्षिपतु । ........................................।
2. सेवकः भारं वहतु । ........................................।
3. सर्वे शब्दं शृण्वन्तु । ........................................।
4. छात्रः स्यूतं गृह्णातु । ........................................।
5. गुरुः उपदेशं करोतु । ........................................।

www.thearyasamaj.org

ख) छात्रः पाठौ पठतु। **छात्रेण पाठौ पठ्येताम्।**

1. बालिका चित्रे पश्यतु ........................................।
2. शुनकः गृहं रक्षतु। ........................................।
3. अग्रजः अनुजौ नयतु। ........................................।
4. शिक्षकः छात्रौ आह्वयतु। ........................................।
5. माता लेखन्यौ आनयतु। ........................................।
6. एषा कविताः जानातु। ........................................।
7. अयं कार्याणि करोतु। ........................................।
8. भवती श्लोकान् उच्चारयतु। ........................................।
9. त्वं शब्दं शृणु। ........................................।
10. सा लेखनीः क्रीणातु। ........................................।

4. एतानि वाक्यानि कर्मणि परिवर्तयत–

क) 1. पुत्रः मातरं सेवताम्। ........................................।
2. सः मिष्ठान्नं लभताम्। ........................................।
3. युवकः मातापितरौ वन्दताम्। ........................................।
4. त्वं कष्टानि सहस्व। ........................................।
5. संस्कृतज्ञः संस्कृतोन्नतिम् अपेक्षताम्। ........................................।
6. सा चित्राणि वीक्षताम्। ........................................।
7. यूयं यशः लभध्वम्। ........................................।
8. इयं मन्त्रान् जानीताम्। ........................................।

ख) 1. भवान् रसं पिबतु। ........................................।
2. भवती पाठौ पठतु। ........................................।
3. त्वं कार्याणि कुरु। ........................................।

www.thearyasamaj.org

4. भवान् कार्याणि जानातु। .............................................।

5. भवन्तः गीतं श्रृण्वन्तु। .............................................।

6. त्वं सत्यं वद। .............................................।

7. भवती भ्रातॄन् उपदिशतु। .............................................।

8. भवन्तः सर्वान् आह्वयन्तु। .............................................।

9. यूयं सूत्राणि स्मरत। .............................................।

10. भवान् तान् पश्यतु। .............................................।

5. एतानि वाक्यानि भावे परिवर्तयत–

उदा –

1. सर्वेषां धैर्यं भवतु — **सर्वेषां धैर्येण भूयताम्।**

2. सर्वे शीघ्रं धावन्तु। .............................................।

3. त्वम् उत्तिष्ठ। .............................................।

4. ते मा पतन्तु। .............................................।

5. युवां हसतम्। .............................................।

6. भवन्तः आसन्दे उपविशन्तु। .............................................।

7. बालकाः मा रुदन्तु। .............................................।

8. यूयं नृत्यत। .............................................।

9. चित्राणि शोभन्ताम्। .............................................।

10. बालिके लज्जेताम्। .............................................।

11. सस्यानि कम्पन्ताम्। .............................................।

12. त्वं मोदस्व। .............................................।

13. खगाः डयन्ताम्। .............................................।

14. यूयं सत्कार्ये रमध्वम्। .............................................।

15. वयं वर्धामहे। .............................................।

www.thearyasamaj.org

6. अधः दत्तेषु वाक्येषु दोषान् परिहरत –

उदा – 1. तैः काव्यानि पठ्यताम्। **तैः काव्यानि पठ्यन्ताम् ।**

2. भवता संस्कृतसेवां क्रियताम्। ........................................ ।

3. एताभिः नाटकं वीक्षताम्। ........................................ ।

4. भारतस्य यशः वर्ध्यताम्। ........................................ ।

5. युष्माभिः अङ्कनीः क्रीयन्ताम् । ........................................ ।

6. माता भोजनं दीयताम्। ........................................ ।

7. सर्वैः संस्कृतेन भाषन्ताम्। ........................................ ।

8. शिशुभिः सर्वान् अवलोक्यन्ताम्। ........................................ ।

9. सस्यानि कम्प्यन्ताम्। ........................................ ।

10. भारतमाता विश्वे विराज्यताम्। ........................................ ।

एतत् गीतम् उच्चैः पठत, अत्र प्रयुक्तानि कर्मणि /भावे लोट्लकाररूपाणि जानीत च –

## सादरं समीयताम्

सादरं समीयतां वन्दना विधीयताम्
श्रद्धया स्वमातृभूसमर्चना विधीयताम्॥

आपदो भवन्तु वा विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा।
धीरता न हीयतां, वीरता विधीयतां
निर्भयेन चेतसा पदं पुरो निधीयताम्॥ ॥ सादरं ॥

प्राणदायिनी इयं त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयम्।
एतदीयवन्दने सेवनेऽभिवन्दने
साभिमानमात्मनो जीवनं प्रदीयताम्॥ ॥ सादरं ॥

– *वासुदेवद्विवेदी शास्त्री*

सूक्तिः – पदं हि सर्वत्र गुणैर्विधीयते।

www.thearyasamaj.org

# २३ परेषां दुःखं स्वदुःखम्

**कर्मणिप्रयोगः भावेप्रयोगश्च**
**(लङ्लकारः)**

एतां कथाम् उच्चैः पठत –

कस्मिंश्चित् ग्रामे काचित् वृद्धा पुत्रेण सह निवसति स्म। मातापुत्रौ उभौ अपि दयापरौ। लघुगृहे एव आसीत् तयोः वासः।

कदाचित् वृद्धा रुग्णा जाता। औषधस्य निर्माणाय तया लोध्रवृक्षस्य त्वक् **ऐष्यत**। तया पुत्रः **आहूयत**। स्वीया अपेक्षा **असूच्यत** च।

पुत्रेण वनम् **अगम्यत**। बहुत्र अन्विष्य अन्ते तेन लोध्रवृक्षः **अदृश्यत**। तेन परशुना लोध्रत्वचः **अकृत्यन्त**। ताः सर्वाः सङ्गृह्य गृहम् आनीय मात्रे **अदीयन्त**। मात्रा लोध्रत्वचा औषधम् **अक्रियत**। तस्य सेवनेन सा शीघ्रमेव रोगमुक्ता जाता।

पुनः कदाचित् तया पुत्रस्य रक्तरञ्जितं श्वेतवस्त्रम् **आलोक्यत**। तया आतङ्केन पुत्रः **अपृच्छ्यत** – ''वत्स ! भवतः श्वेतवस्त्रं कथं रक्तमयं सञ्जातम् ?'' इति। पुत्रेण न किमपि **अकथ्यत**। तेन तूष्णीम् **अस्थीयत**। तदा मात्रा सानुरोधम् **अपृच्छ्यत** – ''पुत्र किं जातम् ? उच्यताम्'' इति।

तदा पुत्रेण **अकथ्यत** – ''अम्ब ! तस्मिन् दिने लोध्रवृक्षस्य छेदनसमये मम मनसि विचारः उत्पन्नः यत् त्वचः निष्कासनसमये तेन वृक्षेण कीयती वेदना अनुभूता स्यात् ? यद्यपि तेन वक्तुं न शक्यते, तथापि वेदना स्यादेव इति। अद्य मया निश्चितं यत् वृक्षस्य कीदृशी वेदना जाता स्यात् इति मया ज्ञातव्यम् इति। अतः मया मम शरीरस्य किञ्चित् चर्म **अकर्त्यत**। ततः रक्तप्रवाहः आरब्धः। तेन मम श्वेतवस्त्रं रक्तरञ्जितं जातम्'' इति।

पुत्रस्य वचनेन मात्रा नितराम् **अतुष्यत**। तस्याः नेत्रे सजले जाते। पुत्रस्य दयागुणं ज्ञात्वा अतीव प्रसन्नतया तया सः गाढम् **आलिङ्ग्यत**।

➪ अत्र प्रदत्तानि वाक्यानि सावधानतया पठत –

पुत्रेण वनम् **अगम्यत**।
तेन लोध्रत्वचः **अकृत्यन्त**।
मात्रा औषधम् **अक्रियत**।
बालैः पाठः **अपठ्यत**।
तया कथा **अलिख्यत**।
एताभिः नाटके **अदृश्येताम्**।
भवद्भिः उत्तराणि **औद्यन्त**।

एतानि सर्वाणि कर्मणि 'लङ्'लकाररूपाणि सन्ति।

www.thearyasamaj.org

वृक्षैः **अकम्प्यत।**

बालैः उच्चैः **अहस्यत।**

सस्यैः **अवर्ध्यत।**

तेन तल्पे **अशय्यत।**

वृक्षात् पर्णैः **अपत्यत।**

एतानि सर्वाणि भावेलङ्लकाररूपाणि सन्ति।

➪ एतानि वाक्यानि परिशीलयत –

| कर्तरिवाक्यानि | कर्मणिवाक्यानि |
|---|---|
| सः श्लोकम् अपठत्। | तेन श्लोकः **अपठ्यत।** |
| भवती काव्यानि अलिखत्। | भवत्या काव्यानि **अलिख्यन्त।** |
| माता पाकम् अकरोत्। | मात्रा पाकः **अक्रियत।** |
| छात्राः गुरून् अवन्दन्त। | छात्रैः गुरवः **अवन्द्यन्त।** |
| अहं पुस्तकानि अक्रीणाम्। | मया पुस्तकानि **अक्रीयन्त।** |
| यूयं फलानि अखादत। | युष्माभिः फलानि **अखाद्यन्त।** |
| आवां ग्रामम् अगच्छाव। | आवाभ्यां ग्रामः **अगम्यत।** |
| भवत्यौ चित्रे अपश्यताम्। | भवतीभ्यां चित्रे **अदृश्येताम्।** |
| **कर्तरिवाक्यानि** | **भावेवाक्यानि** |
| युवकाः अमोदन्त। | युवकैः **अमुद्यत।** |
| छात्राः अभ्रमन्। | छात्रैः **अभ्रम्यत।** |
| ते किमर्थम् अखिद्यन्त ? | तैः किमर्थम् **अखिद्यत ?** |
| पुष्पाणि अम्लायन्त। | पुष्पैः अम्लायत। |
| शिशवः भृशम् अरुदन्। | शिशुभिः भृशम् **अरुद्यत।** |

➪ कर्मणि भावे च लङ्रूपाणि –

'कृ' धातुः –

| | | |
|---|---|---|
| अक्रियत | अक्रियेताम् | अक्रियन्त |
| अक्रियथाः | अक्रियेथाम् | अक्रियध्वम् |
| अक्रिये | अक्रियावहि | अक्रियामहि |

www.thearyasamaj.org

| | | | |
|---|---|---|---|
| | अरम्यत | अरम्येताम् | अरम्यन्त |
| 'रम्'धातुः | अरम्यथाः | अरम्येथाम् | अरम्यध्वम् |
| | अरम्ये | अरम्यावहि | अरम्यामहि |

## अभ्यासः

3. उदाहरणानुसारम् अत्र निर्दिष्टानां क्रियापदानां रूपाणि लिखत –

| | | | | |
|---|---|---|---|---|
| पठ्यते | → | अपठ्यत | अपठ्येताम् | अपठ्यन्त |
| क्रियते | → | ............... | ............... | ............... |
| खाद्यते | → | ............... | ............... | ............... |
| लिख्यते | → | ............... | ............... | ............... |
| दृश्यते | → | ............... | ............... | ............... |
| ज्ञायते | → | ............... | ............... | ............... |
| वन्द्यते | → | ............... | ............... | ............... |
| दीयते | → | ............... | ............... | ............... |
| उद्यते | → | औद्यत | ............... | ............... |
| आहूयते | → | आहूयत | ............... | ............... |
| ईक्ष्यते | → | ऐक्ष्यत | ............... | ............... |

3. अत्र दत्तानि कर्तरिवाक्यानि कर्मणिवाक्यत्वेन परिवर्तयत –

| | |
|---|---|
| यथा – ताः कथाम् अशृण्वन् । | ताभिः कथा अश्रूयत। |
| 1. बालकाः देवम् अनमन्। | ........................................ । |
| 2. उमा नृत्यम् अकरोत्। | ........................................ । |
| 3. मार्जारौ क्षीरम् अपिबताम्। | ........................................ । |
| 4. वानराः वृक्षेषु व्यहरन् | ................................ व्यह्रियत । |
| 5. यानानि मार्गेण अगच्छन्। | ........................................ । |
| 6. ते धारावाहिनीम् अपश्यन्। | ........................................ । |
| 7. भवन्तः तेभ्यः फलानि अददुः। | ........................................ । |
| 8. पिता पुत्र्यौ अनयत्। | ........................................ । |
| 9. अधिकारी सेवकम् आह्वयत्। | ........................................ । |

www.thearyasamaj.org

10. वयं संस्यासिनः अवन्दामहि। ............................................ ।
11. त्वं संस्कृतकार्यम् अकरोः। ............................................ ।
12. एतौ कविताः अजानीताम्। ............................................ ।
13. अहं देशसेवाम् अकरवम्। ............................................ ।
14. ताः गीतानि अगायन्। ............................................ ।

4. आवरणे दत्तेषु रूपेषु उचितं चित्वा वाक्यं रचयत, तस्य वाक्यस्य कर्तरिवाक्यम् अपि लिखत -

यथा - मात्रा ध्यानम् **अक्रियत**। (अक्रीयत, अक्रियत, अकुरुत)
**माता ध्यानम् अकरोत्।**

1. तेन पाठः ........................। (अपठ्यत, अपठ्यत्, अपठत्)
............................................ ।
2. भवता पद्यानि ........................। (अगीयत, अगायन्त, अगीयन्त)
............................................ ।
3. महिलाभिः शाकानि ........................। (अक्रियन्त, अक्रीयन्त, अक्रीणन्)
............................................ ।
4. पक्षिभिः आकाशे ........................। (अडयन्त, अडीयन्त, अडीयत)
............................................ ।
5. सुहृदा घटी ........................। (अदीयत, अदीयत्, अददात्)
............................................ ।
6. अस्माभिः आचार्यः ........................। (अवन्द्यन्त, अवन्दत, अवन्द्यत)
............................................ ।
7. मया पर्वतौ ........................। (अदृश्यत, अदृश्येताम्, अदृश्ये)
............................................ ।
8. एतैः उत्तराणि ........................। (औद्यन्त, अवद्यन्त, अवदन्)
............................................ ।
9. नक्षत्रैः ........................। (प्राकाशन्त, प्राकाश्यन्त, प्राकाश्यत)
............................................ ।
10. सर्वैः भारतदेशः ........................। (आद्रियत, आद्रियन्त, आद्रीयत)
............................................ ।

सूक्तिः - विद्वान् सर्वत्र पूज्यते।

www.thearyasamaj.org

# २४ अस्माभिः साहाय्यं क्रियेत..

**कर्मणिप्रयोगः भावेप्रयोगश्च (लिङ्लकारः)**

एतत् सम्भाषणम् उच्चैः पठत –

गणेशः – अयि भोः, अत्र सन्ति वा भवन्तः ? बहुकालाद् आरभ्य अन्विष्यामि। भवद्भिः अत्र **भूयेत** इति न ऊहितं मया।

नरेशः – अहो गणेश ! कदा देहलीम् आगतः भवान् ?

गणेशः – अद्य प्रातः एव।

माला – गणेशः किमर्थम् अस्मान् **अन्विष्यति** ?

गीता – मया कथं वा **ज्ञायेत** ? तमेव पृच्छतु।

माला – गणेश ! भवान् किमर्थम् अस्मान् अन्विष्टवान् ?

गणेशः – भवद्भिः **ज्ञायेत** एव। अमितस्य पितुः अपघातः जातः इति।

सर्वे – आम्, ह्यः एव तत् ज्ञातम्। तदर्थम् एव वयम् अत्र सम्मिलिताः।

गणेशः – अत्र सम्मेलनेन किं वा जायते ?अमितस्य पिता **दृश्येत** चेत् वरं खलु।

नरेन्द्रः – तस्य पितुः अपघातः सामान्यः न। वैद्यानाम् अभिप्रायः श्रूयते यत् तस्य पादौ निश्चलौ जातौ स्तः, अतः कदाचित् पादौ **कर्त्येयाताम्**।

गणेशः – यदि तस्य पादौ **कर्त्येयाताम्** तर्हि लोकयानं तेन कथं **चाल्येत** ?

नरेशः – तत् तु नैव **शक्येत**।

माला – सर्वकारेण अमितस्य अग्रजा लिपिकापदे **नियोज्येत**।

गीता – चालकपदे कदाचित् अमितः एव नियोजयितुं **शक्येत**।

नरेशः – तदर्थम् अमितस्य अपेक्षितेन वयसा **भूयेत** खलु।

माला – तावता तस्य अम्बया उद्योगः **अङ्गीक्रियेत**। अथवा तावत्पर्यन्तम् उद्योगः रक्षणीयः इति सर्वकाराय तया प्रार्थनापत्रं **दीयेत**।

गीता – तावत्पर्यन्तम् एतस्य गृहसदस्यैः कष्टानि अपि **अनुभूयेरन्**।

गणेशः – अतः अस्माभिः साहाय्यं **क्रियेत** चेत् ..........।

सर्वे – तत् कथम् ?

गणेशः – यदि अस्माभिः सम्भूय सायं विशेषवर्गाः **सञ्चाल्येरन्** तर्हि पञ्चषसहस्ररूप्यकाणि तु **प्राप्येरन्** एव। आवर्षं वर्गान् सञ्चाल्य अमितस्य मात्रे यदि धनं **दीयेत** तर्हि निश्चयेन तैः कष्टं न **अनुभूयेत**।

नरेशः – अस्माभिः निश्चयेन एवं कर्तुं **शक्येत**।

www.thearyasamaj.org

गणेशः – अस्तु। इदानीं वयं तस्य पितरं द्रष्टुं गच्छाम किम् ?

सर्वे – निश्चयेन गच्छाम।

(सर्वे चिकित्सालयं गच्छन्ति।)

अस्मिन् सम्भाषणे स्थूलाक्षरैः मुद्रितानि विधिलिङ्लकारस्य कर्मणि भावे च रूपाणि सन्ति।

➪ एतानि वाक्यानि सावधानतया परिशीलयत –

| कर्तरिप्रयोगः | कर्मणिप्रयोगः |
|---|---|
| 1. धीरजः पाठं पठेत्। | धीरजेन पाठः पठ्येत। |
| 2. वयं योगाभ्यासं कुर्याम। | अस्माभिः योगाभ्यासः क्रियेत। |
| 3. भवान् दिनचर्यां लिखेत्। | भवता दिनचर्या लिख्येत। |
| 4. भगिनी घटीं पश्येत्। | भगिन्या घटी दृश्येत। |
| 5. सर्वे सत्यं वदेयुः। | सर्वैः सत्यम् उद्येत। |
| 6. भवती भाषणानि कुर्यात्। | भवत्या भाषणानि क्रियेरन्। |
| 7. सैनिकः शत्रून् जयेत्। | सैनिकेन शत्रवः जीयेरन्। |
| 8. धनिकः वस्त्राणि दद्यात्। | धनिकेन वस्त्राणि दीयेरन्। |
| 9. पितामही कथाः वदेत्। | पितामह्या कथाः उद्येरन्। |
| 10. कृषकः महिषीः क्रीणीयात्। | कृषकेन महिष्यः क्रीयेरन्। |

| कर्तरिप्रयोगः | भावेप्रयोगः |
|---|---|
| 1. अग्रजः कुप्येत्। | अग्रजेन कुप्येत। |
| 2. शिशुः रुद्यात्। | शिशुना रुद्येत। |
| 3. सर्वाः उपविशेयुः। | सर्वाभिः उपविश्येत। |
| 4. नटाः नृत्येयुः। | नटैः नृत्येत। |
| 5. जनाः तिष्ठेयुः। | जनैः स्थीयेत। |
| 6. सर्वे सन्तुष्येयुः। | सर्वैः सन्तुष्येत। |
| 7. ते पतेयुः। | तैः पत्येत। |
| 8. वृक्षाः कम्पेरन्। | वृक्षैः कम्प्येत। |

www.thearyasamaj.org

| | |
|---|---|
| 9. खगः डयेत। | खगेन डीयेत। |
| 10. बालकः सम्भाषेत। | बालकेन सम्भाष्येत। |

➪ पूर्वतनपाठेषु कर्मणिप्रयोगस्य, भावेप्रयोगस्य च ये नियमाः उक्ताः ते एव नियमाः अत्रापि अन्विताः भवन्ति।

क्रियापदस्य लिङ्लकाररूपाणि सावधानतया उच्चैः पठत –

| | | | | | |
|---|---|---|---|---|---|
| 'दृश्'धातुः – पश्येत् | प्रथमपुरुषः | – | दृश्येत | दृश्येयाताम् | दृश्येरन् |
| | मध्यमपुरुषः | – | दृश्येथाः | दृश्येयाथाम् | दृश्येध्वम् |
| | उत्तमपुरुषः | – | दृश्येय | दृश्येवहि | दृश्येमही |

## अभ्यासः

1. अवशिष्टरूपाणि रिक्तस्थानेषु पूरयत –

| | | | | |
|---|---|---|---|---|
| 'वद'धातुः | वदेत् | उद्येत | ........... | ........... |
| | | ........... | ........... | ........... |
| | | ........... | ........... | ........... |
| 'नी'धातुः | नयेत् | नीयेत | ........... | ........... |
| | | ........... | ........... | ........... |
| | | ........... | ........... | ........... |
| 'आ+ह्वे'धातुः | आह्वयेत् | आहूयेत | ........... | ........... |
| | | ........... | ........... | ........... |
| | | ........... | ........... | ........... |

2. एतानि वाक्यानि कर्मणि परिवर्तयत –

1. छात्राः कोलाहलं न कुर्युः। ...........................................।
2. भवन्तः पत्रिकां पठेयुः। ...........................................।
3. मित्राणि उपायनं दद्युः। ...........................................।
4. अहं शास्त्रीयसङ्गीतं श्रुणुयाम्। ...........................................।
5. सर्वे दुराभ्यासान् त्यजेयुः। ...........................................।
6. भवती काव्यानि पठेत्। ...........................................।

www.thearyasamaj.org

7. दर्शकाः कार्यक्रमान् पश्येयुः। ..........................................।
8. वयं विदेशं गच्छेम। ..........................................।
9. अधिकारी सेवकान् प्रेषयेत्। ..........................................।
10. सः सर्वं स्मरेत्। ..........................................।
11. प्राचार्यः तम् आह्वयेत्। ..........................................।
12. सा लेखनीः क्रीणीयात्। ..........................................।

3. एतानि वाक्यानि भावे परिवर्तयत –

1. पुष्पं विकसेत्। ..........................................।
2. व्याघ्रः गर्जेत्। ..........................................।
3. बालाः धावेयुः। ..........................................।
4. भगिनी उत्तिष्ठेत्। ..........................................।
5. वस्त्राणि नश्येयुः। ..........................................।
6. पर्यटकः विहरेत्। ..........................................।
7. अतिथिः तिष्ठेत्। ..........................................।
8. गृहं भवेत्। ..........................................।
9. दीपः ज्वलेत्। ..........................................।
10. रूप्यकाणि भवेयुः। ..........................................।
11. वृक्षाः कम्पेरन्। ..........................................।
12. भवन्तः मोदेरन्। ..........................................।
13. अयं रमेत। ..........................................।
14. खगाः डयेरन्। ..........................................।
15. संस्कृतं विराजेत। ..........................................।

सूक्तिः – परान् समुपसेवेत न सेव्येत परं परैः।

www.thearyasamaj.org

# २५ लोकहितं मम करणीयम्

तव्यत्–अनीयर्–प्रत्ययौ

एतद् गीतम् उच्चैः गायत –



मनसा सततं **स्मरणीयम्**
वचसा सततं **वदनीयम्**
लोकहितं मम **करणीयम्** ॥ लोकहितम् ॥

न भोगभवने **रमणीयम्**
न च सुखशयने **शयनीयम्**
अहर्निशं **जागरणीयम्**
लोकहितं मम **करणीयम्** ॥ मनसा ॥



न जातु दुःखं **गणनीयम्**
न च निजसौख्यं **मननीयम्**
कार्यक्षेत्रे **त्वरणीयम्**
लोकहितं मम **करणीयम्** ॥ मनसा ॥

दुःखसागरे **तरणीयम्**
कष्टपर्वते **चरणीयम्**
विपत्तिविपिने **भ्रमणीयम्**
लोकहितं मम **करणीयम्** ॥ मनसा ॥



गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे
तत्र मया **सञ्चरणीयम्**
लोकहितं मम **करणीयम्** ॥ मनसा ॥

*– डा. श्रीधर भास्कर वर्णेकरः*

1. गीते स्थूलाक्षरैः मुद्रितानि पदानि सङ्गृह्णीत –

1.................. 2.................. 3.................. 4..................
5.................. 6.................. 7.................. 8..................
9.................. 10.................. 11.................. 12..................
13.................. 14.................. 15.................. 16..................

www.thearyasamaj.org

## अवधेयम्

एतानि रूपाणि सावधानतया अवलोकयत –

वदनीयम् – वद् + अनीयम् (अनीयर्)

गणनीयम् – गण् + अनीयम् (अनीयर्)

मननीयम् – मन् + अनीयम् (अनीयर्)

आवरणे लिखितः 'अनीयर्' इत्येषः कश्चन प्रत्ययः। एषः प्रत्ययः धातोः अन्ते योज्यते।

यथा – पठ + अनीयर् = पठनीयम्

(अत्र 'पठ' इति धातुः 'अनीयर्' इति प्रत्ययः)

प्रायः अनीयर्प्रत्ययान्तं रूपं कर्मणिप्रयोगे भावे प्रयोगे च उपयुज्यते।

| धातुः | | अनीयर्प्रत्ययान्तं रूपम् |
|---|---|---|
| क्रीड् | → | क्रीडनीयम् |
| खाद | → | खादनीयम् |
| खेल् | → | खेलनीयम् |
| कृ | → | करणीयम् |
| चल | → | चलनीयम् |
| गम् | → | गमनीयम् |
| श्रु | → | श्रवणीयम् |
| स्मृ | → | स्मरणीयम् |
| तॄ | → | तरणीयम् |
| भ्रम् | → | भ्रमणीयम् |

➩ 'अनीयर्' इव 'तव्यत्' इत्यपि अपरः प्रत्ययः अस्ति। यथा अनीयर् प्रत्ययः धातोः भवति तथैव तव्यत्प्रत्ययः अपि धातोः भवति।

उदा – पठ् + तव्यत् = पठितव्यम्

| धातुः | | तव्यत्प्रत्ययान्तं रूपम् |
|---|---|---|
| क्रीड् | → | क्रीडितव्यम् |
| खाद् | → | खादितव्यम् |
| खेल् | → | खेलितव्यम् |

www.thearyasamaj.org

| | | |
|---|---|---|
| कृ | → | कर्तव्यम् |
| चल् | → | चलितव्यम् |
| गम् | → | गन्तव्यम् |
| श्रु | → | श्रोतव्यम् |
| स्मृ | → | स्मर्तव्यम् |
| तॄ | → | तरितव्यम् |
| भ्रम् | → | भ्रमितव्यम् |

➪ अनीयर्प्रत्ययान्तस्य इव तव्यत्प्रत्ययान्तस्य अपि प्रयोगः प्रायः कर्मणिप्रयोगे भावेप्रयोगे च भवति।

| यथा – | कर्मणिप्रयोगः | भावेप्रयोगः |
|---|---|---|
| | रामेण गन्तव्यम्। | धावकेन धावनीयम्। |
| | मया चिन्तनीयम्। | शिशुना हसनीयम्। |
| | लतया मेलितव्यम्। | सिंहेन गर्जनीयम्। |
| | गीतया त्यक्तव्यम्। | भवता न भेतव्यम्। |
| | मनोहरेण वक्तव्यम्। | मया स्थातव्यम्। |
| | बालकेन पठनीयम्। | विद्यार्थिभिः उपवेष्टव्यम्। |
| | माधुर्या खादितव्यम्। | अस्माभिः न पतितव्यम्। |
| | कृषकेण कर्षणीयम्। | केनापि सत्कार्यकरणे न लज्जितव्यम्। |
| | शिष्येण नमनीयम्। | सर्वैः जागरूकैः भवितव्यम्। |

## अभ्यासः

2. अत्र कानिचन वाक्यानि दत्तानि सन्ति। तानि वाक्यानि कर्मणिप्रयोगे तव्यत् –अनीयर्– प्रत्ययौ उपयुज्य उदाहरणानुसारं परिवर्तयत –

| | कर्तरिप्रयोगः | कर्मणिप्रयोगः |
|---|---|---|
| उदा – | **छात्रः पठेत् ।** | **छात्रेण पठनीयम् ।** |
| | 1. बालः पश्येत् । | ................................. । |
| | 2. माता रक्षेत्। | ................................. । |
| | 3. गुरुः व्यवहरेत्। | ................................. । |
| | 4. उमा त्यजेत्। | ................................. । |

www.thearyasamaj.org

5. सुशीला नयेत्। ................................ ।
6. कविः रचयेत्। ................................ ।
7. चिन्तकः चिन्तयेत्। ................................ ।
8. उत्तमः स्मरेत्। ................................ ।
9. भारवाहकः वहेत् ................................ ।
10. लेखकः लिखेत् ................................ ।

➩ 'अनीयर्‌प्रत्ययान्तं तव्यत् प्रत्ययान्तं च विशेषणं भवति। अतः तत् विशेषण-विशेष्ययोः सामान्यं नियमम् अनुसृत्य विशेष्यस्य लिङ्गं विभक्तिं वचनं च अनुसरति।

उदा –

लिङ्गं यथा –

छात्रेण
- पाठः पठनीयः / पठितव्यः। (पुंलिङ्गम्)
- पत्रिका पठनीया / पठितव्या।(स्त्रीलिङ्गम्)
- पुस्तकं पठनीयं / पठितव्यम्।(नपुंसकलिङ्गम्)

वचनं यथा –

कविना
- काव्यं लेखनीयं / लेखितव्यम्। (एकवचनम्)
- काव्ये लेखनीये / लेखितव्ये। (द्विवचनम्)
- काव्यानि लेखनीयानि / लेखितव्यानि। (बहुवचनम्)

विभक्तिः यथा –

त्वया
- करणीयं / कर्तव्यं कार्यम् एतत्। (प्रथमाविभक्तिः)
- करणीयं / कर्तव्यं कार्यं शीघ्रं कुरु।(द्वितीयाविभक्तिः)
- करणीयात् / कर्तव्यात् कार्यात् मा पलाय्यताम्। – (पञ्चमीविभक्तिः)
- करणीयस्य / कर्तव्यस्य कार्यस्य आवलिं कुरु। – (षष्ठीविभक्तिः)
- करणीये / कर्तव्ये कार्ये तव श्रद्धा आवश्यकी। – (सप्तमीविभक्तिः)

www.thearyasamaj.org

3. उचितानि पदानि संयोज्य वाक्यानि रचयत –

भवता

भवत्या

| | |
|---|---|
| पाठाः | वन्दनीया |
| माता | प्रक्षालनीयाः |
| पुस्तकम् | करणीये |
| मन्दिराणि | पालनीयाः |
| गुरुः | क्रेतव्यम् |
| चोराः | गन्तव्यानि |
| मापिके | पठनीयाः |
| शाटिकाः | क्रेतव्ये |
| ज्ञानम् | दण्डनीयाः |
| भाषणे | नमस्करणीयः |
| पुत्राः | अर्जनीयम् |
| परिश्रमः | द्रष्टव्यम् |
| जयः | प्राप्तव्यः |
| चित्रम् | कर्तव्यः |

1. **भवता पाठाः पठनीयाः ।**
2. ..............................................................।
3. ..............................................................।
4. ..............................................................।
5. ..............................................................।
6. ..............................................................।
7. ..............................................................।
8. ..............................................................।
9. ..............................................................।
10. ..............................................................।
11. ..............................................................।
12. ..............................................................।

www.thearyasamaj.org

13. ..........................................................।
14. ..........................................................।
15 ..........................................................।
16. ..........................................................।
17. ..........................................................।
18. ..........................................................।
19. ..........................................................।
20. ..........................................................।
21. ..........................................................।
22. ..........................................................।
23. ..........................................................।
24. ..........................................................।

4. निर्देशानुसारं वाक्यानि परिवर्त्य लिखत –

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| उदा – | सैनिकेन युद्धं करणीयम्। | **सैनिकेन युद्धानि करणीयानि।** |
| | 1. मया उत्तमं चित्रं द्रष्टव्यम्। | ................................ । |
| | 2. मया सत्यवचनम् एव वक्तव्यम्। | ................................ । |
| | 3. भवत्या शिशुः पालनीयः। | ................................ । |
| | 4. ................................ । | त्वया दुर्गुणाः त्यक्तव्याः। |
| | 5. ................................ । | महिलया रङ्गवल्ल्यः निर्मातव्याः। |
| | 6. त्वया पर्वदिने नूतनवस्त्रं धर्तव्यम्। | ................................ । |
| | 7................................. । | मया सुन्दरचित्राणि लेखनीयानि। |
| | 8. सर्वैः सुभाषितं कण्ठस्थीकरणीयम्। | ................................ । |
| | 9. ................................ । | शिक्षकेण पाठाः पाठनीयाः। |
| | 10................................ । | एतया नाटकानि द्रष्टव्यानि। |
| | 11................................ । | भवत्या प्रश्नाः प्रष्टव्याः। |
| | 12. सर्वैः वृक्षः आरोपणीयः। | ................................ । |

www.thearyasamaj.org

| | |
|---|---|
| 13. मया उत्तमलेखः लेखनीयः । | ................................ |
| 14. गौर्या पुष्पं चेतव्यम् । | ................................ |
| 15. ................................ | सर्वैः नद्यः रक्षणीयाः । |
| 16. ................................ | भारतीयैः धेनवः रक्षणीयाः । |
| 17. ................................ | मया उत्तमविचाराः करणीयाः । |
| 18. मया दोषरहितवाक्यं वक्तव्यम् । | ................................ |
| 19. ................................ | मया शिबिराणि चालनीयानि । |
| 20 .शिक्षकेण उत्तमपाठ्यपुस्तकं रचनीयम् । | ................................ |

5. एतेषु वाक्येषु अधोरेखाङ्किताः शब्दाः अशुद्धाः सन्ति । तेषां शुद्धं रूपम् उपयुज्य वाक्यानि लिखत–

उदा – भवान् परिश्रमेण फलं प्राप्तव्यम् ।

**भवता परिश्रमेण फलं प्राप्तव्यम् ।**

1. मया बहवः ग्रन्थाः अध्येतव्यम् ।

................................................................ ।

2. अभिनेत्रा उत्तमः अभिनयः करणीयाः ।

................................................................ ।

3. कार्यकर्ता कष्टानि सोढव्यानि ।

................................................................ ।

4. मनुष्येण परोपकारः करणीया ।

................................................................ ।

5. मया प्रतिदिनं विद्यालयः गन्तव्या ।

................................................................ ।

6. मया श्लोकः वक्तव्यं, पाठः पठनीया, अभ्यासः लेखनीये ।

................................................................ ।

7. त्वया वस्त्रं प्रक्षालनीयानि ।

................................................................ ।

8. वयं सर्वैः समये एव गोष्ठी गन्तव्यम् ।

................................................................ ।

www.thearyasamaj.org

9. अस्माभिः सर्वैः देशसेवा करणीयम् ।

............................................................ ।

10. अस्माभिः ग्रामं ग्रामं गत्वा शिबिराणि चालनीयाः ।

............................................................ ।

11. वयं निरन्तरं संस्कृतेन सम्भाषणं करणीयः ।

............................................................ ।

12. अहं शास्त्रे गहनता प्राप्तव्यम् ।

............................................................ ।

6. एतत् सम्भाषणम् उच्चैः पठत, अत्र उपयुक्तानि अनीयर्प्रत्ययान्तानि, तव्यत्प्रत्ययान्तानि रूपाणि च जानीत –

माता – पुत्रि, अत्र आगच्छतु । अद्य किं किं पठितवती ?

पुत्री – गणितं पठितवती, विज्ञानं पठितवती । चरित्रमपि पठितवती ।

माता – तावदेव पठितवती ?

पुत्री – नैव अम्ब, सङ्गीतमपि पठितवती । अद्य एकं नूतनं गीतम् अपि ज्ञातवती ।

माता – किं तत् गीतम् ?

पुत्री – मनसा सततं स्मरणीयम् । वचसा सततं वदनीयम् । लोकहितं मम करणीयम् ।

माता – समीचीनम् । अस्य गीतस्य अर्थं जानाति किम् ?

पुत्री – आम् अम्ब, अध्यापिका सम्यग् विवृतवती । श्रुत्वा मनसि महान् आनन्दः उत्पन्नः ।

माता – सत्यमेव । शिक्षिका पुनः किम् उक्तवती ?

पुत्री – सा उक्तवती यत् अस्माभिः सर्वैः अपि लोकहितार्थमेव जीवनीयम् । मातापित्रोः वचनं अनुसरणीयम् । सत्यनिष्ठा पालनीया । गुरुः वन्दनीयः, असत्यं कदापि न वक्तव्यम् । साधुसेवा कर्तव्या ..... एवं बहूनि कार्याणि करणीयानि इति सूचितवती ।

माता – सत्यम् एव तया उक्तम् । भवत्या अपि तस्याः वाक्यं परिपालनीयम् । तदर्थं सदा प्रयत्नः करणीयः । अस्तु पाणिपादं प्रक्षाल्य आगच्छतु । अहं चायं दास्यामि । तदनन्तरं पठनम् अनुवर्तयतु ।

पुत्री – अस्तु अम्ब ! तथैव करिष्यामि ।

सूक्तिः – कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि ।

www.thearyasamaj.org

# २८ किं कारणं भवामि मूर्खः ?

शतृप्रत्ययान्तानां प्रयोगः

एतां कथाम् उच्चैः पठत –

भोजराजः धारानगरं **प्रशासन्** आसीत् । परमधार्मिकस्य तस्य कीर्तिः दिशि दिशि **प्रसरन्ती** वर्धते । कालिदासः, अमरसिंहः, घटकर्परः – इत्यादयः महाकवयः स्वीयप्रतिभया भोजराजस्य सभायाः शोभां **वर्धयन्तः** आसन् ।

कदाचित् भोजराजस्य पत्नी स्वीये अन्तःपुरे कयाचित् सख्या साकं सम्भाषणं **कुर्वती** आसीत् । तदा भोजराजः सूचनां विनैव अन्तःपुरं प्राविशत् । सम्भाषणं **कुर्वत्योः** तयोः समीपं गन्तुम् उद्युक्तः च । दूरादेव **आगच्छन्तं** तं दृष्ट्वा शिष्टाचारदक्षा महाराज्ञी "मूर्खराज ! आगम्यताम्" इति अवदत् । अपमानितः महाराजः **क्रुध्यन्** ततः प्रतिनिवृत्तः । पतिव्रतायाः पत्न्याः व्यवहारमेव **चिन्तयन्**, तस्याः वाक्यमेव **स्मरन्** सः खिन्नः जातः । कुतः सा एवम् अवदत् इति सः न अवागच्छत् ।

अथ अन्येद्युः सः प्रातः एव राजसभाम् आगत्य तत्र द्वारे एव **तिष्ठन् आगच्छन्तम्** एकैकम् अपि पण्डितम् "आगम्यतां मूर्ख !" इति **वदन्** स्वागतीकृतवान् । महाराजस्य विचित्रं स्वागतप्रकारं श्रुत्वा सर्वे पण्डिताः विस्मिताः अभवन् । केचन दुःखिताः, अन्ये केचन मौनिनः च **सन्तः** सभां प्राविशन् । महाराजस्य तस्य वचनस्य अभिप्रायः कः स्यात् इति ते सर्वे **चिन्तयन्तः** एव उपाविशन् । किन्तु एकोऽपि न अवगतवान् । तदा एव दूरात् **आगच्छन्तं** कालिदासं दृष्ट्वा ते सर्वे प्रमुदिताः अभवन् । भोजराजस्तु कालिदासमपि "आगम्यतां मूर्ख !" इत्येव स्वागतीकृतवान् ।

तत् श्रुत्वा कालिदासः झटिति एवम् अपृच्छत् –

*__खादन्__ न गच्छामि __हसन्__ न भाषे*
*गतं न शोचामि कृतं न मन्ये ।*
*द्वयोस्तृतीयो न भवामि राजन् !*
*किं कारणं भोज भवामि मूर्खः ॥* इति ।

(अहं खादन् न गच्छामि । हसन् सम्भाषणं न करोमि । यद् गतं तद्विषये शोकं न करोमि । यत् कृतं तद्विषये पुनः पश्चात्तापं न करोमि । एकान्ते सम्भाषणं कुर्वतोः द्वयोः मध्ये न प्रविशामि । एवं स्थिते केन कारणेन अहं मूर्खः भवामि ?)

कालिदासस्य प्रश्नेन एव राजा स्वीयं दोषम् अवागच्छत् । सः तं भृशम् अभ्यनन्दत् । तस्मै उपायनानि च अददात् ।

एतस्यां कथायां स्थूलाक्षरैः मुद्रितानि सर्वाणि पदानि शतृप्रत्ययान्तानि सन्ति ।

www.thearyasamaj.org

एतानि वाक्यानि पठत जानीत च –





रमेशः पठति । रमेशः गच्छति । ⇨ रमेशः पठन् गच्छति ।





लता गायति । लता वीणां वादयति । ⇨ लता गायन्ती वीणां वादयति ।

यानं गच्छति ।
यानं धूमं वमति । ⇨ गच्छत् यानं धूमं वमति ।

एतानि वाक्यानि उच्चैः पठत –

| | |
|---|---|
| 1. छात्रः पाठं लिखति, चिन्तयति । | छात्रः पाठं **लिखन्** चिन्तयति । |
| 2. बालकः क्रीडति, मित्रम् आह्वयति । | बालकः **क्रीडन्** मित्रम् आह्वयति । |
| 3. भीमः प्रतिज्ञां स्मरति, दुर्योधनं ताडयति । | भीमः प्रतिज्ञां **स्मरन्** दुर्योधनं ताडयति । |
| 4. वृद्धः मार्गं पश्यति, गच्छति । | वृद्धः मार्गं **पश्यन्** गच्छति । |
| 5. वाल्मीकिः स्नानाय गच्छति, क्रौञ्चं पश्यति । | वाल्मीकिः स्नानाय **गच्छन्** क्रौञ्चं पश्यति । |
| 6. शिक्षकः लिखति, पाठयति । | शिक्षकः **लिखन्** पाठयति । |
| 7. नर्तकी नृत्यति, गीतं गायति । | नर्तकी **नृत्यन्ती** गीतं गायति । |
| 8. महिला वस्त्राणि क्षालयति, भाषते । | महिला वस्त्राणि **क्षालयन्ती** भाषते । |
| 9. विमानं गच्छति, शब्दं करोति । | विमानं **गच्छत्** शब्दं करोति । |
| 10. यन्त्रं चलति, कार्यं करोति । | यन्त्रं **चलत्** कार्यं करोति । |

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि 'लिखन्, क्षालयन्ती, चलत्' – इत्यादीनि 'शतृ'प्रत्ययान्तानि रूपाणि ।

www.thearyasamaj.org

## अवधेयम्

वर्तमानकालार्थे परस्मैपदिधातूनां 'शतृ' प्रत्ययः भवति। 'शतृ' इत्यत्र 'अत्' भागः अवशिष्यते। शतृयोगात् शत्रन्तं प्रातिपदिकं सिद्ध्यति। विशेषणरूपेण शत्रन्तस्य प्रयोगः भवति। अतः एतस्य रूपाणि त्रिषु लिङ्गेषु अपि भवन्ति।

यथा –

पश्यति → पश्यन् (पुंलिङ्गम्)
पश्यति → पश्यन्ती (स्त्रीलिङ्गम्)
पश्यति → पश्यत् (नपुंसकलिङ्गम्)

➪ शतृप्रत्ययान्तस्य पुंलिङ्गरूपाणि एवं भवन्ति –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| *प्रथमाविभक्तिः* | गच्छन् | गच्छन्तौ | गच्छन्तः |
| *द्वितीयाविभक्तिः* | गच्छन्तम् | गच्छन्तौ | गच्छतः |
| *तृतीयाविभक्तिः* | गच्छता | गच्छद्भ्याम् | गच्छद्भिः |
| *चतुर्थीविभक्तिः* | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः |
| *पञ्चमीविभक्तिः* | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः |
| *षष्ठीविभक्तिः* | गच्छतः | गच्छतोः | गच्छताम् |
| *सप्तमीविभक्तिः* | गच्छति | गच्छतोः | गच्छत्सु |

## अभ्यासः

1. रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | वदन् | वदन्तौ | वदन्तः |
| *द्वितीयाविभक्तिः* | ........... | ........... | ........... |
| *तृतीयाविभक्तिः* | ........... | वदद्भ्याम् | वदद्भिः |
| *चतुर्थीविभक्तिः* | ........... | ........... | ........... |
| *पञ्चमीविभक्तिः* | ........... | ........... | वदद्भ्यः |
| *षष्ठीविभक्तिः* | वदतः | ........... | ........... |
| *सप्तमीविभक्तिः* | ........... | ........... | ........... |

www.thearyasamaj.org

➪ शतृप्रत्ययान्तस्य स्त्रीलिङ्गरूपाणि एवं भवन्ति –

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| *द्वितीयाविभक्तिः* | गच्छन्तीम् | गच्छन्त्यौ | गच्छन्तीः |
| *तृतीयाविभक्तिः* | गच्छन्त्या | गच्छन्तीभ्याम् | गच्छन्तीभिः |
| *चतुर्थीविभक्तिः* | गच्छन्त्यै | गच्छन्तीभ्याम् | गच्छन्तीभ्यः |
| *पञ्चमीविभक्तिः* | गच्छन्त्याः | गच्छन्तीभ्याम् | गच्छन्तीभ्यः |
| *षष्ठीविभक्तिः* | गच्छन्त्याः | गच्छन्त्योः | गच्छन्तीनाम् |
| *सप्तमीविभक्तिः* | गच्छन्त्याम् | गच्छन्त्योः | गच्छन्तीषु |

**अभ्यासः**

2. रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | लिखन्ती | लिखन्त्यौ | लिखन्त्यः |
| *द्वितीयाविभक्तिः* | ........... | ........... | ........... |
| *तृतीयाविभक्तिः* | लिखन्त्या | ........... | ........... |
| *चतुर्थीविभक्तिः* | ........... | ........... | ........... |
| *पञ्चमीविभक्तिः* | ........... | लिखन्तीभ्यां | ........... |
| *षष्ठीविभक्तिः* | ........... | ........... | ........... |
| *सप्तमीविभक्तिः* | ........... | ........... | ........... |

➪ शतृप्रत्ययान्तस्य नपुंसकलिङ्गरूपाणि एवं भवन्ति –

| | | | |
|---|---|---|---|
| *प्रथमाविभक्तिः* | गच्छत् | गच्छती | गच्छन्ति |
| *द्वितीयाविभक्तिः* | गच्छत् | गच्छती | गच्छन्ति |
| *तृतीयाविभक्तिः* | ........... | ........... | ........... |
| *चतुर्थीविभक्तिः* | ........... | ........... | ........... |
| *पञ्चमीविभक्तिः* | ........... | ........... | ........... |
| *षष्ठीविभक्तिः* | ........... | ........... | ........... |
| *सप्तमीविभक्तिः* | ........... | ........... | ........... |

www.thearyasamaj.org

## अभ्यासः

3. अधः दत्तानां क्रियापदानां शत्रन्तरूपाणि लिखत –

| | | | | |
|---|---|---|---|---|
| यथा – पठति | ➡ | पठन् (पुं.) | पठन्ती (स्त्री.) | पठत् (नपुं.) |
| 1. नयति | ➡ | ............ | ............ | ............ |
| 2. इच्छति | ➡ | ............ | ............ | ............ |
| 3. तिष्ठति | ➡ | ............ | ............ | ............ |
| 4. खादति | ➡ | ............ | ............ | ............ |
| 5. त्यजति | ➡ | ............ | ............ | ............ |
| 6. पश्यति | ➡ | ............ | ............ | ............ |
| 7. नमति | ➡ | ............ | ............ | ............ |
| 8. हसति | ➡ | ............ | ............ | ............ |
| 9. पृच्छति | ➡ | ............ | ............ | ............ |
| 10. चिन्तयति | ➡ | ............ | ............ | ............ |

**विशेषक्रियापदानि**

| | | (पुं.) | (स्त्री.) | (नपुं.) |
|---|---|---|---|---|
| ददाति | ➡ | ददत् | ददती | ददत् |
| बिभेति | ➡ | बिभ्यत् | बिभ्यती | बिभ्यत् |
| करोति | ➡ | कुर्वन् | कुर्वती | कुर्वत् |
| शृणोति | ➡ | शृण्वन् | शृण्वती | शृण्वत् |
| शक्नोति | ➡ | शक्नुवन् | शक्नुवती | शक्नुवत् |
| आप्नोति | ➡ | आप्नुवन् | आप्नुवती | आप्नुवत् |
| चिनोति | ➡ | चिन्वन् | चिन्वती | चिन्वत् |
| जानाति | ➡ | जानन् | जानती | जानत् |
| क्रीणाति | ➡ | क्रीणन् | क्रीणती | क्रीणत् |
| अश्नाति | ➡ | अश्नन् | अश्नती | अश्नत् |
| बध्नाति | ➡ | बध्नन् | बध्नती | बध्नत् |
| रोदिति | ➡ | रुदन् | रुदती | रुदत् |

www.thearyasamaj.org

➪ एतेषु वाक्येषु शतृप्रत्ययान्तानां रूपाणां प्रयोगः विभिन्नासु विभक्तिषु कृतः अस्ति। तानि सावधानं पठत, अवगच्छत च –

1. अहं विद्यालयं गच्छन्तं छात्रं मार्गं पृच्छामि।
2. रमेशः ओदनं पचन्तीं भगिनीं प्रशंसति।
3. शिक्षिका क्रीडतः बालकान् आह्वयति।
4. यात्रिकाः जले तरन्तीः नौकाः पश्यन्ति।
5. माता क्रीडता बालकेन सह सम्भाषणं करोति।
6. विद्यालयं गच्छन्त्या छात्रया गीतं गीयते।
7. अग्रजः हसते बालकाय मोदकं ददाति।
8. पूजकः देवं प्रणमद्भ्यः भक्तेभ्यः प्रसादं वितरति।
9. भवती लिखन्तीभ्यः छात्राभ्यः दुग्धं ददातु।
10. लिखते गोविन्दाय लेखनी रोचते।
11. शास्त्रं बोधयद्भ्यः गुरुभ्यः नमः।
12. सैनिकः धावतः अश्वात् पतति।
13. चोराः अनुधावद्भ्यः आरक्षकेभ्यः बिभ्यति।
14. पुत्र ! अत्र आगच्छन्त्याः शाकविक्रेत्र्याः कर्कटीं क्रीणातु ।
15. एषः विद्याालयं गच्छतः बालकस्य स्यूतः अस्ति।
16. सङ्गीतशालां गच्छन्तीनां बालिकानां हस्ते वीणाः सन्ति।
17. न्यायालये वदताम् अधिवक्तॄणां युतकानि कृष्णानि वर्तन्ते।
18. पठत्सु बालकेषु रमेशः चतुरः अस्ति।
19. चरन्तीषु धेनुषु कपिला अधिकं दुग्धं ददाति।
20. शिशुः दुग्धं पाययन्त्यां मातरि स्निह्यति।

www.thearyasamaj.org

## अभ्यासः

4. उचितानि शतृप्रत्ययान्तरूपाणि उपयुज्य अधोलिखितानि वाक्यानि परिवर्तयत –

उदा – छात्रः मातरं स्मरति।
छात्रः पत्रं लिखति। **छात्रः मातरं स्मरन् पत्रं लिखति।**

1. अग्रजा पुस्तकं पठति।
अग्रजा विद्यालयं गच्छति। ..........................................।
2. महिलाः वार्तालापं कुर्वन्ति।
महिलाः मन्दिरं गच्छन्ति। ..........................................।
3. कुक्कुरः भषति।
बालकः कुक्कुरं भोजयति। ..........................................।
4. मालती उद्यानं गच्छति।
मालत्यै पुष्पं रोचते। ..........................................।
5. चोराः धावन्ति।
आरक्षकाः चोरान् गृह्णन्ति। ..........................................।
6. लोकयानं तिष्ठति।
बालकः लोकयानात् अवतरति। ..........................................।
7. सुभाषः पर्वतम् आरोहति।
सुभाषस्य साहसं पश्यतु। ..........................................।
8. महिलाः शाटिकां क्रीणन्ति।
महिलानां समीपे धनं वर्तते। ..........................................।
9. सागरे नौकाः तरन्ति।
रक्तनौका शोभते। ..........................................।
10. सज्जनाः सत्यं वदन्ति।
नारयणः सज्जनेषु अन्यतमः अस्ति।..........................................।
11. शिवः नृत्यति।
शिवः डमरुं वादयति। ..........................................।

www.thearyasamaj.org

5. कोष्ठके लिखितेभ्यः क्रियापदेभ्यः उचितं शत्रन्तं पदं निर्माय रिक्तस्थानं पूरयत –

उदा – माला विद्यालयं गच्छति। पिता आशिषं ददाति। ➡ गच्छति

**विद्यालयं गच्छन्त्यै मालायै पिता आशिषं ददाति।**

1. नटः अभिनयति। दर्शकाः प्रशंसन्ति। ➡ अभिनयति

..................................................।

2. भीमः रणाङ्गणे गदां भ्रामयति। भटाः बिभ्यति। ➡ भ्रामयति

..................................................।

3. नदी वेगेन प्रवहति। मकराः बहिः निर्गच्छन्ति। ➡ प्रवहति

..................................................।

4. राष्ट्रभक्ताः राष्ट्रहितं चिन्तयन्ति। सर्वे आद्रियन्ते। ➡ चिन्तयति

..................................................।

5. सज्जनाः धर्मम् आचरन्ति। एषः व्यवहारः अस्ति। ➡ आचरति

..................................................।

6. मम अग्रजा संस्कृतं पाठयति। तस्याम् अहं स्निह्यामि। ➡ पाठयति

..................................................।

7. सिंहः गर्जति। भयं मास्तु। ➡ गर्जति

..................................................।

8. यानं शब्दं करोति। यात्रिकाः उपविशन्ति। ➡ करोति

..................................................।

9. सेविकाः द्वारम् उद्घाटयन्ति। भवान् मार्गं पृच्छतु। ➡ उद्घाटयति

..................................................।

10. जलं घटात् स्रवति। वानराः जलं पिबन्ति। ➡ स्रवति

..................................................।

11. रामः वचनं पालयति। अहं रामं नमामि। ➡ पालयति

..................................................।

12. पुत्री खाद्यम् इच्छति। पिता पुत्र्यै दापयति। ➡ इच्छति

..................................................।

www.thearyasamaj.org

6. अधोलिखितानां शत्रन्तपदानाम् उपयोगेन विविधानि वाक्यानि रचयत –

| | | | |
|---|---|---|---|
| गच्छद्भ्यः | स्मरन्त्याम् | गृह्णन् | प्रविशताम् |
| पठति | लिखन्त्यौ | रचयतः | कुर्वतीषु |
| पश्यद्भ्यः | धावताम् | इच्छन्तीनाम् | आगच्छन्त्यः |
| गायते | रक्षन्तीभ्यः | नृत्यन्तीभ्याम् | क्रीडतोः |
| स्मरन्तम् | चरन्तीः | वदन्तीभिः | कूजताम् |

1. ग्रन्थं रचयतः कवेः कौशलम् असदृशम् ।
2. ............................................................ ।
3. ............................................................ ।
4. ............................................................ ।
5. ............................................................ ।
6. ............................................................ ।
7. ............................................................ ।
8. ............................................................ ।
9. ............................................................ ।
10. ............................................................ ।
11. ............................................................ ।
12. ............................................................ ।
13. ............................................................ ।
14. ............................................................ ।
15. ............................................................ ।
16. ............................................................ ।
17. ............................................................ ।
18. ............................................................ ।
19. ............................................................ ।
20. ............................................................ ।

www.thearyasamaj.org

7. क्रियापदस्य उचितं शत्रन्तं रूपम् उपयुज्य वाक्यानि लिखत –

गणेशः

| | |
|---|---|
| गच्छति | – बालकम् आह्वयति । |
| गायति | – लतायाः भ्राता । |
| पठति | – बालाभ्यां मोदकं ददाति । |
| नृत्यति | – मयूरान् पश्यति । |
| स्निह्यति | – मातरि स्निह्यति । |
| तिष्ठति | – यानात् अवतरति । |
| आह्वयति | – मित्रैः साकं गच्छति । |
| क्रीडति | – छात्राणां सुहृद् । |
| आगच्छति | – जनेभ्यः स्वागतं व्याहरति। |
| पृच्छति | – भगिन्यै क्रुध्यति । |
| पाठयति | – आचार्यान् वन्दते । |

1. **गणेशः गच्छन्तं बालकम् आह्वयति ।**
2. ..........................................................।
3. ..........................................................।
4. ..........................................................।
5. ..........................................................।
6. ..........................................................।
7. ..........................................................।
8. ..........................................................।
9. ..........................................................।
10. ..........................................................।
11. ..........................................................।
12. ..........................................................।

www.thearyasamaj.org

➪ अधोलिखितं संवादं पठित्वा संवादे प्रयुक्तानां शतृप्रत्ययान्तपदानां परिचयं प्राप्नुत –

सुचित्रा – अम्ब ! महती बुभुक्षा ।

माता – बहिः मुखं क्षालयन्तं विनीतम् आह्वय । अहं द्वयोः कृते भोजनं परिवेषयामि ।

विनीतः – अम्ब ! अहं शीघ्रमेव आगच्छन् अस्मि ।

माता – तव पिता इतोऽपि न आगतः । सः अपि विलम्बं कुर्वन् अस्ति ।

सुचित्रा – प्रभाते प्राङ्गणे पाठं लिखन्ती अहं, तं त्वरया गच्छन्तं दृष्टवती । अद्य कश्चित् विशेषः अस्ति किम् ?

विनीतः – अहम् अपि पितरं प्रातः आरभ्य बहुषु कार्येषु त्वरां कुर्वन्तं दृष्टवान् ।

माता – सत्यम् । अद्य विद्यालये कश्चित् कार्यक्रमः प्रचलन् अस्ति । तत्र तव पिता उत्तमं गायद्भ्यः छात्रेभ्यः पारितोषिकं दास्यति । अपि च संस्कृतेन सम्भाषणं कुर्वतीनां विद्यार्थिनीनां प्रवासम् आयोजयिष्यति ।

सुचित्रा – प्रतिदिनं शिशुमन्दिरं गच्छन्त्यै मह्यं किं दास्यति ? पुनः कदाचित् विद्यालयं गच्छते विनीताय किं दास्यति ?

विनीतः – अस्तु । भवती परिवेषयन्तीं मातरं पश्यतु ।

सुचित्रा – भवान् अपि चषकात् पतत् जलं वारयतु ।

विनीतः – भवती आम्ररसम् अधः पातयन्ती मा पिबतु ।

माता – अलं कलहेन । अहम् उष्णां रोटिकां ददती अस्मि । उत्तमाः बालकाः खादन्तः कलहं न कुर्वन्ति ।

➪ एते पद्ये उच्चैः पठत, अत्र प्रयुक्तानि शत्रन्तानि रूपाणि जानीत च ।

गच्छन् पिपीलको याति योजनानां शतान्यपि ।<br>
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते<br>
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।<br>
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते<br>
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

सूक्तिः – अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।

www.thearyasamaj.org

# सर्पाणां कुतः कर्णौ न भवतः ? २७

शानच्प्रत्ययान्तानां प्रयोगः

एतां लोककथाम् उच्चैः पठत –



एकदा भगवान् विष्णुः आदिशेषस्य उपरि **शयानः** आसीत् । तदा देवर्षिः नारदः विष्णोः स्तुतिं **कुर्वाणः** तत्र आगतः । भगवतः विष्णोः नामस्मरणं श्रुत्वा आदिशेषः **स्मयमानः** जातः । आनन्देन तस्य शिरः अपि स्वयमेव **कम्पमानम्** अभवत्। आदिशेषस्य शिरःकम्पनेन तदुपरि **विद्यमाना** पृथिवी अपि **कम्पमाना** जाता । एतेन भीता भूदेवी विष्णोः समीपम् आगच्छत् ।

भगवन्तं **नमस्कुर्वाणा** सा अवदत् – ''भगवन् ! आदिशेषस्य उपरि एवं भवान् **शयानः** अस्ति । अहमपि एतस्य उपरि **आसीना** अस्मि । भवतः दर्शनाय आगतः नारदः यदा भवन्तं स्तौति तदा तत् श्रुत्वा सन्तुष्टस्य एतस्य शिरः **कम्पमानं** भवति । तेन तदुपरि **वर्तमानं** जगत् अपि **कम्पमानं** भवति । अतः सर्वेषां जीविनां कष्टं भवति । भवान् एव एतस्याः समस्यायाः परिहारं करोतु'' इति ।

एवं **खिद्यमानायाः** भूदेव्याः वचनं श्रुत्वा विष्णुः चिन्तामग्नः जातः । 'सर्वदा मां **भजमानं** नारदं मम स्तुतिं न करोतु इति वक्तुं न शक्नोमि । यतः मम स्तुतिम् **अकुर्वाणः** सः क्षणमपि न जीवति' इति विचिन्त्य सः नारदेन सह एव समालोचनम् अकरोत् । अन्ते तौ निर्णीतवन्तौ यत् आदिशेषस्य श्रवणशक्तिः नाशनीया इति । आदिशेषः यदा एतं विषयम् अजानात् तदा सः भृशम् अखिद्यत । विष्णुं **प्रार्थयमानः** सः अवदत् – ''भगवन् ! भवतः नाम अश्रुत्वा अहं निमेषमपि जीवितुं नैव शक्नोमि । कृपया मां तस्मात् भाग्यात् वञ्चितं मा करोतु'' इति ।

तस्य दुःखं **मन्यमाना** देवी लक्ष्मीः एवम् अवदत् – ''इतःपरं भूलोके विष्णुस्तुतिः अधिका भविष्यति । यदा भूमौ किञ्चित् चलनं दृश्यते तदा भवान् विष्णुस्तुतेः अनुभवं स्पर्शज्ञानद्वारा ज्ञातुं प्रभवति । अधुना भवान् यत् कर्णाभ्यां शृणोति तत् इतःपरं स्पर्शद्वारा ज्ञातुं प्रभवति'' इति ।

आदिशेषः तत् अङ्गयकरोत् । तदा आरभ्य सर्पाणां कर्णौ न भवतः ।

www.thearyasamaj.org

➪ एतानि वाक्यानि सावधानं परिशीलयत –

चन्द्रः **शोभमानः** अस्ति। शिशुः **वर्धमानः** अस्ति।
युवा **मोदमानः** अस्ति। सैनिकः **युद्ध्यमानः** अस्ति।
लता **कम्पमाना** अस्ति। एषा **लज्जमाना** अस्ति।
पूजा **प्रवर्तमाना** अस्ति। निद्रा **बाधमाना** अस्ति।
नक्षत्रं **प्रकाशमानम्** अस्ति। मित्रं स्पर्ध**मानम्** अस्ति।

एतेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि शानच्प्रत्ययान्तानि रूपाणि सन्ति। आत्मनेपदिनां धातूनां वर्तमानकालार्थे शानच्प्रत्ययः भवति। (परस्मैपदिधातूनां शतृप्रत्ययः भवति इति पूर्वतने पाठे वयं ज्ञातवन्तः एव।) शानजन्तानां प्रयोगः अपि विशेषणरूपेण भवति। अतः एतेषाम् अपि रूपाणि त्रिषु लिङ्गेषु भवन्ति।

यथा –

प्रवर्तमान → प्रवर्तमानः कार्यक्रमः (पुंलिङ्गम्)
प्रवर्तमान → प्रवर्तमाना सभा (स्त्रीलिङ्गम्)
प्रवर्तमान → प्रवर्तमानं सत्रम् (नपुंसकलिङ्गम्)

**शानजन्तरूपाणि –पुंलिङ्गे रामवत्, स्त्रीलिङ्गे – लतावत्, नपुंसकलिङ्गे फलवत् भवन्ति।**

उदाहरणानुसारम् एतेषां शानजन्तरूपाणि लिखत –

| | | | | | | |
|---|---|---|---|---|---|---|
| वन्दते | – | वन्द् | + | शानच् | → | वन्दमान |
| वर्धते | – | .......... | + | .......... | → | .......... |
| कम्पते | – | .......... | + | .......... | → | .......... |
| एधते | – | .......... | + | .......... | → | .......... |
| मोदते | – | .......... | + | .......... | → | .......... |
| सेवते | – | .......... | + | .......... | → | .......... |
| लभते | – | .......... | + | .......... | → | .......... |
| विद्यते | – | .......... | + | .......... | → | .......... |
| शोभते | – | .......... | + | .......... | → | .......... |
| स्पर्धते | – | .......... | + | .......... | → | .......... |
| ईक्षते | – | .......... | + | .......... | → | ईक्षमाण |
| भाषते | – | .......... | + | .......... | → | .......... |

www.thearyasamaj.org

## अभ्यासः

1. अधोलिखितानि वाक्यानि शानजन्तप्रयोगेण परिवर्तयत –

| | |
|---|---|
| 1. शिशुः निरीक्षते। | **शिशुः निरीक्षमाणः अस्ति ।** |
| 2. शाखा कम्पते। | ........................................। |
| 3. मित्रं वर्धते। | ........................................। |
| 4. चोरौ विवदेते। | ........................................। |
| 5. सः भारं सहते। | ........................................। |
| 6. मातृस्वसा खिद्यते। | ........................................। |
| 7. चित्रकारः प्रयतते। | ........................................। |
| 8. लेखकाः स्पर्धन्ते। | ........................................। |
| 9. पक्षिणः उड्डयन्ते। | ........................................। |
| 10. लेखनी वर्तते। | ........................................। |
| 11. पाठः अनुवर्तते। | ........................................। |
| 12. रामः सभायां विराजते। | ........................................। |

2. पठत, अवगच्छत, शानच्प्रत्ययान्तपदानि चित्वा लिखत च –

| | |
|---|---|
| 1. प्लवते | यात्रिकाः प्लवमानायां नौकायाम् उपविष्टवन्तः। |
| 2. शेते | माता शयानं शिशुं दोलयति। |
| 3. परीक्षते | छात्रः परीक्षमाणान् शिक्षकान् प्रश्नं पृच्छति। |
| 4. प्रतीक्षते | द्वारे प्रतीक्षमाणेभ्यः भिक्षुकेभ्यः अन्नं देहि। |
| 5. कुरुते | गङ्गा स्नानं कुर्वाणानां भक्तानां पापानि हरति। |
| 6. सेवते | शिवं सेवमाना पार्वती प्रसीदति। |
| 7. याचते | पुस्तकं याचमानां प्रियंवदां वन्दना आह्वयति। |
| 8. डयते | डयमानं विमानं दृष्ट्वा बालकाः मोदन्ते। |
| 9. त्वरते | त्वरमाणैः यात्रिकैः धावनं कृतम्। |
| 10. विद्यते | शिबिरे विद्यमानाभिः सेविकाभिः अपि संस्कृतम् ज्ञातम्। |
| 11. कुरुते | नमस्कारं कुर्वाणाभ्यः तपस्विनीभ्यः ऋषिः वरं दत्तवान्। |
| 12. लम्बते | सूत्रे लम्बमानेभ्यः वस्त्रेभ्यः जलं स्रवति। |

www.thearyasamaj.org

13. कम्पते कम्पमानेभ्यः वृक्षेभ्यः जलबिन्दवः निपतन्ति।
14. अधीते संस्कृतम् अधीयानानां महिलानां सङ्ख्या न्यूना नास्ति।

शानच्प्रत्ययान्तपदानि –

| | |
|---|---|
| 1. ........................ | 2. ........................ |
| 3. ........................ | 4. ........................ |
| 5. ........................ | 6. ........................ |
| 7. ........................ | 8. ........................ |
| 9. ........................ | 10. ........................ |
| 11. ........................ | 12. ........................ |
| 13. ........................ | 14. ........................ |

➪ एतानि वाक्यानि उच्चैः पठत –

1. सैनिकः युद्ध्यते।
   सैनिकः जयति। > युद्ध्यमानः सैनिकः जयति।
2. बालकाः मोदन्ते।
   बालकाः स्नान्ति। > मोदमानाः बालकाः स्नान्ति।
3. कन्या लज्जते।
   कन्या जलं ददाति। > लज्जमाना कन्या जलं ददाति।
4. भृत्यः भारं सहते।
   भृत्यः चलति। > भारं सहमानःभृत्यः चलति।
5. शठः मधुरं भाषते।
   शठः धनं हरति। > मधुरं भाषमाणः शठः धनं हरति।
6. जलयानं सागरे प्लवते।
   जलयानं सागरे निमज्जति। > प्लवमानं जलयानं सागरे निमज्जति।
7. दम्पती शिवं वन्देते।
   दम्पती पुष्पाणि अर्पयतः। > शिवं वन्दमानौ दम्पती पुष्पाणि अर्पयतः।
8. पुत्र्यौ मातरं सेवेते।
   पुत्र्यौ सन्तोषं प्राप्नुतः। > मातरं सेवमाने पुत्र्यौ सन्तोषं प्राप्नुतः।

www.thearyasamaj.org

| विशेषरूपाणि – | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| अधीते (अधि +इ) | अधीयानः | अधीयाना | अधीयानम् |
| शेते (शी) | शयानः | शयाना | शयानम् |
| विक्रीणीते (वि +क्री) | विक्रीणानः | विक्रीणाना | विक्रीणानम् |
| कुरुते(कृ) | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| जानीते(ज्ञा) | जानानः | जानाना | जानानम् |
| ब्रूते(ब्रू) | ब्रुवाणः | ब्रुवाणा | ब्रुवाणम् |
| भुङ्क्ते(भुज) | भुञ्जानः | भुञ्जाना | भुञ्जानम् |
| मनुते(मन्) | मन्वानः | मन्वाना | मन्वानम् |
| आस्ते (आस) | आसीनः | आसीना | आसीनम् |
| प्रयुङ्क्ते (प्र + युज्) | प्रयुञ्जानः | प्रयुञ्जाना | प्रयुञ्जानम् |

## अभ्यासः

3. अधोलिखितानि वाक्यानि उदाहरणानुगुणं परिवर्तयत –

उदा –

1. ज्वरः वर्धते।
   भवान् ज्वरं निवारयतु। > **भवान् वर्धमानं ज्वरं निवारयतु।**
2. अर्जुनः युद्ध्यते।
   कृष्णः अर्जुनस्य सारथिः अस्ति। > ........................................।
3. वाणिजः शाकं विक्रीणीते।
   वाणिजः संस्कृतं वदति। > ........................................।
4. नक्षत्रे प्रकाशेते।
   वैज्ञानिकाः अवलोकन्ते। > ........................................।
5. सुवर्णकारः सुवर्णं परीक्षते।
   सुवर्णकारात् आभरणं स्वीकरोतु। > ........................................।
6. आतपः मां बाधते।
   अहम् आतपात् दूरं गच्छामि। > ........................................।

www.thearyasamaj.org

7. विद्यार्थिन्यौ स्पर्धेते। विद्यार्थिनीभ्यां पेयं प्रेषयतु। > ........................................ ।

8. जनाः आरोग्यं कामयन्ते। जनैः सूर्योपासना क्रियते। > ........................................ ।

9. समस्या वर्तते। बुद्धिमान् समस्यायाः न पलायते। > ........................................ ।

10. दिलीपः नन्दिनीं सेवते। नन्दिनी वरं ददाति। > ........................................ ।

11. भीमः व्यायामं कुरुते। घटोत्कचः भीमम् आह्वयति। > ........................................ ।

12. सुरेशः भुङ्क्ते। राकेशः स्मरति। > ........................................ ।

4. विशेष्यानुसारं शानजन्तरूपाणि योजयित्वा वाक्यानि रचयत –

उदा – शिष्यः वन्दते। तं गुरुः अभिनन्दति।
**वन्दमानं शिष्यं गुरुः अभिनन्दति ।**

1. बालिका नाटकं वीक्षते। तया निद्रा कृता।
........................................................................ ।
2. आरक्षकाः चोरं गृह्णते। तान् सर्वे प्रशंसन्ति।
........................................................................ ।
3. सः सम्यक् काव्यम् अधीते। तस्य ज्ञानं वर्धते।
........................................................................ ।
4. ताः नृत्यं कुर्वते। भवती ताभ्यः पानकं ददातु।
........................................................................ ।
5. छात्राः प्रथमस्थानाय स्पर्धन्ते। तेषु कः प्रथमस्थानं प्राप्नुयात् ?
........................................................................ ।
6. कपयः वृक्षेषु कूर्दन्ते। भवती तान् वीक्षताम्।
........................................................................ ।

www.thearyasamaj.org

7. वृष्टिः नितरां वर्धते । तस्यां मा क्रीडत ।

............................................................ ।

8. शिशुः तल्पे शेते । तं मा जागरयत ।

............................................................ ।

9. युद्धात् भीरवः पलायन्ते । तेषां हननं न श्रेयसे ।

............................................................ ।

10. माता पुत्रं प्रतीक्षते । तस्याः मुखे उत्कण्ठा दृश्यते ।

............................................................ ।

11. दुर्जनाः वृथा विवदन्ते । तेभ्यः दूरं गच्छत ।

............................................................ ।

12. ते वाक्यानि सम्यक् प्रयुञ्जते । तेभ्यः किं ददानि ?

............................................................ ?

13. यशोदा कृष्णम् उलूखले बध्नीते । तां गोप्यः आह्वयन्ति ।

............................................................ ।

14. ते गुरुम् आद्रियन्ते । तेषु उत्साहः दृश्यते ।

............................................................ ।

15. सैनिकाः धैर्येण युद्ध्यन्ते । तैः देशः रक्षितः ।

............................................................ ।

16. ताः सत्यमेव ब्रुवते । तासु सर्वे स्निह्यन्ति ।

............................................................ ।

17. निरीक्षकाः परीक्षां निरीक्षन्ते । तेभ्यः छात्राः बिभ्यति ।

............................................................ ।

18. युवकः वृद्धान् सेवते । तस्य साहाय्यं कुर्मः ।

............................................................ ।

19. आकाशे नक्षत्राणि द्योतन्ते । तानि बालाः वीक्षन्ते ।

............................................................ ।

20. सा नितरां खिद्यते । तां सख्यः सान्त्वयन्ति ।

............................................................ ।

www.thearyasamaj.org

कथान्तर्गतानि शानजन्तानि एतानि वाक्यानि परिशीलयत –

विष्णुः आदिशेषस्य उपरि **शयानः** आसीत्।
नारदः विष्णोः स्तुतिं **कुर्वाणः** तत्र आगतः।
नामस्मरणं श्रुत्वा आदिशेषः **स्मयमानः** जातः।
तस्य शिरः अपि स्वयमेव **कम्पमानम्** अभवत्।
तदुपरि **विद्यमाना** पृथिवी अपि कम्पमाना जाता।
भगवन्तं **नमस्कुर्वाणा** सा अवदत्।
**खिद्यमानायाः** भूदेव्याः वचनं श्रुत्वा विष्णुः चिन्तामग्नः जातः।
मम स्तुतिम् **अकुर्वाणः** सः क्षणमपि न जीवति।

4. अत्र पाठे दत्तानां शानजन्तानां शब्दानां त्रिषु लिङ्गेषु रूपाणि लिखत –

| | | | | | |
|---|---|---|---|---|---|
| यथा – | शयान | ➡ | **शयानः** | **शयाना** | **शयानम्** |
| | कुर्वाण | ➡ | ............ | ............ | ............ |
| | कम्पमान | ➡ | ............ | ............ | ............ |
| | विद्यमान | ➡ | ............ | ............ | ............ |
| | स्मयमान | ➡ | ............ | ............ | ............ |
| | वर्तमान | ➡ | ............ | ............ | ............ |
| | भजमान | ➡ | ............ | ............ | ............ |
| | खिद्यमान | ➡ | ............ | ............ | ............ |
| | प्रार्थयमान | ➡ | ............ | ............ | ............ |
| | मन्यमान | ➡ | ............ | ............ | ............ |

5. एतस्य क्रियापदस्य उचितस्य शानजन्तरूपस्य पुरतः (✔) चिह्नं लिखत –

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| उदा – लम्बते | ➡ | लम्बान | ☐ | लम्बमानः | ✔ | लम्बन् | ☐ |
| 1. सेवते | ➡ | सेवन् | ☐ | सेवमानः | ☐ | सेवानः | ☐ |
| 2. शेते | ➡ | शयानः | ☐ | शयमानः | ☐ | शयन् | ☐ |
| 3. स्मयते | ➡ | स्मयानः | ☐ | स्मयन् | ☐ | स्मयमानः | ☐ |
| 4. कुरुते | ➡ | कुर्वाणः | ☐ | कुरवाणः | ☐ | करमाणः | ☐ |

www.thearyasamaj.org

| | | | | | | |
|---|---|---|---|---|---|---|
| 5. अधीते ➡ | अधीयानः | ☐ | अधीयमानः | ☐ | अधियानः | ☐ |
| 6. शोभते ➡ | शोभानः | ☐ | शोभमानः | ☐ | शुभमानः | ☐ |
| 7. मन्यते ➡ | मनुमानः | ☐ | मन्यानः | ☐ | मन्यमानः | ☐ |
| 8. खिद्यते ➡ | खिद्यमानः | ☐ | खिद्यानः | ☐ | खिदमानः | ☐ |
| 9. कम्पते ➡ | कम्पानः | ☐ | कम्पमानः | ☐ | कम्पयानः | ☐ |
| 10. ऊहते ➡ | ऊहमानः | ☐ | ऊहानः | ☐ | ऊह्वानः | ☐ |

6. एतानि वाक्यानि बहुवचने परिवर्तयत –

1. शिशुः शयानः अस्ति। **शिशवः शयानाः सन्ति ।**
2. भक्तः देवं सेवमानः अस्ति। ........................................... ।
3. छात्रा अधीयाना अस्ति। ........................................... ।
4. अहं प्रतीक्षमाणः भवामि। ........................................... ।
5. त्वं त्वरमाणः असि। ........................................... ।
6. भवान् वर्धमानः भवतु। ........................................... ।
7. भवती सर्वदा यतमाना भवतु। ........................................... ।
8. एधमानः बालः चलति। ........................................... ।
9. डयमानः पक्षी दूरं गच्छति। ........................................... ।
10. स्मयमानः युवकः अवदत्। ........................................... ।

7. यथोचितं योजयत–

| | | | | |
|---|---|---|---|---|
| कम्पमानम् | विष्णुः | ➡ | शयानः | विष्णुः |
| भजमानम् | आदिशेषः | ➡ | ................ | ................ |
| खिद्यमानायाः | जगत् | ➡ | ................ | ................ |
| कम्पमाना | लक्ष्मीः | ➡ | ................ | ................ |
| शयानः | भूदेव्याः | ➡ | ................ | ................ |
| स्मयमानः | नारदम् | ➡ | ................ | ................ |
| मन्यमाना | पृथिवी | ➡ | ................ | ................ |

सूक्तिः – शयानं चानुशेते हि तिष्ठन्तं चानुतिष्ठति। अनुधावति धावन्तं कर्म पूर्वकृतं नरम्॥

www.thearyasamaj.org

# परिशिष्टम्

## क) शब्दरूपाणि

### इकारान्तः पुंलिङ्गः 'पति' शब्दः

| | | |
|---|---|---|
| पतिः | पती | पतयः |
| हे पते | पती | पतयः |
| पतिम् | पती | पतीन् |
| पत्या | पतिभ्याम् | पतिभिः |
| पत्ये | पतिभ्याम् | पतिभ्यः |
| पत्युः | पतिभ्याम् | पतिभ्यः |
| पत्युः | पत्योः | पतीनाम् |
| पत्यौ | पत्योः | पतिषु |

### इकारान्तः पुंलिङ्गः 'सखि' शब्दः

| | | |
|---|---|---|
| सखा | सखायौ | सखायः |
| हे सखे | सखायौ | सखायः |
| सखायम् | सखायौ | सखीन् |
| सख्या | सखिभ्याम् | सखिभिः |
| सख्ये | सखिभ्याम् | सखिभ्यः |
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्यौ | सख्योः | सखिषु |

### जकारान्तः पुंलिङ्गः 'वणिज्' शब्दः

| | | |
|---|---|---|
| वणिक्-ग् | वणिजौ | वणिजः |
| हे वणिक्-ग् | वणिजौ | वणिजः |
| वणिजम् | वणिजौ | वणिजः |
| वणिजा | वणिग्भ्यां | वणिग्भिः |
| वणिजे | वणिग्भ्यां | वणिग्भ्यः |
| वणिजः | वणिग्भ्यां | वणिग्भ्यः |
| वणिजः | वणिजोः | वणिजाम् |
| वणिजि | वणिजोः | वणिक्षु |

*एवमेव भिषज्, ऋत्विज्, इत्यादयः।*

### तकारान्तः पुंलिङ्गः 'मरुत्' शब्दः

| | | |
|---|---|---|
| मरुत् | मरुतौ | मरुतः |
| हे मरुत् | मरुतौ | मरुतः |
| मरुतम् | मरुतौ | मरुतः |
| मरुता | मरुद्भ्याम् | मरुद्भिः |
| मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| मरुतः | मरुतोः | मरुताम् |
| मरुति | मरुतोः | मरुत्सु |

*एवमेव दधत्, जाग्रत्, शूलभृत् इत्यादयः।*

### दकारान्तः पुंलिङ्गः 'सुहृद्' शब्दः

| | | |
|---|---|---|
| सुहृद् - त् | सुहृदौ | सुहृदः |
| हे सुहृद् - त् | सुहृदौ | सुहृदः |
| सुहृदम् | सुहृदौ | सुहृदः |
| सुहृदा | सुहृद्भ्याम् | सुहृद्भिः |
| सुहृदे | सुहृद्भ्याम् | सुहृद्भ्यः |
| सुहृदः | सुहृद्भ्याम् | सुहृद्भ्यः |
| सुहृदः | सुहृदोः | सुहृदाम् |
| सुहृदि | सुहृदोः | सुहृत्सु |

### नकारान्तः पुंलिङ्गः 'राजन्' शब्दः

| | | |
|---|---|---|
| राजा | राजानौ | राजानः |
| हे राजन् | राजानौ | राजानः |
| राजानम् | राजानौ | राज्ञः |
| राज्ञा | राजभ्याम् | राजभिः |
| राज्ञे | राजभ्याम् | राजभ्यः |
| राज्ञः | राजभ्याम् | राजभ्यः |
| राज्ञः | राज्ञोः | राज्ञाम् |
| राज्ञि / राजनि | राज्ञोः | राजसु |

www.thearyasamaj.org

### नकारान्तः पुंलिङ्गः 'पथिन्' शब्दः

| | | |
|---|---|---|
| पन्थाः | पन्थानौ | पन्थानः |
| हे पन्थाः | पन्थानौ | पन्थानः |
| पन्थानम् | पन्थानौ | पथः |
| पथा | पथिभ्याम् | पथिभिः |
| पथे | पथिभ्याम् | पथिभ्यः |
| पथः | पथिभ्याम् | पथिभ्यः |
| पथः | पथोः | पथाम् |
| पथि | पथोः | पथिषु |

*एवमेव 'मथिन्शब्दः ।*

### नकारान्तः पुंलिङ्गः 'गुणिन्' शब्दः

| | | |
|---|---|---|
| गुणी | गुणिनौ | गुणिनः |
| हे गुणिन् | गुणिनौ | गुणिनः |
| गुणिनम् | गुणिनौ | गुणिनः |
| गुणिना | गुणिभ्याम् | गुणिभिः |
| गुणिने | गुणिभ्याम् | गुणिभ्यः |
| गुणिनः | गुणिभ्याम् | गुणिभ्यः |
| गुणिनः | गुणिनोः | गुणिनाम् |
| गुणिनि | गुणिनोः | गुणिषु |

*एवमेव 'विद्यार्थिन्, एकाकिन्, अधिकारिन्, ज्ञानिन्, गोस्वामिन्, निवासिन् – इत्यादयः शब्दाः ।*

### सकारान्तः पुंलिङ्गः 'विद्वस्' शब्दः

| | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः |
| हे विद्वन् | विद्वांसौ | विद्वांसः |
| विद्वांसम् | विद्वांसौ | विदुषः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विदुषोः | विदुषाम् |
| विदुषि | विदुषोः | विद्वत्सु |

### ईकारान्तः स्त्रीलिङ्गः 'लक्ष्मी' शब्दः

| | | |
|---|---|---|
| लक्ष्मीः | लक्ष्म्यौ | लक्ष्म्यः |
| हे लक्ष्मि | लक्ष्म्यौ | लक्ष्म्यः |
| लक्ष्मीम् | लक्ष्म्यौ | लक्ष्मीः |
| लक्ष्म्या | लक्ष्मीभ्याम् | लक्ष्मीभिः |
| लक्ष्म्यै | लक्ष्मीभ्याम् | लक्ष्मीभ्यः |
| लक्ष्म्याः | लक्ष्मीभ्याम् | लक्ष्मीभ्यः |
| लक्ष्म्याः | लक्ष्म्योः | लक्ष्मीणाम् |
| लक्ष्म्याम् | लक्ष्म्योः | लक्ष्मीषु |

### ईकारान्तः स्त्रीलिङ्गः 'स्त्री' शब्दः

| | | |
|---|---|---|
| स्त्री | स्त्रियौ | स्त्रियः |
| हे स्त्रि | स्त्रियौ | स्त्रियः |
| स्त्रीयं | स्त्रियौ | स्त्रीः/स्त्रियः |
| स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः |
| स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः |
| स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः |
| स्त्रियाः | स्त्रियोः | स्त्रीणाम् |
| स्त्रियाम् | स्त्रियोः | स्त्रीषु |

### ईकारान्तः स्त्रीलिङ्गः 'श्रीः' शब्दः

| | | |
|---|---|---|
| श्रीः | श्रियौ | श्रियः |
| हे श्रीः | श्रियौ | श्रियः |
| श्रियम् | श्रियौ | श्रियः |
| श्रिया | श्रीभ्याम् | श्रीभिः |
| श्रियै/श्रिये | श्रीभ्याम् | श्रीभ्यः |
| श्रियाः/श्रियः | श्रीभ्याम् | श्रीभ्यः |
| श्रियाः/श्रियः | श्रियोः | श्रीणां/श्रियां |
| श्रियि/श्रियां | श्रियोः | श्रीषु |

www.thearyasamaj.org

चकारान्तः स्त्रीलिङ्गः 'वाच्' शब्दः

| | | |
|---|---|---|
| वाक्-ग् | वाचौ | वाचः |
| हे वाक्-ग् | वाचौ | वाचः |
| वाचम् | वाचौ | वाचः |
| वाचा | वाग्भ्याम् | वाग्भिः |
| वाचे | वाग्भ्याम् | वाग्भ्यः |
| वाचः | वाग्भ्याम् | वाग्भ्यः |
| वाचः | वाचोः | वाचाम् |
| वाचि | वाचोः | वाक्षु |

*एवमेव 'त्वच्' शब्दः।*

दकारान्तः स्त्रीलिङ्गः 'आपद्' शब्दः

| | | |
|---|---|---|
| आपद् -त् | आपदौ | आपदः |
| हे आपद् | आपदौ | आपदः |
| आपदम् | आपदौ | आपदः |
| आपदा | आपद्भ्याम् | आपद्भिः |
| आपदे | आपद्भ्याम् | आपद्भ्यः |
| आपदः | आपद्भ्याम् | आपद्भ्यः |
| आपदः | आपदोः | आपदाम् |
| आपदि | आपदोः | आपत्सु |

*एवमेव 'विपद्, सम्पद्, परिषद्, इत्यादयः।*

षकारान्तः स्त्रीलिङ्गः 'आशिष्' शब्दः

| | | |
|---|---|---|
| आशीः | आशिषौ | आशिषः |
| हे आशीः | आशिषौ | आशिषः |
| आशिषम् | आशिषौ | आशिषः |
| आशिषा | आशीर्भ्याम् | आशीर्भिः |
| आशिषे | आशीर्भ्याम् | आशीर्भ्यः |
| आशिषः | आशीर्भ्याम् | आशीर्भ्यः |
| आशिषः | आशिषोः | आशिषाम् |
| आशिषि | आशिषोः | आशीष्षु/आशीःषु |

तकारान्तः स्त्रीलिङ्गः 'सरित्' शब्दः

| | | |
|---|---|---|
| सरित् | सरितौ | सरितः |
| हे सरित् | सरितौ | सरितः |
| सरितम् | सरितौ | सरितः |
| सरिता | सरिद्भ्याम् | सरिद्भिः |
| सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| सरितः | सरितोः | सरिताम् |
| सरिति | सरितोः | सरित्सु |

*एवमेव 'विद्युत्' शब्दः।*

शकारान्तः स्त्रीलिङ्गः 'दिश्' शब्दः

| | | |
|---|---|---|
| दिक्-ग् | दिशौ | दिशः |
| हे दिक्-ग् | दिशौ | दिशः |
| दिशम् | दिशौ | दिशः |
| दिशा | दिग्भ्याम् | दिग्भिः |
| दिशे | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिशोः | दिशाम् |
| दिशि | दिशोः | दिक्षु |

तकारान्तः नपुंसकलिङ्गः 'जगत्' शब्दः

| | | |
|---|---|---|
| जगत् -द् | जगती | जगन्ति |
| हे जगत् -द् | जगती | जगन्ति |
| जगत् -द् | जगती | जगन्ति |
| जगता | जगद्भ्याम् | जगद्भिः |
| जगते | जगद्भ्याम् | जगद्भ्यः |
| जगतः | जगद्भ्याम् | जगद्भ्यः |
| जगतः | जगतोः | जगताम् |
| जगति | जगतोः | जगत्सु |

*एवमेव 'महत्, बृहत् , वियत्' इत्यादयः।*

www.thearyasamaj.org

नकारान्तः नपुंसकलिङ्गः 'नामन्' शब्दः

| | | |
|---|---|---|
| नाम | नाम्नी/नामनी | नामानि |
| हे नामन्/ नाम | नाम्नी/नामनी | नामानि |
| नाम/ नाम | नाम्नी/नामनी | नामानि |
| नाम्ना | नामभ्याम् | नामभिः |
| नाम्ने | नामभ्याम् | नामभ्यः |
| नाम्नः | नामभ्याम् | नामभ्यः |
| नाम्नः | नाम्नोः | नाम्नाम् |
| नाम्नि/नामनि | नाम्नोः | नामसु |

एवमेव धामन्, दामन्, इत्या

सकारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः

| | | |
|---|---|---|
| मनः | मनसी | मनांसि |
| हे मनः | मनसी | मनांसि |
| मनः | मनसी | मनांसि |
| मनसा | मनोभ्याम् | मनोभिः |
| मनसे | मनोभ्याम् | मनोभ्यः |
| मनसः | मनोभ्याम् | मनोभ्यः |
| मनसः | मनसोः | मनसाम् |
| मनसि | मनसोः | मनस्सु |

*एवमेव 'शिरस्, वयस्' इत्यादयः शब्दाः।*

मकारान्तः पुंलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| कः | कौ | के |
| कम् | कौ | कान् |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |

षकारान्तः नपुंसकलिङ्गः 'चक्षुष्' शब्दः

| | | |
|---|---|---|
| चक्षुः | चक्षुषी | चक्षूंषि |
| हे चक्षुः | चक्षुषी | चक्षूंषि |
| चक्षुः | चक्षुषी | चक्षूंषि |
| चक्षुषा | चक्षुर्भ्याम् | चक्षुर्भिः |
| चक्षुषे | चक्षुर्भ्याम् | चक्षुर्भ्यः |
| चक्षुषः | चक्षुर्भ्याम् | चक्षुर्भ्यः |
| चक्षुषः | चक्षुषोः | चक्षुषाम् |
| चक्षुषि | चक्षुषोः | चक्षुष्षु |

*एवमेव 'धनुष्' इत्यादयः शब्दाः।*

तकारान्तः पुंलिङ्गः 'भवत्' शब्दः

| | | |
|---|---|---|
| भवान् | भवन्तौ | भवन्तः |
| हे भवन् | भवन्तौ | भवन्तः |
| भवन्तम् | भवन्तौ | भवतः |
| भवता | भवद्भ्याम् | भवद्भिः |
| भवते | भवद्भ्याम् | भवद्भ्यः |
| भवतः | भवद्भ्याम् | भवद्भ्यः |
| भवतः | भवतोः | भवताम् |
| भवति | भवतोः | भवत्सु |

*एवमेव 'महत्, ज्ञानवत्' इत्यादयः शब्दाः।*

मकारान्तः स्त्रीलिंगः 'किम्' शब्दः

| | | |
|---|---|---|
| का | के | काः |
| काम् | के | काः |
| कया | काभ्याम् | काभिः |
| कस्यै | काभ्याम् | काभ्यः |
| कस्याः | काभ्याम् | काभ्यः |
| कस्याः | कयोः | कासाम् |
| कस्याम् | कयोः | कासु |

www.thearyasamaj.org

मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| किम् | के | कानि |
| किम् | के | कानि |

शेषं पुंलिङ्गवत्

मकारान्तः स्त्रीलिङ्गः 'इदम्' शब्दः

| | | |
|---|---|---|
| इयम् | इमे | इमाः |
| इमाम्(एनाम्) | इमे (एने) | इमाः(एनाः) |
| अनया(एनया) | आभ्याम् | आभिः |
| अस्यै | आभ्याम् | आभ्यः |
| अस्याः | आभ्याम् | आभ्यः |
| अस्याः | अनयोः(एनयोः) | आसाम् |
| अस्याम् | अनयोः(एनयोः) | आसु |

दकारान्तः पुंलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| सः | तौ | ते |
| तम् | तौ | तान् |
| तेन | ताभ्याम् | तैः |
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्य | तयोः | तेषाम् |
| तस्मिन् | तयोः | तेषु |

दकारान्तः नपुसंलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| तत् | ते | तानि |
| तत् | ते | तानि |

शेषं पुंलिङ्गवत्

दकारान्तः पुंलिङ्गः 'एतद्' शब्दः

| | | |
|---|---|---|
| एषः | एतौ | एते |
| एतम् | एतौ | एतान् |
| एतेन | एताभ्याम् | एतैः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतस्य | एतयोः | एतेषाम् |
| एतस्मिन् | एतयोः | एतेषु |

दकारान्तः नपुसंलिङ्गः 'एतद्' शब्दः

| | | |
|---|---|---|
| एतत् | एते | एतानि |
| एतत् | एते | एतानि |

मकारान्तः पुंलिङ्गः 'इदम्' शब्दः

| | | |
|---|---|---|
| अयम् | इमौ | इमे |
| इमम् (एनम्) | इमौ (एनौ) | इमान्(एनान्) |
| अनेन (एनेन) | आभ्याम् | एभिः |
| अस्मै | आभ्याम् | एभ्यः |
| अस्मात् | आभ्याम् | एभ्यः |
| अस्य | अनयोः(एनयोः) | एषाम् |
| अस्मिन् | अनयोः(एनयोः) | एषु |

मकारान्तः नपुंसकलिङ्गः 'इदम्' शब्दः

| | | |
|---|---|---|
| इदम् | इमे | इमानि |
| इदम् (एनत्) | इमे(एने) | इमान्(एनानि) |

शेषं पुंलिङ्गवत्

दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| सा | ते | ताः |
| ताम् | ते | ताः |
| तया | ताभ्याम् | ताभिः |
| तस्यै | ताभ्याम् | ताभ्यः |
| तस्याः | ताभ्याम् | ताभ्यः |
| तस्याः | तयोः | तासाम् |
| तस्याम् | तयोः | तासु |

दकारान्तः स्त्रीलिङ्गः 'एतद्' शब्दः

| | | |
|---|---|---|
| एषा | एते | एताः |
| एताम् | एते | एताः |
| एतया | एताभ्याम् | एताभिः |
| एतस्यै | एताभ्याम् | एताभ्यः |
| एतस्याः | एताभ्याम् | एताभ्यः |
| एतस्याः | एतयोः | एतासाम् |
| एतस्याम् | एतयोः | एतासु |

www.thearyasamaj.org

# ख) धातुरूपाणि

अ) परस्मैपदिनः धातवः

| धातुः | लट् | कर्मणि | णिच् | क्त्वा | ल्यप् | तुमुन् | तव्यत् | अनीयर् | क्तवतु | क्त |
|---|---|---|---|---|---|---|---|---|---|---|
| अट (गतौ) | अटति | अट्यते | आटयति | अटित्वा | पर्यट्य | अटितुम् | अटितव्यम् | अटनीयम् | अटितवान् | अटितः |
| अर्च(पूजायाम्) | अर्चति | अर्च्यते | अर्चयति | अर्चित्वा | समर्च्य | अर्चितुम् | अर्चितव्यम् | अर्चनीयम् | अर्चितवान् | अर्चितः |
| डुक्रीञ्(द्रव्यविनिमये) | क्रीणाति | क्रीयते | क्रापयति | क्रीत्वा | विक्रीय | क्रेतुम् | क्रेतव्यम् | क्रयणीयम् | क्रीतवान् | क्रीतः |
| क्रीडृ(विहारे) | क्रीडति | क्री ड्यते | क्रीडयति | क्रीडित्वा | संक्रीड्य | क्रीडितुम् | क्रीडितव्यम् | क्रीडनीयम् | क्रीडितवान् | क्रीडितः |
| खादृ(भक्षणे) | खादति | खाद्यते | खादयति | खादित्वा | संखाद्य | खादितुम् | खादितव्यम् | खादनीयम् | खादितवान् | खादितः |
| गम्लृ(गतौ) | गच्छति | गम्यते | गमयति | गत्वा | अवगत्य | गन्तुम् | गन्तव्यम् | गमनीयम् | गतवान् | गतः |
| गै(शब्दे) | गायति | गीयते | गापयति | गीत्वा | प्रगाप्य | गातुम् | गातव्यम् | गानीयम् | गीतवान् | गीतः |
| जप(व्यक्तायां वाचि मानसे च) | जपति | जप्यते | जापयति | जपित्वा | संजप्य | जपितुम् | जपितव्यम् | जपनीयम् | जपितवान् | जपितः |
| जीव(प्राणधारणे) | जीवति | जीव्यते | जीवयति | जीवित्वा | उपजीव्य | जीवितुम् | जीवितव्यम् | जीवनीयम् | जीवितवान् | जीवितः |
| ज्ञा(अवबोधने) | जानाति | ज्ञायते | ज्ञापयति | ज्ञात्वा | विज्ञाय | ज्ञातुम् | ज्ञातव्यम् | ज्ञानीयम् | ज्ञातवान् | ज्ञातः |
| घ्रा(गन्धोपादाने) | जिघ्रति | घ्रायते | घ्रापयति | घ्रात्वा | आघ्राय | घ्रातुम् | घ्रातव्यम् | घ्राणीयम् | घ्रातवान् | घ्रातः |
| णम(प्रह्वत्वे शब्दे च) | नमति | नम्यते | नमयति | नत्वा | प्रणम्य | नन्तुम् | नन्तव्यम् | नमनीयम् | नतवान् | नतः |
| णीञ्(प्रापणे) | नयति | नीयते | नाययति | नीत्वा | आनीय | नेतुम् | नेतव्यम् | नयनीयम् | नीतवान् | नीतः |
| त्यज(हानौ) | त्यजति | त्यज्यते | त्याजयति | त्यक्त्वा | सन्त्यज्य | त्यक्तुम् | त्यक्तव्यम् | त्यजनीयम् | त्यक्तवान् | त्यक्तः |

www.thearyasamaj.org



| धातुः | लट् | कर्मणि | णिच् | क्त्वा | ल्यप् | तुमुन् | तव्यत् | अनीयर् | क्तवतु | क्त |
|---|---|---|---|---|---|---|---|---|---|---|
| दृशिर्(प्रेक्षणे) | पश्यति | दृश्यते | दर्शयति | दृष्ट्वा | संदृश्य | द्रष्टुम् | द्रष्टव्यम् | दर्शनीयम् | दृष्टवान् | दृष्टः |
| धावु(गतिशुद्धयोः) | धावति | धाव्यते | धावयति | धावित्वा | अनुधाव्य | धावितुम् | धावितव्यम् | धावनीयम् | धावितवान् | धावितः |
| धृञ्(धारणे) | धरति | ध्रियते | धारयति | धृत्वा | उद्धृत्य | धर्तुम् | धर्तव्यम् | धरणीयम् | धृतवान् | धृतः |
| डुपचष्(पाके) | पचति | पच्यते | पाचयति | पक्त्वा | विपच्य | पक्तुम् | पक्तव्यम् | पचनीयम् | पक्ववान् | पक्वः |
| पठ(व्यक्तायां वाचि) | पठति | पठ्यते | पाठयति | पठित्वा | प्रपठ्य | पठितुम् | पठितव्यम् | पठनीयम् | पठितवान् | पठितः |
| पत्लृ(गतौ) | पतति | पत्यते | पातयति | पतित्वा | निपत्य | पतितुम् | पतितव्यम् | पतनीयम् | पतितवान् | पतितः |
| पा(पाने) | पिबति | पीयते | पाययति | पीत्वा | निपीय | पातुम् | पातव्यम् | पानीयम् | पीतवान् | पीतः |
| भू(सत्तायाम्) | भवति | भूयते | भावयति | भूत्वा | सम्भूय | भवितुम् | भवितव्यम् | भवनीयम् | भूतवान् | भूतः |
| रक्ष(पालने) | रक्षति | रक्ष्यते | रक्षयति | रक्षित्वा | संरक्ष्य | रक्षितुम् | रक्षितव्यम् | रक्षणीयम् | रक्षितवान् | रक्षितः |
| वद(व्यक्तायां वाचि) | वदति | उद्यते | वादयति | उदित्वा | अनूद्य | वदितुम् | वदितव्यम् | वदनीयम् | उदितवान् | उदितः |
| सृ(गतौ) | सरति | स्रियते | सारयति | सृत्वा | अनुसृत्य | सर्तुम् | सर्तव्यम् | सरणीयम् | सृतवान् | सृतः |
| स्मृ(चिन्तायाम्) | स्मरति | स्मर्यते | स्मारयति | स्मृत्वा | विस्मृत्य | स्मर्तुम् | स्मर्तव्यम् | स्मरणीयम् | स्मृतवान् | स्मृतः |
| हसे(हसने) | हसति | हस्यते | हासयति | हसित्वा | विहस्य | हसितुम् | हसितव्यम् | हसनीयम् | हसितवान् | हसितः |
| अस(भुवि) | अस्ति | भूयते | भावयति | भूत्वा | सम्भूय | भवितुम् | भवितव्यम् | भवनीयम् | भूतवान् | भूतः |

www.thearyasamaj.org

| धातुः | लट् | कर्मणि | णिच् | क्त्वा | ल्यप् | तुमुन् | तव्यत् | अनीयर् | क्तवतु | क्त |
|---|---|---|---|---|---|---|---|---|---|---|
| रुदिर् (अश्रुविमोचने) | रोदिति | रुद्यते | रोदयति | रुदित्वा | प्ररुद्य | रोदितुम् | रोदितव्यम् | रोदनीयम् | रुदितवान् | रुदितः |
| डुदाञ् (दाने) | ददाति | दीयते | दापयति | दत्त्वा | प्रदाय | दातुम् | दातव्यम् | दानीयम् | दत्तवान् | दत्तः |
| ञिभी (भये) | बिभेति | भीयते | भाययति | भीत्वा | विभीय | भेतुम् | भेतव्यम् | भयनीयम् | भीतवान् | भीतः |
| क्रुध (क्रोधे) | क्रुध्यति | क्रुध्यते | क्रोधयति | क्रुद्ध्वा | संक्रुद्ध्य | क्रोद्धुम् | क्रोद्धव्यम् | क्रोधनीयम् | क्रुद्धवान् | क्रुद्धः |
| णश (अदर्शने) | नश्यति | नश्यते | नाशयति | नशित्वा | प्रणश्य | नशितुम् | नशितव्यम् | नशनीयम् | नष्टवान् | नष्टः |
| ष्णिह (प्रीतौ) | स्निह्यति | स्निह्यते | स्नेहयति | स्नेहित्वा | संस्निह्य | स्नेहितुम् | स्नेहितव्यम् | स्नेहनीयम् | स्निग्धवान् | स्निग्धः |
| षिधु (संराद्धौ) | सिध्यति | सिध्यते | सेधयति | सिद्ध्वा | संसिध्य | सेधितुम् | सेधितव्यम् | सेधनीयम् | सिद्धवान् | सिद्धः |
| शक्लृ (शक्तौ) | शक्नोति | शक्यते | शाकयति | शक्त्वा | प्रशक्य | शक्तुम् | शक्तव्यम् | शकनीयम् | शक्तवान् | शक्तः |
| आप्लृ (व्याप्तौ) | आप्नोति | आप्यते | आपयति | आप्त्वा | प्राप्य | आप्तुम् | आप्तव्यम् | आपनीयम् | आप्तवान् | आप्तः |
| क्षिप (प्रेरणे) | क्षिपति | क्षिप्यते | क्षेपयति | क्षिप्त्वा | प्रक्षिप्य | क्षेप्तुम् | क्षेप्तव्यम् | क्षेपणीयम् | क्षिप्तवान् | क्षिप्तः |
| इषु (इच्छायाम्) | इच्छति | इष्यते | एषयति | इष्ट्वा | समिष्य | एष्टुम् | एष्टव्यम् | एषणीयम् | इष्टवान् | इष्टः |
| लिख (अक्षरविन्यासे) | लिखति | लिख्यते | लेखयति | लिखित्वा | विलिख्य | लेखितुम् | लेखितव्यम् | लेखनीयम् | लिखितवान् | लिखितः |
| प्रच्छ (ज्ञीप्सायाम्) | पृच्छति | पृच्छ्यते | प्रच्छयति | पृष्ट्वा | आपृच्छ्य | प्रष्टुम् | प्रष्टव्यम् | प्रच्छनीयम् | पृष्टवान् | पृष्टः |
| विश (प्रवेशने) | विशति | विश्यते | वेशयति | विष्ट्वा | प्रविश्य | वेष्टुम् | वेष्टव्यम् | वेशनीयम् | विष्टवान् | विष्टः |
| मिल (सङ्गमे) | मिलति | मिल्यते | मेलयति | मिलित्वा | संमिल्य | मेलितुम् | मेलितव्यम् | मेलनीयम् | मिलितवान् | मिलितः |

www.thearyasamaj.org



| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| डुकृञ्(करणे) | करोति | क्रियते | कारयति | कृत्वा | सत्कृत्य | कर्तुम् | कर्तव्यम् | करणीयम् | कृतवान् | कृतः |
| ग्रह(उपादाने) | गृह्णाति | गृह्यते | ग्राहयति | गृहीत्वा | प्रतिगृह्य | ग्रहीतुम् | ग्रहीतव्यम् | ग्रहणीयम् | गृहीतवान् | गृहीतः |
| चुर(स्तेये) | चोरयति | चोर्यते | चोरयति | चोरयित्वा | प्रचोर्य | चोरयितुम् | चोरयितव्यम् | चोरणीयम् | चोरितवान् | चोरितः |
| चिति(स्मृत्याम्) | चिन्तयति | चिन्त्यते | चिन्तयति | चिन्तयित्वा | विचिन्त्य | चिन्तयितुम् | चिन्तयितव्यम् | चिन्तनीयम् | चिन्तितवान् | चिन्तितः |
| तड(आघाते) | ताडयति | ताड्यते | ताडयति | ताडयित्वा | प्रताड्य | ताडयितुम् | ताडयितव्यम् | ताडनीयम् | ताडितवान् | ताडितः |
| क्षल(शौचकर्मणि) | क्षालयति | क्षाल्यते | क्षालयति | क्षालयित्वा | प्रक्षाल्य | क्षालयितुम् | क्षालयितव्यम् | क्षालनीयम् | क्षालितवान् | क्षालितः |
| पाल(रक्षणे) | पालयति | पाल्यते | पालयति | पालयित्वा | परिपाल्य | पालयितुम् | पालयितव्यम् | पालनीयम् | पालितवान् | पालितः |
| रच(प्रतियत्ने) | रचयति | रच्यते | रचयति | रचयित्वा | संरच्य | रचयितुम् | रचयितव्यम् | रचनीयम् | रचितवान् | रचितः |
| **आ) आत्मनेपदिनः धातवः** | | | | | | | | | | |
| अय(गतौ) | अयते | अय्यते | आययति | अयित्वा | पलाय्य | अयितुम् | अयितव्यम् | अयनीयम् | अयितवान् | अयितः |
| इङ्(अध्ययने) | अधीते | अधीयते | अध्यापयति | अधीत्य | ........ | अध्येतुम् | अध्येतव्यम् | अध्ययनीयम् | अधीतवान् | अधीतः |
| ईक्ष(दर्शने) | ईक्षते | ईक्ष्यते | ईक्षयति | ईक्षित्वा | प्रतीक्ष्य | ईक्षितुम् | ईक्षितव्यम् | ईक्षणीयम् | ईक्षितवान् | ईक्षितः |
| ऊह(वितर्के) | ऊहते | ऊह्यते | ऊहयति | ऊहित्वा | समुह्य | ऊहितुम् | ऊहितव्यम् | ऊहनीयम् | ऊहितवान् | ऊहितः |
| एध(वृद्धौ) | एधते | एध्यते | एधयति | एधित्वा | समेध्य | एधितुम् | एधितव्यम् | एधनीयम् | एधितवान् | एधितः |
| कपि(चलने) | कम्पते | कम्प्यते | कम्पयति | कम्पित्वा | प्रकम्प्य | कम्पितुम् | कम्पितव्यम् | कम्पनीयम् | कम्पितवान् | कम्पितः |
| कमु(कान्तौ) | कामयते | काम्यते | कामयति | कामयित्वा | प्रकाम्य | कामयितुम् | कामयितव्यम् | कामनीयम् | कामितवान् | कामितः |
| काशृ(दीप्तौ) | काशते | काश्यते | काशयति | काशित्वा | प्रकाश्य | काशितुम् | काशितव्यम् | काशनीयम् | काशितवान् | काशितः |

www.thearyasamaj.org

| धातुः | लट् | कर्मणि | णिच् | क्त्वा | ल्यप् | तुमुन् | तव्यत् | अनीयर् | क्तवतु | क्त |
|---|---|---|---|---|---|---|---|---|---|---|
| कुर्द(क्रीडायाम्) | कूर्दते | कूर्द्यते | कूर्दयति | कूर्दित्वा | संकूर्द्य | कूर्दितुम् | कूर्दितव्यम् | कूर्दनीयम् | कूर्दितवान् | कूर्दितः |
| क्षमूष्(सहने) | क्षमते | क्षम्यते | क्षमयति | क्षमित्वा | ——— | क्षमितुम् | क्षमितव्यम् | क्षमणीयम् | क्षान्तवान् | क्षान्तः |
| खिद(दैन्ये) | खिद्यते | खिद्यते | खेदयति | खित्वा | प्रखिद्य | खेत्तुम् | खेदितव्यम् | खेदनीयम् | खिन्नवान् | खिन्नः |
| गाहू(विलोडने) | गाहते | गाह्यते | गाहयति | गाहित्वा | विगाह्य | गाहितुम् | गाहितव्यम् | गाहनीयम् | गाढवान् | गाढः |
| जनी(प्रादुर्भावे) | जायते | जायते | जनयति | जनित्वा | प्रजन्य | जनितुम् | जनितव्यम् | जननीयम् | जातवान् | जातः |
| डीङ्(विहायसा गतौ) | डीयते | डीयते | डाययति | डयित्वा | उड्डीय | डयितुम् | डयितव्यम् | डयनीयम् | डयितवान् | डयितः |
| त्रैङ्(पालने) | त्रायते | त्रायते | त्रापयति | त्रात्वा | परित्राय | त्रातुम् | त्रातव्यम् | त्राणीयम् | त्राणवान् | त्राणः |
| ष्मिङ्(ईषद्धसने) | स्मयते | स्मीयते | स्माययति | स्मित्वा | विस्मीय | स्मीतुम् | स्मेतव्यम् | स्मयनीयम् | स्मितवान् | स्मितः |
| दृङ्(आदरे) (आङ्पूर्वकः) | आद्रियते | आद्रियते | आदारयति | दृत्वा | आदृत्य | आदर्तुम् | आदर्तव्यम् | आदरणीयम् | आदृतवान् | आदृतः |
| पद(गतौ) | पद्यते | पद्यते | पादयति | पत्त्वा | उत्पद्य | पत्तुम् | पत्तव्यम् | पदनीयम् | पन्नवान् | पन्नः |
| बाधृ(लोडने) | बाधते | बाध्यते | बाधयति | बाधित्वा | विबाध्य | बाधितुम् | बाधितव्यम् | बाधनीयम् | बाधितवान् | बाधितः |
| भाष(व्यक्तायां वाचि) | भाषते | भाष्यते | भाषयति | भाषित्वा | प्रभाष्य | भाषितुम् | भाषितव्यम् | भाषणीयम् | भाषितवान् | भाषितः |
| मुद(हर्षे) | मोदते | मुद्यते | मोदयति | मुदित्वा | प्रमुद्य | मोदितुम् | मोदितव्यम् | मोदनीयम् | मोदितवान् | मोदितः |
| यती(प्रयत्ने) | यतते | यत्यते | यातयति | यतित्वा | प्रयत्य | यतितुम् | यतितव्यम् | यतनीयम् | यत्तवान् | यत्तः |

| धातुः | लट् | कर्मणि | णिच् | क्त्वा | ल्यप् | तुमुन् | तव्यत् | अनीयर् | क्तवतु | क्त |
|---|---|---|---|---|---|---|---|---|---|---|
| रमु(क्रीडायाम्) | रमते | रम्यते | रमयति | रत्वा | विरम्य | रन्तुम् | रन्तव्यम् | रमणीयम् | रतवान् | रतः |
| डुलभष्(प्राप्तौ) | लभते | लभ्यते | लभयति | लब्ध्वा | उपलभ्य | लब्धुम् | लब्धव्यम् | लभनीयम् | लब्धवान् | लब्धः |
| लोकृ(दर्शने) | लोकते | लोक्यते | लोकयति | लोकित्वा | आलोक्य | लोकितुम् | लोकितव्यम् | लोकनीयम् | लोकितवान् | लोकितः |
| ओ लस्जी(व्रीडने) | लज्जते | लज्ज्यते | लज्जयति | लज्जित्वा | विलज्ज्य | लज्जितुम् | लज्जितव्यम् | लज्जनीयम् | लज्जितवान् | लज्जितः |
| वदि(अभिवादनस्तुत्योः) | वन्दते | वन्द्यते | वन्दयति | वन्दित्वा | अभिवन्द्य | वन्दितुम् | वन्दितव्यम् | वन्दनीयम् | वन्दितवान् | वन्दितः |
| वृतु(वर्तने) | वर्तते | वृत्यते | वर्तयति | वर्तित्वा | आवृत्य | वर्तितुम् | वर्तितव्यम् | वर्तनीयम् | वर्तितवान् | वर्तितः |
| वृधु(वृद्धौ) | वर्धते | वृध्यते | वर्धयति | वर्धित्वा | प्रवृध्य | वर्धितुम् | वर्धितव्यम् | वर्धनीयम् | वर्धितवान् | वर्धितः |
| शकि(शङ्कायाम्) | शङ्कते | शङ्क्यते | शङ्कयति | शङ्कित्वा | आशङ्क्य | शङ्कितुम् | शङ्कितव्यम् | शङ्कनीयम् | शङ्कितवान् | शङ्कितः |
| शिक्ष(विद्योपादाने) | शिक्षते | शिक्ष्यते | शिक्षयति | शिक्षित्वा | प्रशिक्ष्य | शिक्षितुम् | शिक्षितव्यम् | शिक्षणीयम् | शिक्षितवान् | शिक्षितः |
| शुभ(दीप्तौ) | शोभते | शुभ्यते | शोभयते | शिभित्वा | प्रशोभ्य | शोभितुम् | शोभितव्यम् | शोभनीयम् | शोभितवान् | शोभितः |
| षह(मर्षणे) | सहते | सह्यते | साहयति | सोढ्वा | प्रसह्य | सोढुम् | सोढव्यम् | सहनीयम् | सोढवान् | सोढः |


www.thearyasamaj.org

www.thearyasamaj.org

# संस्कृताय भवन्तः कृपया अधोनिर्दिष्टेषु पञ्चविंशत्यां कार्येषु कानिचन पञ्च कार्याणि कुर्वन्तु

१. 'वदतु संस्कृतम्' इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीत्वा पञ्चभ्यः जनेभ्यः ददातु ।
२. 'पत्राचारद्वारा संस्कृतशिक्षणम्' इति योजनायां पञ्च शिक्षार्थिनः योजयतु ।
३. सम्भाषणसन्देशपत्रिकायाः पञ्च ग्राहकान् सङ्गृह्णातु ।
४. पञ्चभ्यः जनेभ्यः संस्कृतभारत्यै धनसहयोगराशिं सङ्गृह्य ददातु ।
५. संस्कृतभारत्याः पञ्च पुस्तकानि क्रेतुं पञ्च जनान् प्रेरयतु ।
६. पञ्चसु स्थानेषु सम्भाषणशिबिराणाम् आयोजने साहाय्यं करोतु ।
७. वर्षे पञ्च दिनानि संस्कृतप्रचारकार्याय ददातु ।
८. पञ्चविधानि प्रचारपत्रकाणि मुद्राप्य ददातु ।
९. पञ्च संश्लेषकान् कारयित्वा मुद्राप्य च ददातु ।
१०. पञ्च संस्कृतशुभाशयपत्राणि कारयित्वा / मुद्रयित्वा ददातु ।
११. पञ्चसु विद्यालयेषु संस्कृतच्छात्रेभ्यः दानाय पञ्च पुरस्कारान् ददातु ।
१२. Pride of India इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीणातु विक्रीणतां वा ।
१३. पञ्चसु मन्दिरेषु संस्कृतभारत्याः प्रचारफलकानि स्थापयतु ।
१४. पञ्चानां प्रभावि-प्रतिष्ठित-जनानां कृते संस्कृतभारत्याः परिचयं कारयतु ।
१५. प्रचारार्थं पञ्च वस्त्रफलकानि कारयित्वा ददातु ।
१६. पञ्चानां विद्यालयानां ग्रन्थालयेभ्यः संस्कृतभारत्याः पुस्तकानां गुच्छान् ददातु ।
१७. प्रतिदिनं पञ्च रूप्यकाणि संस्कृतप्रचारकार्याय दानरूपेण दानपात्रे स्थापयतु ।
१८. प्रतिदिनं पञ्चभिः जनैः सह किञ्चित् किञ्चित् संस्कृतसम्भाषणं करोतु ।
१९. पञ्च जनान् संस्कृतं पाठयतु ।
२०. प्रतिसप्ताहं पञ्च नूतनजनान् दूरभाषया सम्पर्क्य संस्कृतभारतीं परिचाययतु ।
२१. संस्कृतकार्ये सहयोगाय पञ्च संस्थाः प्रेरयतु ।
२२. संस्कृतकार्यविषये पञ्च लेखान् लिखतु ।
२३. पञ्चभ्यः जनेभ्यः संस्कृतविषये पत्राणि लिखतु ।
२४. पञ्चसु स्थानेषु संस्कृतविषये, संस्कृतभारत्याः विषये च भाषणं करोतु ।
२५. उपायनदानसमये पञ्चसु प्रसङ्गेषु संस्कृतपुस्तकानि ददातु ।

maj.org




रू. १३०/-

ISBN 978- 81-87276-37-1

# सम्भाषणसन्देशः

(बहुवर्णरञ्जिता संस्कृतमासपत्रिका) सरला भाषा, सुलभावगमनयोग्या ललिता शैली । कथा, विज्ञानं, भाषापाठनं, भाषाभ्यासः, राष्ट्रियचिन्तनं, शब्दसम्पत्तिः, सामयिकविचारः, आधुनिकाः समाचाराः - अन्येऽपि बहवः लेखाः ।

वार्षिकं ग्राहकशुल्कम् रू0 ११०/-

द्वैवार्षिकं ग्राहकशुल्कम् रू0 २१०/-

त्रैवार्षिकं ग्राहकशुल्कम् रू0 ३००/-

ग्राहकशुल्कं धनादेश(M.O) / डिमाण्ड् ड्राफ्ट्(D.D) द्वारा अधस्तनसङ्केताय प्रेषयन्तु -

Sambhashana Sandeshah
"Aksharam", Girinagar, Bangalore - 560 085
E-mail: samskritam@gmail.com
Ph : (080) 26722576 / 26721052

ISBN 818727637-1
9788187276371